विद्योत्तमा कालिदासीयम्

रचयिता

डा० रामकिशोर मिश्रः

संस्कृतमहाकाव्यम्

विद्योत्तमाकालिदासीयम्

संस्कृतमहाकाव्यम्

था प्रकाशकः

डॉ० राम किशोर मिश्रः

संस्कृतविभागाध्यक्षः

महामना-मालवीय-महाविद्यालयः

खेकड़ा-२०११०१ (मेरठ) उत्तरप्रदेशः, भारतम् ।

सर्वेऽधिकारा लेखकाधीनाः

मूल्यम्-१००/-

प्रकाशनतिथिः

माघी व्रतपूर्णिमा, संवत्-२०५१

१५-२-१९९५

मुद्रक :- यमुनामुद्रणालयः, बागपत (मेरठ) उ. प्र. ।

काव्ये सर्गविषयाऽनुक्रमणिका

सर्गाः	विषयाः	पद्यानि	पृष्ठाः
	कविकथनम्	०८	कः
	काव्यसमर्पणम्	०३	खः
१-प्रथमसर्गः	सन्ततिकामना	४१	१-८
२-द्वितीयसर्गः	विद्योत्तमाजन्म	५१	९-१७
३-तृतीयसर्गः	विद्योत्तमाप्रतिज्ञा	५७	१८-२५
४-चतुर्थसर्गः	शास्त्रार्थः	३५	२६-३१
५-पञ्चमसर्गः	मातुः पुत्रीविवाहचिन्ता	३२	३२-३७
६-षष्ठसर्गः	प्रतारणयोजना	४४	३८-४५
७-सप्तमसर्गः	मौनशास्त्रार्थः	६२	४६-५५
८-अष्टमसर्गः	कालिदासविवाहः	८९	५६-६६
९-नवमसर्गः	मिथुनमेलनशर्वरी	६९	६७-७८
१०-दशमसर्गः	गुरुशिष्यवार्ता	४०	७९-८६
११-एकादशसर्गः	पुत्रीविषये पितुश्चिन्ता	६१	८७-९७
१२-द्वादशसर्गः	पत्नीं प्राप्तुं प्रयत्नः	५४	९८-१०३
१३-त्रयोदशसर्गः	कालिदासं कवीकतुं प्रयत्नः	५२	१०४-११२
१४-चतुर्दशसर्गः	कालिदासस्य कवित्वम्	१०१	११३-१२६
१५-पञ्चदशसर्गः	पत्नीत्यागपत्रम्	७१	१२७-१३६
१६-षोडशसर्गः	काव्यचर्चा	१३१	१३७-१५८
१७-सप्तदशसर्गः	प्रेमचर्चा	७०	१५९-१७०
१८-अष्टादशसर्गः	वात्सल्यम्	७०	१७१-१८२
१९-एकोनविंशसर्गः	गृहचर्चा	५८	१८३-१९२
२०-विंशसर्गः	दाम्पत्यम्	७८	१९३-२०६
२१-एकविंशसर्गः	बालशिक्षणम्	६८	२०७-२१७
	कविपरिचायिका	१६	२१८-२१९
	शुद्धिपत्रम्	१३६१	२२०

कविकथनम्

रचितं मया नवनववृत्तकाव्यम्,
नूतनसरसकान्तपदान्वितं यत् ।
तत्सर्वमत्र सुन्दरभावयुक्तम्,
कविना कृतं कविगौरवमपूर्वम् ॥१॥

काव्येन कामपि नवां गृह्णन्तु शिक्षाम्,
छात्रा गुरो: सुभावै: समलङ्कृता: स्यु: ।
नित्यं च ते गुरुकृपाभिरता भवन्तो
लोकोपकारकरणे भुवि सक्षमा: स्यु: ॥२॥

गेहे गेहे सुवधू: स्याद्विद्योत्तमासमा बुधा ।
कालिदाससमं पत्युर्मौर्ख्यमपनयेद्धि या ॥३॥

देशे ज्वलेयुर्वध्व: कदापि न,
शान्ति: सुखं स्यातां प्रतिगृहं च ।
भवेत नम्रा: संस्कृतमधीत्य,
विभातु भारतदेशे गिरेयम् ॥४॥

संस्कृतं सरलीकर्तुं लिखाम्यहं निरन्तरम् ।
दुर्बोधता न काप्यत्र पठ्यतां सस्कृत जनै: ॥५॥

यद्यत्पद्यं च गीतंच सरलं लिखितं मया ।
संस्कृतं तेन सर्वेण जनभाषा प्रतीयते ॥६॥

स्यादल्पं संस्कृतज्ञानं जनस्य कस्यचिद्यदि ।
तत्स ममाऽस्य काव्यस्य ह्यानन्दं प्राप्तुमर्हति ॥७॥

स्यादत्र स्खलनं क्वापि लेखन्या मुद्रणस्य वा ।
तत्कृपयैव क्षन्तव्यं भवता श्रीमता सता ॥८॥

—रामकिशोर मिश्र: ।

काव्यसमर्पणम्

ओङ्कारमिश्रसम्भूतो होतीलालः पिता मम ।
देवी प्रातः स्मरणीया मातृत्वेन कलावती ॥१॥
ययोरंशेन मे देहे रक्तं वहत्यहर्निशम् ।
ताभ्यां दिवं गतात्मभ्यां महाकाव्यं समर्पितम् ।२॥

—रामकिशोरमिश्रः

भारत उत्तरप्रदेश एटाजनपदसोरोंवासी,
साहित्य-व्याकरणाचार्यो विद्यावाचस्पति(ph.D.)मान् ।
वैक्रमबाणाऽनलखाऽऽत्माऽब्दे(१६३५)रामकिशोर मिश्र इह,
विद्योत्तमाकालिदासीयं महाकाव्यं कृतवान् ॥३॥

विद्योत्तमा-कालिदासीयम्

प्रथमः सर्गः (सन्ततिकामना) ।

यस्याऽष्टौ मूर्तयः ख्याताः, स समर्थः शिवो विभुः ।
प्रसारयतु लोकेषु, कवीनाममृतं यशः ॥१॥

ललामभूता भुवनेषु या सा
गङ्गादुकूलावृतपादभागा ।
ब्रूते मनुष्यं निजपार्श्वमागतं
भजस्व शर्वं निवसेह मागाः ॥२॥

यस्याः पुराणानि वदन्ति कीर्ति
भवन्ति नानाविधसाधुसङ्गाः ।
जानन्ति पुरुषाः के तां न नगरीं
यत्राऽमला सा वहतीति गङ्गा ॥३॥

लोकत्रयाद् या पृथगत्र गदिता
ताराहरिश्चन्द्रयशश्च धरते ।
चाण्डालगाथा हि तयोः प्रसिद्धा
या श्रोतृजनगणदुःखानि हरते ॥४॥

वसन्ति ते ब्राह्मणसाधुसङ्घाः
निरन्तरं ये तच्चिन्तयन्ति ।
यदुच्यते ब्रह्मबुधैर्हि वेदे
तदर्थमभितो गङ्गामटन्ति ॥५॥

तदधीयते छात्राः शान्तचित्ताः
गृहे गहे यस्यां पाठशाला ।
तपोधनैर्गुरुभिर्वेदपाठैं—
र्ज्ञानावृतैः शिष्यैः सा विशाला ॥६॥

भक्ताश्च तत्र काशीपतिविश्वनाथम्
नानाविधैः कृतपदैः श्लोकैः स्तुवन्ति ।
भवनेषु साधु पशुपतिनाथं भजन्ति
मन्दिरगतास्तमित्थं संकीर्तयन्ति ॥७॥

शैलेशानसुतासुदृग्विलसनैः संहृष्टचित्तो हरः
मूर्धप्राङ्गणवासिपावककणंर्भस्मीकृतानन्यजः ।
सर्पाणामतिपीतसौम्यमणिजाभाकङ्कुमप्रद्रवै—
र्लिप्ताशावनितामुखः शरणदः शम्भुः सदा पातु नः ॥८॥
मार्तण्डक्षणदेशसङ्गमनिशीयध्वान्तकण्ठप्रभः
भक्तानां विपदां पराभवकरो दिग्वस्त्रकः शङ्करः ।
अष्टाभिः शुभसिद्धिभिः सह सदा वामोक्तिसङ्गीतिकः
शैलेशानसुताविभूषितकरः शम्भुः सदा पातु नः ॥९॥
कल्पान्ते हुहुडुग्धुडुङ्गिननदक्रन्मड्डुकप्रवादकवरः,
नृत्ये ताण्डवनामके विजयया संयोजितस्वान्तकः ।
क्रूराचारललाटकर्तनगतख्यातिस्त्रिशूली शिवः
शङ्कर्ता समदृष्टिकस्त्रिनयनः शंभुः सदा पातु नः ॥१०॥

मौलौ वै कुमुदांशुभावितरणप्रोद्भूतसंज्योत्स्नया
सार्धं शीतलचन्द्रभूषितसटो यस्तज्जटावर्तुलात्
मत्स्यव्रातसभङ्गफेनिलगतिर्धग्धग्रवान् कुर्वती
गङ्गा याति तया विभूषितशिराः शम्भुः सदा पातु नः ॥११॥

गीर्वाणाच्छकबन्धयुक्तसरिदि स्नात्वा परित्यज्य दु—
र्झंप्ति मूर्धसु बद्धपाणियुगलान् वै वामनेत्रोत्तमा-
गौरीशेखरटङ्कितं शिवशिवेत्युद्भाषमाणान् स्तवं
नागाबद्धजटस्स भूषितसटश्शम्भुः सदा पातु नः ॥१२॥

क्वापि नमः शिवायेति भक्ता जपन्ति शङ्करम् ।
अन्यत्र तस्य पुत्रं ते संस्तुवन्ति विनायकम् ॥१३॥

वन्दे तं देवदेवं गिरिशगिरिसुताप्रेमचिह्नस्वरूपम्
मात्रादेशं विनान्तः कथमपि चिदथाऽदत्ततात प्रवेशम् ।
पित्रा छिन्नस्वशीर्षं पुनरपि जननीजीवितं हस्तिशीर्षम्
सर्वार्चामुख्यदेशं समहितकरदं श्रीगणेशं गणेशम् ॥१४॥

वन्दे तं चैकदन्तं प्रमदकरटिनं लम्बवक्रप्रशुण्डम्
लोलोल्लोलत्वमाप्तैः सुमदजलवशादागतैर्दूरदेशात्
भृङ्गैस्तैः कृष्णवर्णैःस्वनसुकलकलात्सौरभं प्राप्तुकामै-
र्झञ्झङ्कारत्वशीलैर्मुखरितकरटं श्रीगणेश गणेशम् ॥१५॥

वन्दे तं विघ्ननाशं प्रथितसुरपदं सन्ततं सञ्चलद्भ्याम्
लम्बाभ्यां सूर्पकाभ्यामिव कणसदृशान् कर्णकाभ्यां द्विरेफान् ।
दूरीकर्तारमीशं विबुधगणपतिस्वीकृताखूपवेशम्
विद्याधीशं प्रधीशं जनहितफलदं श्रीगणेशं गणेशम् ॥१६॥

कृतशर्वसेवैर्भक्तैर्जनेभ्यः
प्रदीयते नितरामित्थमाशीः ।
या काश्यते ज्ञानैर्मोक्षदात्री
विज्ञायते विज्ञैः सैव काशी ॥१७॥

खवेदखात्माङ्कित (२०४०) वर्षपूर्वं
नृपोऽभवच्शारदानन्दनामा ।
स बुधोऽपि सबुधोऽत्रराज युक्तो
गणेन महतां विज्ञानभाजा ॥१८॥

यच्छासने नासीत् कोऽपि दुःखी
शोकी न विरही रोगी न भोगी ।
चिन्तनपरोऽभूच्च जनः समस्तो
विद्यापरो मित्रं सर्वयोगी ॥१९॥

पाणिग्रहणमेव विवाहकाले
प्रवृद्धपुरुषाणां हस्तदण्डः ।
कपालखण्डस्तु मृतकचितायां
प्रजासु नासीत् क्रोधः प्रचण्डः ॥२०॥
सूर्ये कराः सन्ति गृहेषु निगडाः
भुजङ्गमानां कौटिल्यवादः ।
दोषाऽन्धतिमिरं दोषाऽपहरणं
प्रजासुनासीन्नारी विवादः ॥२१॥

केशग्रहो नारीणां रतेषु
शास्त्रेषु चिन्ता काव्येषु बन्धः
न वर्णसङ्करताऽऽसीत् प्रजासु
कामप्रसङ्गे दूतप्रबन्धः ॥२२॥

छत्रेषु दण्डाः कम्पा ध्वजेषु
गीतेषु रागाः करिमदविकाराः ।
शशिभाकलङ्का नासन् प्रजासु
गवाक्षलीना जालप्रकाराः ॥२३॥

मकरध्वजे चापविराव आसीद्
गजाङ्कशस्त्वश्वकशाभिघातः ।
नूपुरमुखरता कुन्तलविभङ्गो
यज्ञाग्निधूमैर्यत्राऽश्रुपातः ॥२४॥

पाशेषु शून्यानि गृहाणि ह्यासन्
नारीनराणां स्वप्ने वियोगाः ।
सायं विहाराः कामप्रसाराः
क्रीडाप्रहारा गुप्तास्तु भोगाः ॥२५॥

प्रसूतशिशुहर्षभरैः सुगीतै—
र्वाद्यैश्च गुञ्जितगृहजातमासीत् ।
राजा स शास्ति स्म प्रजाः प्रजावत्
प्रजासु सन्तानस्तस्य नासीत् ॥२६॥

केनापि शम्भुं विष्णुं च कालीं
गौरीं च पूजयितुं स हि नियुक्तः ।
केनापि वा याज्ञिकपण्डितेन
पुत्रेष्टियज्ञं कर्तुं स उक्तः ॥२७॥

अपत्यलाभाय स तीर्थजातं
बभ्राम निममज्ज च तज्जलेषु ।
दत्तावधानस्त्वेकाग्रचित्त—
स्तेपे तपो निर्मलभूतलेषु ॥२८॥

मठान् विहारान् शुभपर्वतान् च
पूजाप्रसिद्धान् प्रस्थलविशेषान् ।
सन्तानकामनया देवपूजां
कर्तुं मुदा पर्यटतीत् स धीमान् ॥२९॥

गङ्गागृहं घण्टितमत्र तेन
हरिमन्दिरे पुष्पाण्यर्पितानि ।
बलिमार्ऽचिता काली तज्जलानि
क्षिप्तानि वै शिवलिङ्गं गतानि ॥३०॥

चान्द्रायणैरुपवासादिनियमै
र्दुग्धं जलं तेन विभिन्नमन्नम् ।
विहाय कृत्यं विहितं यदर्थं
तस्याशयाऽभून्न मनः प्रसन्नम् ॥३१॥

दानैर्द्विजास्तेन न पूजिताः किं
कस्मै धनं गौः पृथिवी च दत्ता ।
भवनं गृहं मन्दिरमपि च कस्मै
पदवी च कस्मै च पदेन सत्ता ॥३२॥

दैवज्ञमेकं च ततो नृपेण
प्रदर्शितो निजकमलाभहस्तः ।
दैवज्ञः—सन्ततिमुखं द्रक्ष्यस्येकदा त्वं
भवेर्न राजन् ! चिन्तया ग्रस्तः ॥३३॥

यदृतुं गता स्यात्पत्नी विवाहात्
संवत्सराणां दशकात्तु पश्चात् ।
भोगप्रदैः स्वैर्विविधैर्विलासै—
स्त्वं तां मुदा प्रतिगच्छेस्तदानीम् ॥३४॥

प्रकृतिरियं यत्सा रजस्वला
प्रकृतिगता स्यात् पत्नी देवी ।
तदा प्रसन्नः सन् त्वं तस्याः
प्रेमी भवेस्तु सरसः सेवी ॥३५॥
यदि पूरयिष्यसि तद्दोहदान् त्वं
सा पूर्णकामा मोमुद्यमाना ।
तं धारयिष्यति गर्भं त्वदीयं
येनेह सा स्यात् सन्तितिप्रधाना ॥३६॥
सा सन्ततिस्ते वैदुष्ययुक्ता
भविता स्वकीर्त्या च जगत्प्रसिद्धा ।
विवाहिता मूर्खेणेह पत्नी
कवेः प्रिया कवयित्री समृद्धा ॥३७॥

काशिराजः—किं सा प्रभविता पुत्री विपश्चिन् !
दैवज्ञः— राजन् ! भविष्यति सा रत्नमेव ।
येन त्वदीयं नृप ! नामधेयम्
भविताऽमरं तत्सर्वं सदेव ॥३८॥

कविः—एतन्निशम्याऽमरवाक्यमिव तत् सोऽभूत्प्रसन्नः काशीधरेशः।
धनादिकं तस्मै सम्प्रदाय प्रविवेश महिषीहर्म्यं नरेशः ॥३९॥
दैवज्ञोक्तं नृपो राज्ञीमुवाच स्वां मनोरमाम् ।
सन्तति प्रार्थयामास सापि गत्वेशमन्दिरम् ॥४०॥

उत्तरभारत एटाजनपद-सोरोंनगरनिवासी
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान् ।
बाणानलखात्माङ्कित (२०३५ वि०सं०) वर्षे रामकिशोर मिश्र इह
विद्योत्तमाकालिदासीये प्रथमसर्ग इति कृतवान ॥४१॥

०:—:—०

विद्योत्तमा--कालिदासीयम् ।

द्वितीयः सर्गः (विद्योत्तमाया जन्म) ।

कविः—तस्मिन्नृतुकाले समागते
राजा राज्ञीं समाययौ सः ।
पृष्टा सा सस्मिता गृहीता
शयनं तेन विनीता नीता ॥१॥

काशिराजः—ऋतुं गतासि प्रिये ! शारदे !
पूरय मम कामं कामं तम् ।
यद्ध्यपत्यधनवत्सु जनेषु
विमान्योऽपि मान्योऽपि भवेयम् ॥२॥

राज्ञीशारदा—भोग्यो नायं कालः, कालः
सूर्यातपेन मनसः शान्तेः ।
कार्योऽभोग्यो भोग्यः समयो
येन भवेयं प्रकामकामा ॥३॥

अधुना वनविहारमिच्छति मे
मनो मां नय गङ्गातीरम् ।
समीहते मे यत्र शरीरं
समालिङ्गितुं शीतसमीरम् ॥४॥

तत्र लतामण्डपेऽपि कस्मिन्
शीतच्छाये पुष्पितशयने ।
सकाममाह्लादय निजकाम—
माद्रियमाणः प्रिय ! मम कामम् ॥५॥

कविः—इत्थं भोगविलासं राजा
राज्ञीकामानुसारमकरोत् ।
क्वापि वने गृहवाप्यां क्वापि
याने तथा विमाने क्वापि ॥६॥

कदापि दूरे पर्वतमध्ये
कान्तारे वा रथेन गत्वा
राज्ञी कामकेलितृप्ता सा
निश्चितसमये वभार गर्भम् ॥७॥

ततो दोहदा विविधास्तस्या—
स्तीव्रा मनसि हर्षदा जाताः ।
येषां पूर्तिविधाने राज्ञः
सेवकगणास्तत इतो याताः ॥८॥

ग्रीष्मेऽप्युष्णं शीते शीतं
वाञ्छति स्म सा रसं निपातुम् ।
कदापि लवणान्नं मिष्टान्नं
पयः पायसं वा हि विहातुम् ॥९॥

मन्दिरमच्युतस्य गङ्गायाः
शिवस्य हनुमतश्च वा गन्तुम् ।
कदा सङ्गमं प्राप्य प्रयागे
मध्येगङ्गायमुनं रन्तुम् ॥१०॥

द्वितीयः सर्गः

यदा कदाचिद् यद्यत्पीतं
रसादिकं भक्षितमन्नं वा ।
वमितवती सा तदाऽभून्मनो
राज्ञो म्लानं तद्भिन्नं वा ॥११॥

चिकित्सकानामेतद् वचन
गर्भवतीनारीप्रकृतिः सा ।
कोऽपि नास्ति रोगस्तन्नो द्वौ
मनसा हर्षितवन्तौ किन्तौ ? ॥१२॥

पुंसवनं कृत्वा सीमन्तो—
न्नयनेऽप्यनेकशस्तान् विप्रान् ।
द्विजातीन् स साधून् निजबन्धून्
नृपोऽभोजयल्लोकानन्यान् ॥१३॥

कोऽपि पूरिकां मोदकमन्यो
माषगर्भिकामितरः शाकम् ।
तत्तत्परिसेवकानयाचत
दधि संयावं मुखेन साकम् ॥१४॥

महिलाः सुन्दर्यो गौर्यो वा
श्यामा वालंकृताः सुरूपाः ।
गीतमगायन् सलयं ध्वनिना
वाणीवदनैर्देवीरूपाः ॥१५॥

गीतम—

राज्ञी जनयिष्यति सुतमेकम् ।

(१)

जनताप्रपालकः स तु भविता
निजाऽन्वयस्य भविष्यति सविता
स च सुकवीनां सुन्दरकविता
प्रजा करिष्यते तदभिषेकम्
राज्ञी जनयिष्यति सुतमेकम ॥१६॥

(२)

राजाशाः पूर्णा भवितारः
सेवकजना मुदं गन्तारः
जनाः प्रभावान् प्रजनयितारः
लोकः कर्ता सुखातिरेकम् ।
राज्ञी जनयिष्यति सुतमेकम् ॥१७॥

(३)

पितरः समेष्यन्ति सन्तोषम्,
दूरीकरिष्यन्ति ते दोषम्,
माता त्यक्ष्यति सन्ततिदोषम्,
पिता करिष्यति हर्षमनेकम्
राज्ञी जनयिष्यति सुतमेकम् ॥१८॥

कोऽपि बुधो राज्ञ्या गतिमन्यः
प्राज्ञः पश्यति करगतरेखाः ।
काचिन्महिलाऽप्युदरलक्षणम्
अन्या जन्मपत्रिकालेखाः ॥१९॥

परस्परं वार्ता भवति स्म
कन्या जन्मलक्षणं मन्ये ।
भविता पुत्रजन्म मे वाणीं
सत्यां विद्धि त्वकथयन्नन्ये ॥२०॥

तदनन्तरं सुनिश्चितसमये
ब्राह्ममुहूर्ते शुभे रविदिने ।
राज्ञः पत्नी च शारदा सा
प्रसववेदनाप्रपीडिताऽभूत् ॥२१॥

राज्ञाऽऽदिष्टा जननसहाया
महिला नैकास्तां परितस्थुः ।
तासां परिचर्यया प्रसन्ना
राज्ञी कन्यारत्नं सुषुवे ॥२२॥

राज्ञा श्रुतं सुताया जन्म
मनस्तस्य मुमुदे त्वत्यन्तम् ।
परन्तु राज्ञ्याः पुत्राभावाद्
मनो गतं तत्प्रीतेरन्तम् ॥२३॥

नृपोऽबोधयत्तां—'प्रिये ! श्रृणु
पुत्रीपुत्रौ द्वावपि तुल्यौ ।
शोच न मनः प्रसादय तस्मा—
दिमावेकजननस्थानीयौ ॥२४॥

अतः कुरुत मङ्गलानि गायत
वाद्यसहितगीतानि परिजनाः ।
पुत्रीजननं पुत्रजननमिव
सम्मानयत च फुल्लितवदनाः ॥२५॥

इत्यादेशं प्राप्य सेवकाः
जनाः परिजनाः प्रजातहर्षाः ।
गातुं वादयितुं च प्रवृत्ताः
नर्तितुमारेभिरे दिशि दिशि ॥२६॥

गीतम्—

चिरंजीव मे राजदारिके !

(१)

त्वमेव राज्ञः पुत्ररत्नमसि ।
तस्य मनः कामनापुष्पमसि ॥
प्रसादसीमा त्वमसि जनन्याः ।
प्रसीद लोके राजतारिके ।
चिरंजीव मे राजदारिके ! ॥२७॥

(२)

त्वद् भविता कश्चन परिवारः ।
यदा भविष्यति कामविकारः ॥
त्वमस्य जगतः प्रकृतिर्मूला ।
मा रोदीः, कल्याणकारिके !
चिरंजीव मे राजदारिके ! ॥२८॥

(३)

त्वदागमनतो लोके लोकः ।
मोहं गतोऽभवद् गतशोकः ॥
त्वया सरति मोहं संसारः ।
मोहं सारय मोहसारिके !
चिरंजीव मे राजदारिके ! ॥२९॥

इत्थं वर्धापनादिसहितम्
गेहे गेहे गीतं गीतम् ।
मिष्टान्नादिवितरणैः राज्ञा
दुहितुर्जन्मोत्सवोऽलंकृतः ॥३०॥

तिथावेकादश्यां जननसमयात्पण्डितजनः
प्रगत्य प्रासादं कृतसकलदेवार्चनविधिः ।
ग्रहान् रेखा लग्नं समयमवलोक्याऽत्र कृतवान्
सुतासंज्ञां विद्याप्रकृतिरितिविद्योत्तमपदाम् ॥३१॥

नृपोऽपृच्छद् विज्ञं दुहितृविषयं, तं कथितवान्
सुतेयं वैदुष्यं नरप ! परमं प्राप्स्यति श्रृणु ।
न कोऽपीमां विद्वानलमिह विजेतुं हि भविता,
भुवि स्यात् ख्यातेयं परमविदुषी पण्डितवरा ॥३२॥

विद्योत्तमा राजसुता ततः सा
मातुः पितुः स्नेहमवाप्य नित्यम् ।
शनैः शनैश्चन्द्रविभासमाना
दिने दिने वृद्धिमुपागताऽऽसीत् ॥३३॥

सा पाणिपादेन ततः स्वहर्म्ये
वस्तुग्रहार्थं चलितुं प्रवृत्ता ।
पित्रोश्च धात्र्याः परिसेवकाना—
मङ्कान् च गत्वा परिवर्धतेस्म ॥३४॥

दुग्धं कदानीं सलिलं कदाचि—
न्निधाय पात्रे पिबति स्म बाला ।
कदापि मातापितरौ करेण
तत्तच्च सा पाययति स्म शिष्टम् ॥३५॥

यद्यच्च दृष्टं पतितं धरायां
तत्तद्गृहीत्वा स्वमुखेऽकरोत्सा ।
प्रधाव्य तस्याः पितरौ तदानीं
निस्सार्य तन्निक्षिपतः स्म वक्त्रात् ॥३६॥

काकोऽग्रहीत्तत्करवस्तुयत्त—
दुच्चैररोदीन्नृपपुत्रिका सा ।
तदा तदीया जननी तु शीघ्रं
प्रासादयत्तां किमपि प्रदाय ॥३७॥

दृष्ट्वा प्रसुप्तां जननीं कदानीं
गत्वा च साऽजागरयत्ततस्ताम् ।
तस्याः स्वहस्तेन निगृह्य वेणीं
क्षिप्त्वा कपोले हसति स्म विद्या ॥३८॥

अये विद्ये देवि ! त्वमिह कुरुषे किं कथय माम्
करे कृत्वा वेणीं किमपि जननीं जागरयसि ?
सुते ! एहि क्रोडं विलसय ममाऽलंकुरु दृशम्
सरन्ती सा बाला पितरमुपयाताऽनुवचनम् ॥३९॥

इदं किन्ते रूपं मलिनमपि वस्त्रं तव कथम् ?
न किं स्नाताऽसि त्वं ? स्वदुहितरमङ्के स कृतवान् ।
इमां स्नानात्पश्चान्नय सह सभामङ्कनिहिताम्
निजाङ्के माता तां झटिति पितुरङ्कात्कृतवती ॥४०॥

महानसं सा तु कदापि गत्वा
लेढिस्म बाला लवणं प्रसन्ना ।
पुनर्यदाऽऽस्ये मरिचं चकार
तदैव सोच्चैर्बहु रोदिति स्म ॥४१॥

'गृहाण, हस्ते मम मोदकोऽयम्
आगच्छ वत्से ! मम पार्श्वमेहि ।
श्रुत्वा पितुस्तद्वचनेन गत्वा
प्रगृह्यते सा परिमोदते स्म ॥४२॥

सा पायसं वै पिबति स्म नित्यं
कदापि संयावमखादति स्म ।
दघ्ना यवागूं मधुना पयस्यं
द्राक्षाः फलान्याश बहूनि बाला ॥४३॥

स्कन्धे च तां स्थापयति स्म कोऽपि
स्नेहादगृह्णादपरो निजाङ्के ।
अन्यश्च तां हासयति स्म वाण्या
तां प्रीणयन्तिस्म महीपभृत्याः ॥४४॥

कदापि पित्रा सह सा च मात्रा
सार्धं कदाचित्सह मातुलेन ।
पितुर्जनन्या च समं रथेन
द्रष्टुं प्रयाति स्म वनानि बाला ॥४५॥

यस्याऽऽग्रहं सा कुरुते स्म, तस्या
माता पिता तं कुरुतः स्म पूर्णम् ।
पेपीयते स्मोदकमिच्छया सा
क्षीरस्यति स्माऽऽशु कदापि कन्या ॥४६॥

जङ्गम्यते द्रष्टुमियं पशूंस्तान्
जीवालये ये स्थितिवन्त आसन् ।
गावो गजा उष्ट्रतरक्षवोऽश्वाः
सिंहा वृकास्तेषु मृगाश्च मुख्याः ॥४७॥

विद्योतमाकालिदासीयम्

द्वितीय सर्गः

तदाऽऽग्रहात्तित्तिरयः कोपाता—
स्तथा मयूराः शुकसारिकाश्च ।
प्रपालिता भूपतिना स्वगेहे
सुताप्रसादाय सुपिञ्जरेषु ॥४८॥

तैः पालितैः पक्षिवरैः समं सा
क्रीडाः करोति स्म यथेच्छमेभिः ।
अन्नं करेणाऽऽदयति स्म बाला
तेषां च वाणीमपि शिक्षते स्म ॥४९॥

इत्थं बालक्रीडां कुर्वंती सा विद्योत्तमा कन्या ।
स्वच्छन्दं शैशवस्य पञ्च वसन्तान् यापयामास ॥५०॥

यस्मिन् शूकरक्षेत्रे जातः कविवरतुलसीदासः,
आत्मरामहुलसीतनयो यस्तत्पुरवासी धीमान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
विद्योत्तमाकालिदासीये द्वितीयसर्गंकृतवान् ॥५१॥

०।—।—०

विद्योत्तमाकालिदासायम्

तृतीय सर्गः !

(विद्योत्तमायाः प्रतिज्ञा तद्विवाहविषये च पितुश्चिन्ता)

कविः—

राजा स शारदानन्दो विद्योत्तमां सुतां गृहे ।
शास्त्राण्यध्यापयितुं वै प्राध्यापकान्नियुक्तवान् ।।१।।
पट्टिकापूजनं तेषु कृतवानेकपण्डितः ।
येनाऽक्षरसमाम्नायो विज्ञातो मूलतस्तया ।।२।।
व्याकरणं च केनापि साहित्यं संस्कृतगिरः ।
तदध्यापितमन्येन शब्दकोषपुरस्सरम् ।।३।।
नीत्यादिशास्त्रमेकेन पण्डितेन प्रशिक्षितस् ।
वर्धितावस्थया साकं तस्या ज्ञानमवर्धत ।४।।
कामशास्त्रस्य शिक्षापि विदुष्या वामयैकया ।
दत्ता तस्यै कौशलेन नृत्यशिक्षापि चोत्तमा ।।५।।
पश्चात् शोडशवर्षीया वैदुष्यं प्राप्य चाऽधिकम् ।
सा प्रसिद्धिं गता ज्ञाने काश्यां तु सर्वतस्तदा ।।६।।
राज्ञश्चिन्ताभवत्तस्या विवाहं कर्तुमिच्छया ।
विज्ञापिता सखीभिः सा प्रतिज्ञामकरोदिमाम् ।।७।।

विद्योत्तमा—

शास्त्रार्थेन विपश्चिद् यो जेष्यति मां स्वमेधया ।
तेन सार्धं करिष्येऽहं विवाहं, सङ्गमं, रहः ।।८।।

कविः—

प्रतिज्ञां तां च विज्ञाय राजा हर्षमुपागतः ।
तदर्थं डिण्डिमघोषं राज्ये काश्यामकारयत् ॥९॥
षोडशवर्षदेशीयां सुन्दरीं राजदारिकाम् ।
नवयौवनसम्पन्नां विदुषीं कामरूपिणीम् ॥१०॥
तां विवाहयितुं पुत्रीं तया कृतप्रतिज्ञया ।
राज्ञा काशीनरेशेन शास्त्रार्थयोजना कृता ॥११॥

राजादेशः –

विजेता तत्र यस्तां स पत्नीरूपेण लप्स्यते ।
पराजितो बुधस्तस्या आदेशं पालयिष्यति । १२॥
इच्छुको हि जनो विद्वान् सभां गच्छेत् स्वकामनाम् ।
शास्त्रार्थमन्त्रिणः पार्श्वे शास्त्रार्थाय स सूचयेत् ॥१३॥
इत्थमुद्घोषमाकर्ण्य प्राप्तुं पत्नीं नृपसुताम् ।
बहवस्तत्र विद्वांसः शास्त्रार्थं कर्तुमुद्यताः ॥१४॥
केचित्तु स्नातकास्तेषु वयस्कास्तरुणाः परे ।
युवानोऽन्येऽपरे प्रौढा अर्धवृद्धास्तु केचन ॥१५॥
आचार्यास्तत्र केऽप्यासन्नुपाध्यायाश्च पाठकाः ।
द्विवेदिनः परे मिश्रा वेदपाठित्रिवेदिनः ॥१६॥
चतुर्वेदिवराः केचित् कवयो गद्यलेखकाः ।
नृत्यगानकलादक्षा इतरे वाद्यनायकाः ॥१७॥
अर्थनीतिप्रवीणाश्च केचन कामशास्त्रिणः ।
प्राध्यापकाश्च केऽप्यन्ये सर्वे कामेन मोहिताः ॥१८॥
विद्योत्तमां च ते सर्वे शास्त्रार्थेन पराभवम् ।
नीत्वा पत्नीस्वरूपेण द्रष्टुमारेभिरे ततः ॥१९॥

शास्त्रार्थाच्च पराजेतुं सफलोऽभून्न कोऽपिताम् ।
तद्दासत्वं गताः सर्वे क्रमशस्ते पराजिता ॥२०॥
देशे नानाप्रदेशेषु तस्याः ख्यातिरजायत ।
विद्योत्तमाऽस्ति विदुषी काशिराजात्मजापरा ॥२१॥
कोऽपि नास्ति महाविद्वान् पराजयेत यो हि ताम् ।
विद्वच्चित्तेषु नितरामेषा चिन्ता व्यवर्धत ॥२२॥
भारतस्य महाविद्वान् भैरवनाथनामकः ।
विद्वद्भिः प्ररितस्तत्र शास्त्रार्थाय सभां गतः ॥२३॥
पञ्चाशद्वर्षप्राप्तोऽपि प्रतिज्ञया स मोहितः ।
तामष्टादशवर्षीयां पत्नीं कर्तुं समैहत ॥२४॥
सभां गतो हि राज्ञा स सम्मानितोऽधिकं ततः ।
'भगवन् ! ज्ञातुमिच्छामि तवागमनकारणम् ॥२५॥

भैरवनाथः—

विद्वांसो बहवो राजन् ! तव पुत्र्याः पराजिताः ।
किमेषा पतिहीना स्यादपूर्णया प्रतिज्ञया ॥२६॥
युवा प्रौढश्च वृद्धो वा नार्याः कोऽपि पतिर्भवेत् ।
पतिं विना स्त्रियो लोके मानं न कुरुते जनः ॥२७॥
संभविता पतिः कोऽपि तव पुत्र्याः प्रतिज्ञया ।
अतोऽहं कर्तुमिच्छामि शास्त्रार्थमनया सह ॥२८॥

कविः—

तद्वचःश्रवणं कृत्वा राजा चिन्तां समाश्रयत् ।
प्रतिज्ञयाऽस्य वृद्धस्य पत्नी पुत्री भविष्यति ॥२९॥
ततः क्षणं विरम्येदं राजा मन्त्रिणमब्रवीत् ।
घोषयाऽनेन साकं तु श्वः शास्त्रार्थो भविष्यति ॥३०॥
घोषणया प्रसन्नः स बुधो गुरुकुलं गतः ।
तच्छास्त्रार्थव्यवस्थायै राज्ञा सभा विसर्जिता ॥३१॥

चिन्ताकुलः समं पुत्र्या राजा प्रासादमाययौ ।
भोजनान्ते सुताकक्षं गत्वा स इत्थमब्रवीत् ।।३२।।

काशिराजः शारदानन्दः—

सुते ! प्रतिज्ञा विहिता त्वया कथम् ?
इदं त्वदीयं नवयौवनं वयः,
तत्त्वादृशस्ते तरुणः पतिर्भवेत् ।
वृद्धेन शास्त्रार्थः श्वो भविष्यति,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ।।३३।

विद्योत्तमा—

पितस्त्वया चिन्ता नो विधेया ।
ज्ञानेन मे कीर्ति र्मे भविष्यति,
यशो मया जीवनमेव मन्यते ।
पत्या हि मे विदुषा तात ! भाव्यम्,
पितस्त्वया चिन्ता नो विधेया ।।३४।।

काशिराजः

विवेकमपि लब्धुं पाठितासि,
शास्त्रार्थमिह कर्तुं नो बुधैः सह ।
नारी नरं योग्यवरं च गच्छेत्,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ? ।।३५।।

विद्योत्तमा –

शास्त्रार्थविधिना योग्यो नरः सः,
संप्राप्स्यते, यो भविता हि विद्वान् ।
स मे पतिर्जामाता तव स्यात्,
पितस्त्वया चिन्ता नो विधेया ।।३६।।

विद्योत्तमाकालिदासीयम् !

काशिराजः—

चिन्तामदीया, तव यौवनं नवम्,
कस्यापि वृद्धस्य भवेन्न करगतम् ।
स च तव वरो यो दशया समो भवेत्,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥३७॥

विद्योत्तमा—

भाग्यं हि मे यादृगमत्र भविता,
प्राप्स्यामि तादृशपतिमिह न संशयः ।
न तत्र भविता परिवर्तनं किमपि,
पितस्त्वया चिन्ता नो विधेया ॥३८॥

काशिराजः—

तरुणेन तरुणी वृद्ध न वृद्धा,
प्रौढेन प्रौढा बालेन बाला ।
वयस्कपत्या पत्नी सुशोभते,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥३९॥

विद्योत्तमा—

विद्यागताऽहं विदुषी हि कथ्ये,
अतः पतिर्विद्वानपि मयेष्यते ।
वयः किमपि वैदुष्ये न दृश्यते,
पितस्त्वया चिन्ता नो विधेया ॥४०॥

काशिराजः—

चित्ते पितुस्तावद् ह्यस्ति चिन्ता,
यावन्न पतिगेहं याति पुत्री ।
प्राप्यः परन्त्वनुरूपः पतिस्त्वया,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥४१॥

विद्योत्तमा—

योग्यं पतिं लप्स्ये स्वानुरूपम्,
यत्राऽस्ति योगस्तमहं ग्रहीष्ये ।
लभते जनः फलमनुकर्म लोके,
पितस्त्वया चिन्ता नो विधेया ॥४२॥

काशिराजः—

इच्छाम्यहं त्वां तरुणः पतिं मिलेत्,
पराजितास्ते बहवस्तरुणबुधाः ।
न कोऽपि काश्यां तादृग् विलोक्यते'
सुते ! प्रतिज्ञा विहिता त्वया कथम् ॥४३॥

विद्योत्तमा—

मैवं वदे बुंधशून्या न पृथ्वी,
कस्याऽप्यनूढा पुत्री न भवति ।
स्यादेव पत्नीतस्तत्पति महान्,
पितस्त्वया चिन्ता नो विधेया ॥४४॥

काशिराजः—

किमन्यदेशानपि प्रेषयेयम्,
तव प्रतिज्ञायाः सूचनामहम् ।
वाञ्छाम्यहं तव वासं स्वमेहे,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥४५॥

विद्योत्तमा—

कन्या पितु र्नास्ति धनं, परस्य
धनी स्वगेहं नयते धनं तत् ।
अतो मनोमोहव्यथा विहेया,
पितस्त्वया चिन्ता नो विधेया ॥४६॥

काशिराजः—

कथनं त्वदीयं चिरसत्यमेव,
परन्तु मे पुत्रः कोऽपि नास्ति ।
जामातरं त्वयि वासयितुमीहे,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥४७॥

विद्योत्तमा –

तत्तस्य वासे बाधा न कापि,
धनी स भविता मत्तस्तवापि ।
विद्वत्तया मां कोऽपीह जेता,
पितस्त्वया चिन्ता नो विधेया ॥४८॥

काशिराजः—

किमीहसे वृद्धं वा युवानम् ?
वयोऽनुरूपं नेच्छसि पतिं किम् ?
युवा पतिः पारयतीह जीवनम्,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ॥४९॥

विद्योत्तमाः—

युवतीह का ? या नेच्छति युवानम् ।
प्रतिज्ञया विद्वासं समीहे ।
समयेऽनुरूपं पतिमेव लप्स्ये,
पितस्त्वया चिन्ता नो विधेया ॥५०॥

काशिराजः—

वृद्धात्पराजयसे श्वस्तदा भवेत्,
तदवस्थया तव बह्वन्तरं खलु ।
तच्छूलमिव मे हृदयं विभेत्ता,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?॥५१॥

विद्योत्तमा — तादृग्भवति चेत्तन्मूर्खपत्युः,
अपेक्षया वृद्धः स तु पतिर्वरम् ।
नहि भाग्यरेखा परिवर्तते क्वचित्,
पितस्त्वया चिन्ता नो विधेया ।।५२।।

काशिराजः— श्रमेण रेखा परिवर्त्यते सा,
त्वमधीत्य तमतो हि पराजयेथाः ।
प्रणं परित्यज्य श्रयेः स्वयंवरम्,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ।।५३।।

विद्योत्तमा—पराभविष्यामि तवाऽऽशिषा तम्,
पूर्णा त्वदिच्छापि प्रतिज्ञया स्यात् ।
गच्छेः स्वकक्ष स्वप्याः,शयेऽहम्
पितस्त्वया चिन्ता नो विधेया ।।५४।।

कांशिराजः—गच्छामिवत्से ! प्रियपुत्रिके ! शये
हितं त्वया वचनं मेऽवधेयम् ।
अवधानकृद् दुःख्यति नैव लोकः,
सुते ! प्रतिज्ञा विहिता त्वया कथम् ?।।५५।।

कविः – इत्थं पिता सुतामुक्त्वा स्वशय्याभवनं ययौ ।
विद्योत्तमापि तद्वाचः कुर्वती हृदि निद्रिता ।।५६।।

भ्राता फुल्लसहायमिश्र आ ! शरशर निधिचन्द्राब्दे (१९५५ई०)
बालवीरमष्टोक्तिशतकमपि कर्तुं यं प्रेरितवान् ।
स साहित्य-व्याकरणाचार्यो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीये तृतीयसर्गं कृतवान् ।।५७।।

•—:—०

विद्योत्तमा-कालिदासीयम्

चतुर्थः सर्गः (शास्त्रार्थः)

कविः—

काशिराजः स मध्याह्ने विदुष्या सुतया सह ।
रथेन शारदानन्दः सभाभवनमाययौ ॥१॥
नृपोऽब्रवीत् शास्त्रार्थ मन्त्रिणं,
राजपुत्रिका प्रतिज्ञया सह ।
विद्योत्तमाभैरवनाथयो
रुद्घोषय संसदि शास्त्रार्थम् ॥२॥

शास्त्रार्थमन्त्री—

शृणुत प्रियप्रजाः ! सभ्या लोकाः !
पण्डिताश्च महिला अपिविज्ञाः !
जानन्त्येव भवन्तः सर्वे,
राजपुत्रिकाकृतां प्रतिज्ञाम् ॥३॥
विद्योत्तमा तेन सह विदुषा,
करिष्यते वैवाहिक योगम् ।
यो जेष्यति शास्त्रार्थे स्वीयै—
स्तर्कयुक्तिपूर्णैर्वचनैस्ताम् ॥४॥
पालयिष्यति बुधः पराजितो,
राजपुत्रिकाया आदेशम् ।
सेविस्यते दास इव यस्तां,
भृत्यसमः कार्यं करिष्यति ॥५॥

बुधैर्विवादं सह कुर्वत्याः,
वर्षद्वयं व्यतीतं तस्याः ।
परमद्यापि न कोऽपि विपश्चि—
दिच्छापूर्तिमकार्षीदस्याः ॥६॥

अद्य समायातो यो विद्वान्,
देशप्रसिद्धो भैरवनाथः ।
उपस्थिताया राजसुताया—
स्तेन समं शास्त्रार्थो भविता ॥७॥

राजसुते ! भैरवनाथोऽयं,
ख्यातो वैयाकरणा विद्वान् ।
आसनोपविष्टोऽस्त्यनेन सह,
शास्त्रार्थं ह्यारभतां भवती ॥८॥

विद्योत्तमा— अस्तिकर्म प्रमुखं भाग्यं वा
जनजीवने कथय मां विद्वन् !

भैरवनाथः— भाग्यं सर्वोत्कृष्टमस्ति भोः !
राजपुत्रि ! वद, मन्यसे न वा ?॥९॥

विद्योत्तमा—भाग्यं कथं ? कर्मप्राधान्यम्,
मन्ये, तत्त्वं मन्यसे न किम् ?

भैरवनाथः—मन्ये न तत् कृते कर्मण्यपि
कदाचिन्न सिद्ध्यति यदभीष्टम् ॥१०॥

यथा रामराज्याभिषेकमिह,
नृपो दशरथः कर्तुमिष्टवान् ।
गुरुवसिष्ठकृतलग्ने पतिता,
राजकृतायोजने च बाधा ॥११॥

दशरथस्य प्रियपुत्रो रामो,
जगाम वनमेतत्तद्भाग्यम् ।
प्रबलं भाग्यचक्रमयि विदुषि !
परिवर्तयति क्षणे जनदशाम् ॥१२॥

भाग्यमतः कर्मणोऽपेक्षया
मान्यं त्वया, मन्यसे कथय ।

विद्योत्तमा—नो पण्डित ! भाग्यं प्रमुखं नो ।
भवति कर्म प्रमुखं हि जीवने ॥१३॥

भैरवनाथः—कथय कथं प्रमुखं तद् भद्रे !

विद्योत्तमा—शृणु पण्डित ! तदहं कथयामि ।
सीतां परिणेतुं राजानो,
गता अनेके मिथिलानगरीम् ॥१४॥

येन कर्म विहितं हि तेन सा,
विवाहिता नीता च ततः किल ।
धनुर्भङ्गलीलैव कर्मणः,
प्रधानताया उदाहरणमिह ॥१५॥

यदि भाग्यं रामस्य कस्यचि—
न्नृपतेर्वा बलवद् ह्यभविष्यत् ।
धनुर्भङ्गमन्तरेण सीतां,
पर्यणेष्यत्तत्तां कोऽपि हि ॥१६॥

श्रीमन् ! तन्न धनुर्यदि रामः,
सीतास्वयंवरेऽभिन्दिष्यत् ।
तत्स पर्यणेस्यत् किं सीतां ?
लीलेयं कर्मणो न वा वद ॥१७॥

भैरवनाथ—आमेषा कर्मणस्तु लीला,
प्रबलमभूत्तु सत्यवाद्ग्यम् ।
येनाऽकृतयत्नेन सती सा,
सम्प्राप्ता सावित्री रमणी ॥१८॥

विद्योत्तमा—नहि तत्रापि भाग्यबलवत्ता,
प्राधान्यं कर्मणः समभवत् ।
तत्र कर्म विहितं सावित्र्या,
ययाऽन्वेषितः सत्यवान् पतिः ॥१९॥
प्राधान्यं कर्मणो जीवने,
निरन्तरं प्रभवति शृणु श्रीमन् !
प्रजायते भाग्यं तु कर्मणा,
तद् भाग्यं प्रमुखत्वं नार्हति ॥२०॥
वदतु भवानागतः किमर्थम् ?

भैरवनाथः—शास्त्रार्थं कर्तुं त्वयैव सह ।

विद्योत्तमा—शास्त्रार्थः कर्मणो हि विषयः,
येन विना मत्प्राप्तिरभाव्या ॥२१॥
भवानत्र कर्मेव विधातुं,
समागतोऽस्ति वदतु विद्वन्न ?
यदि भाग्यं मन्यते भवांस्तद्,
भवदागमनकारणं किमिह ?॥२२॥
शास्त्रार्थं कृत्वा श्रीमन्तः,
मामवाप्तुमिच्छन्ति भवन्तः ।
भवतां कर्मणि विश्वासोऽयं,
प्रसीदामि तं ज्ञात्वा सन्तः !॥२३॥

अतो भाग्यवादी नासि त्वं,
त्वामिह कर्मवादिनं मन्ये ।
कर्मवादिना प्राप्तव्याऽहं,
कथय, युक्तियुक्तं न वदामि ?॥२४॥

भैरवनाथः—
यत्किञ्चिद् भवती समकथयत्,
तत्सर्वं सत्यं कथयामि ।
कोऽपि न भवतीं कर्मणा विना,
प्राप्तुमलं, तव जयं वदामि ॥२५॥
भवती विदुषी वस्तुतः शुभे ।
युक्तिपूरणं तत्ते वचनम्

विद्योत्तमा—अन्यत्प्रष्टुमनाः किं विद्वन् !

भैरवनाथः—किमपि न, मन्ये निजपराजयम् ॥२६॥

विद्योत्तमा—तत्सेवाकार्याय भवन्तः,
समुद्यताः सन्ति श्रीमन्तः !

भैरवनाथः—उद्यतोऽस्मि परमेतत्कथये,
मार्गोऽयं त्याज्यस्त्वया शुभे !॥२७॥

विद्योत्तमा—अस्तु, विचारः करिष्यते सः,
मन्त्रिन् ! घोषय पराजितमिम् ।
पण्डितमेनं सेवाकक्षं,
नय सेवाप्रशिक्षणं देहि ॥२८॥

काशिराजः—मन्त्रिन् ! अस्य हि पराजयस्य,
देशे समुद्घोषणां कारय ।
लभतां विद्योत्तमा येन तां
मनःसिद्धिमिह जनकृतकीर्तिम् ॥२९॥

शास्त्रार्थमन्त्री मान्याः सभासदः ! शृण्वन्तु,
त्वद्यतने शास्त्रार्थे विद्वान् ।
पराजितः स तु भैरवनाथो,
विद्योत्तमा विजयिनी जाता ॥३०॥

सभासदः—विद्योत्तमा विजयते नितरां,
विद्योत्तमा विजयते नितराम् ।
इयं त्वपूर्वा न काऽपि भूता,
नहीदृशीह भाविनी विदुषी ॥३१॥

बुधा महान्तो येऽप्यासन् ते,
पराजिताः सर्वेऽपि, जितेयम् ।
अविवाहिता भविष्यति किमियं,
क इमां शास्त्रार्थेन विजेता ?॥३२॥

कविः- ततः प्रासरत्तस्याः कीर्तिः,
प्रथमं काश्यां ततश्च देशे ।
विद्योत्तमा जितबुधा विदुषी,
नाऽन्यो बुधस्तादृशः कोऽपि ॥३३॥

ततः सभायामभिनन्दिता सा,
पुरस्कृता सभ्यजनैर्गिरा सा ।
काशीजनानां जयघोषयुक्ता,
सभा महीपेन विसर्जिता सा ॥३४॥

यस्मिन् सोरों नगरे तुलसीदासगुरोर्हि नरहरेः,
जीर्णदशायामस्ति पाठशाला तन्नगरवासवान् ।
अन्तर्दाहप्रणेताऽऽचार्यो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीये चतुर्थ सर्गं कृतवान् ॥३५॥

विद्योत्तमा-कालिदासोयम्

पञ्चमः सर्गः

(पुत्रीविवाह विषये मातुश्चिन्ता)

कविः —

माता यदा जयघोषं शृणोति,
हृदये तदा हर्षं साऽभ्युपैति ।
मनस्तदीयं चिन्तां करोति,
पुत्रीविवाहो भविता न वेति ॥१॥
प्राज्ञो विवादाय समागतो या,
वाक्यैः सतर्कैः स पराजितोऽस्याः ।
उद्वाहचिन्ता मवलम्ब्य राज्ञी,
तामेकदा तज्जननी जगाद ॥२॥

राज्ञी शारदा—

कोऽप्यस्ति देशे नैतादृशोबुधो,
यस्तव मतं खण्डयितुं समर्थः ।
दर्शयितुमिच्छसि मां यदि विवाहं,
वत्से ! प्रतिज्ञामधुना त्यजेरिमाम् ॥३॥

विद्योत्तमा—

काले गते समैष्यति कोऽपि विद्वान्
सतर्कवाक्यै र्यो मां विजेष्यते ।
नेता स्वगेहं पाणिं गृहीत्वा,
भविता विवाहो मातस्त्यजेः शुचम् ॥४॥

राज्ञी कदा स कालो भविता सुते ! वद,
यदा वधूं त्वां द्रक्ष्याम्यलङ्कृताम् ।
समयः स मे नाशयिताऽत्रचिन्तां,
वत्से ! प्रतिज्ञामधुना त्यजेरिमाम् ॥५॥

विद्योत्तमा—भवती प्रसीदेल्लोके तु सुधियः,
पराजितास्तव दुहितुर्निदेशम् ।
सेवकसमानाः परिपालयन्ति,
भविता विवाहो मातस्त्यजेः शुचम् ॥६॥

राज्ञी - मान्याः प्रसिद्धाः परिपूजिता ये,
कृतास्त्वया दासास्ते मनीषिणः ।
कतमो वरस्तेषु तवाऽस्ति कथयेः,
वत्से ! प्रतिज्ञामधुना त्यजेरिमाम् ॥७॥

विद्योत्तमा– मातः ! किमन्वेषयसि त्वमेषु,
वरं मदीयं कथयसि निराशा ?
समये हि मेलिष्यति कोऽपि विद्वान्,
भविता विवाहो मातस्त्यजेः शुचम् ॥८॥

राज्ञी—पुत्रि ! त्वदीयं परिणेयमायु, —
र्व्यतति स्वसमयं व्यातयति यच्च ।
कथयामि त्वामेषु वरं लभस्व,
वत्से ! प्रतिज्ञामधुना त्यजेरिमाम् ॥९॥

विद्योत्तमा—प्रणो मया तव कथनादयं कृतः,
पुनरद्य तं त्यक्तुं किं कथयसि ?
शास्त्रार्थविधिनाऽस्मिन् पूर्णतां गते,
भविता विवाहो मातस्त्यजेः शुचम् ॥१०॥

राज्ञी— मया श्रुतं सुधियस्ते विरुद्धाः,
क्रुध्यन्ति तुभ्यं ज्ञानाय चेर्ष्यन्ति ।
कुर्युस्तवाऽनिष्टं ते न किञ्चित्,
वत्से ! प्रतिज्ञामधुनात्यजेरिमाम् ॥११॥

विद्योत्तमा—विदुषामियं प्रकृती रोषमेति,
पण्डितविरुद्धा भवतीति नित्यम् ।
विभेमि तस्या नाहं कदाचिद्,
भविता विवाहो मातस्त्यजेः शुचम् ॥१२॥

राज्ञी— हठं न कुर्या दयिते ! सुते ! मम,
प्रपाठिताऽऽसीस्त्वंयोग्यतायै ।
अविवाहिता स्याः किं शिक्षितापि,
वत्से ! प्रतिज्ञामधुना त्यजेरिमाम् ॥१३॥

विद्योत्तमा— मया प्रणः शिक्षितया कृतो य
स्तेन त्वदीया कीर्तिः प्रवृद्धा ।
लोके प्रसिद्धो विद्योत्तमायाः,
भविता विवाहो मातसत्यजेः शुचम् ॥१४॥

राज्ञी—विद्योत्तमा काशीनृपतनूजा,
विजित्य विबुधान् विदुषी प्रजाता ।
परं विवाहो भूतो न तस्या—
स्तस्मात्प्रतिज्ञामधुना त्यजेरिमाम् ॥१५॥

विद्योत्तमा—मैवं वदे र्मा भूस्त्वं निराशा,
विधेहि विश्वासं पश्य समयम् ।
वरे न मिलिते तु पराजितेषु,
कञ्चन वरिष्ये मातस्त्यजेः शुचम् ॥१६॥

कविः—दुहितु र्वचनात्समाश्वासिता,
जगाम हर्षं तस्या जननी ।
कोऽपि बुधस्तव कामं कुर्या –
दित्याशिषा प्रसीदिता च सा ॥१७॥

राजसमीपादेत्य सेवको,
राजदुहितरं संसूचितवान् ।
इतस्त्वष्टदिवसेभ्यः पश्चा—
त्त्वया पुनः शास्त्रार्थोभविता ॥१८॥

अतस्त्वां कथयति महाराजो,
यदावश्यकाध्ययनं कुर्याः ।
संभवतो दर्शनविषयस्य,
प्रश्ना भवितु ं शक्नुवन्ति ते ॥१९॥

विद्योत्तमा किमाचार्यशिवनाथसमीपात्
संसूचना समायातेयम् ॥

सेवकः – अहं न जाने, प्रेषितस्त्वहम्,
राज्ञा सूचयितु ं त्वां पुत्रि !॥२०॥

विद्योत्तमा गच्छ भद्र ! संसूचय पितरम्,
उद्यतास्मि शास्त्रार्थं कर्तुम् ।
येन केन विदुषा सार्धं वै,
यस्मिन् कस्मिन्नपि समये वा ॥२१॥

मातः ! दर्शनस्य वै विद्वान्,
शिवनाथोऽस्ति गुरुकुलाचार्यः ।
किमथ चिकीर्षति स हि शास्त्रार्थम्,
कोऽपि तस्य शिष्यो वा विद्वान् ॥२२॥

शिवनाथस्तु पश्चिमे वयसि,
मां युवतीं परिणेतुमिच्छति ।
नास्ति प्रणे कोऽपि प्रतिवन्धः,
शास्त्रार्थाय कश्चिदागच्छेत् ॥२३॥

राज्ञी—पुत्रि ! त्वामतस्तत्कथयेऽहं,
तरुणपतिं प्राप्तुं त्यजेः प्रणम् ।
प्रणानुसारमैति यदि वृद्धो,
जित्वा त्वां स पति र्भविष्यति ॥२४॥

प्रणन यद्यमिलति पतिर्युवा,
तत्किं वृद्धविवाहं कुर्याः ?
किं वृद्धेन सह गमनमपि ते,
रोचिष्यते ? तदहमीहे नो ॥२५॥

प्रथमं तव वैदुष्यप्रभावात्,
प्रणं कर्तुमहमवादिषं त्वाम् ।
येन त्वत्समः कोऽपि वरस्त्वां,
योग्यो विद्वानपि मिलेदिति ॥२६॥

तयाऽऽशया त्वां वरो न मिलितः,
परमभवत्तव यशसो लाभः ।
येन सर्वतः काशीं कीर्ति —
स्तव विद्वत्तायाः प्रसृताऽस्ति ॥२७॥

केवलया कीर्त्या तया च किम्,
यया लक्ष्यपूर्ति र्न जायते ।
अतः प्रणं त्यक्त्वा त्वमिच्छया,
बुधं वृणीष्व युवानं कञ्चन ॥२८॥

प्रणं विहाय विवाहं कर्तुं,
तव हितमधुनाऽहं पश्यामि ।
मातापितरौ हितं कथयत -
स्तदपत्येनाऽङ्गीकर्तव्यम् ।।२६।।

विद्योत्तमा—वृद्धिं गतं मदीयं नायु—
र्विवाहाय मातर्न विचारय ।
समये सर्वं सेत्स्यति, योग्यो
वरो मेलिता, नाऽत्र संशयः ।।३०।।

मा कार्षीर्मातस्त्वं चिन्ताम्,
उद्वाहः स्याद् यूना सार्धम् ।
कविः— इत्थं पुत्र्या मातू रात्रिः
संलापाद् याता साऽनिद्रम् ।।३१।।

एटा जनपदस्थिते शूकरक्षेत्रे सोरोंवासी,
स्वैः काव्यैर्हि काव्यकिरणावलिसङ्कलनं विरचितवान् ।
*निधिवाजिग्रहचन्द्र वत्सरे रामकिशोर मिश्र इह,
विद्योत्तमाकालिदासीये पञ्चमसर्गं कृतवान् ।।३२।।

---

*१९७९ तम ईशवीयाब्दे ।

विद्योत्तमा-कालिदासीयम्

षष्ठः सर्गः (प्रतारणयोजना)।

कविः— पराजितः स तु भैरवनाथो,
गुरुशिवनाथसमीपं गतवान्।
करबद्धः स पादयो र्न्यपतद्,
नमामि गुरुमिति वाचा कथयन् ॥१॥

शिवनाथः - अपि कुशलन्ते भैरव ! कथय,

भैरवनाथः— कुशलं क्वाऽस्ति ! कथयितुं लज्जे।

शिवनाथः— कथ लज्जसे किं भूतं ते ?
तपसि वर्धसे स्वाध्याये च ॥२॥

भैरवनाथः—अस्या व्रिद्योत्तमायास्तु वै,
पाण्डित्यैकशासने गुरुवर !
कुशलं क्वाऽस्ति पण्डितानामिह,
त्वन्येषां च मादृशामपि च ॥३॥

शिवनाथः—पराजितोऽसि किमिह तस्यास्त्वं,
सापि पण्डिता पण्डितपूज्या।
तस्याः कोऽप्यध्ययनविशेषः,
प्रश्नोत्तरविधिविशेषता वा ॥४॥

भैरवनाथः—तस्या वैदुष्यं समाद्रिये,
परं योऽस्ति तस्या व्यवहारः।
पराजितैर्विद्वद्भिः साकं
स निन्दनीयः सर्वैर्नित्यम् ॥५॥

शिवनाथः—ईदृशोऽस्ति कस्तद्व्यवहारः ?
शृणुयामहं तमपि कथयस्व ।
किं सा करोति दुर्व्यवहारं,
सा किं कथय बुधानपवदते ?॥६॥

भैरवनाथः—सा मन्यते पराजितान् बुधान्,
किङ्करतुल्यान् व्यवहरति च तान् ।
कमपि नियुङ्क्ते कक्षपालकं,
द्वारपालकं कमपि करोति ॥७॥

कोऽपीदृशस्तत्र नो विद्वान्,
यो न मन्यते तन्निर्देशम् ।
नियुक्तोऽस्ति जलपाने कश्चिद्,
भोजनपरिसेवने च कोऽपि ॥८॥

अग्रे किं कथयामि ? तया या,
महती विदुषां दुर्दशा कृता ।
तां पूर्णतः स्पष्टतो वक्तुं,
निर्लज्जोऽपि कथयितुं लज्जे ॥९॥

शिवनाथः—अस्तु कथय कस्मिन् कार्ये त्वम् ।
नियुक्तोऽसि काशीनृपपुत्र्या ?

भैरवनाथः— तया मन्दुरानिरीक्षकोऽहम्
कृतो येन तां शिरसा नौमि ॥१०॥

शिवनाथः—शास्त्रार्थे वाक्शक्तेर्विजय—
स्तत्र पराजेयस्त्वं नाऽऽसीः ।
रविरसि गिरि खद्योतसमा सा,
किमभूदस्मिन् पथि परमेतत् ॥११॥

भैरवनाथः— नैव ज्ञायते गुरुवर ! किमभूत् ?
भाग्यगतिः प्रबला तत्राऽऽसीत् ।
पराजितं मां सेवाकक्षम्
नयेति मन्त्रिणमादिदेश सा ॥१२॥

शिवनाथः—आः ! एष तु पण्डितापमानः,
क्रियते मयि भूतले सति तया ।
भोक्ष्यत्यस्य फलं सा भैरव !
मा चिन्तय पण्डितापमानम् ॥१३॥

भैरवनाथः—बुधापमानेनापि भवन्त—
श्चिन्तयन्ति यदि नो श्रीमन्तः !
तदियं तेषु शासनं नित्यं,
करिष्यते गुरुवर ! भो हन्त !॥१४॥

अतश्चिन्त्यतां कश्चिदुपायो,
येन भवेदपमानात्त्राणम् ।
प्रतीकर्तुमस्यास्तु विवाहो,
मूर्खजनेन केनचित्कार्यः ॥१५॥

कार्यस्याऽस्य योजनां कर्तुं,
भवानेव शक्तो गुरुवर्य !
तादृशमन्वेषयामि मूर्खं,
स एव भवता प्रशिक्षणीयः ॥१६॥

शिवनाथः—अस्तु गच्छ, तादृशजनमानय,
येन तवेष्टमहं करवाणि ।
इयं योजना चतुरः कर्णान्,
नोल्लङ्घ्य प्रसरेदिमामवेः ॥१७॥

षष्ठः सर्गः

कविः—ततः स भैरवनाथो वप्त्वा,
विद्योत्तमाविरुद्धं बीजम् ।
गतो गुरुकुलादन्वेषयितुम् ,
मूर्खमभीष्टमितस्ततो जनम् ॥१८॥
सोऽपश्यत्कश्चिद् युवा जनो,
वृक्षे यां विखण्डयति शाखाम् ।
तस्यामुपविष्टः स करोति,
कट् कट् कड्-इति कुठार शब्दान् ॥१९॥
भैरवनाथः—अये ? करोषि किमेतद् भद्र ।
मूर्खो युवा— तन्न लोकसे यदहं कुर्वे ।
भैरवनाथः— पश्यामि त्वां यामारूढ—
स्तां खण्डयसि मूलतः शाखाम् ॥२०॥

किं मूर्खोऽसि ! शाखया सार्धम्,
भूमाविच्छसि पतितुं वत्स !
मूर्खो युवा— मूर्खं मां कथयसि ! मूर्खोऽस्मि
तवाऽनेन किं ? याहि निजगृहम् ॥२१॥
भैरवनाथः— निपत न निपत न, विरम, न खण्डय,
पतसि कथं शाखयैव सार्धम् ?
मूर्खो युवा— कथं निषेधसि काष्ठखण्डनाद्—
इन्धनाय खण्डनं करोमि ॥२२॥

भैरवनाथः—तरोः पतिष्यसि लघु तत्कथये,
मूर्खोयुवा— मम पतनात् किन्ते प्रयोजनम् ?
भैरवनाथः— कार्यमस्ति यत्त्वयैव कार्यम्,
मूर्खो युवा— मया, कथय, तत्कार्यं किन्ते ?॥२३॥

भैरवनाथः—नीचैर्यदा ऽऽगमिष्यसि वत्स !
तदा त्वां हि कथयिष्ये तदहम् ।
मूर्खो युवा— तदहं नीचैः कूर्दे वृक्षात्,
त्वामायामि, कथय मां कार्यम् ॥२४॥
भैरवनाथः – नहि, नहि, कूर्देथा नीचै र्नहि,
शनैः शनैस्त्वं वृक्षादवतर ।
मूर्खोयुवा – अवतरणे स्यात्कोऽपि विलम्ब—
स्तस्मात्कूर्दे त्वं गृहाण माम् ॥२५॥
भैरवनाथः—निषेधितोऽपि त्वमकूर्दिष्ठाः
घातो नाऽभूत्तव गात्रे क्व ?
मूर्खो युवा – न कोऽपि घातः, स्वस्थस्त्वस्मि,
किन्ते कार्यं मया, कथ्यताम् ॥२६॥
भैरवनाथः—कथय, वससि सम्प्रति वत्स ! क्व ?
मूर्खो युवा - राजकुमारी-विद्याभवने ।
भैरवनाथः— किन्नामासि तव च कौ पितरौ ?
कं निजवंशमलंकुरुतस्तौ ॥२७॥
मूर्खो युवा— भवान् दृश्यते गुरुराकृत्या
ज्ञायसे त्वमाचार्यः कश्चित् ?
भैरवनाथः— ज्ञातस्त्वयाऽहमुचितो भद्र ?
प्रथमं वंशपरिचयं कारय ॥२८॥
मूर्खो युवा - करिष्यसे किं तेन कथय माम् ?
भैरवनाथः— तव परिणयं कारयिष्यामि ।
मूर्खो युवा – मम परिणयमुच्चैः स जहास ।
भैरवनाथः— कथमुच्चर्हसि त्वं मूर्ख ! ॥२९॥

मूर्खो युवा—मूर्खं मां सर्वे कथयन्ति,
परं न जाने मूर्खः कोऽस्ति ?
अहं त्वमसि वा तन्मां कथयेः,
केन विवाहं मम करिष्यसि ?॥३०॥

भैरवनाथः—मूर्खो नासि, मूर्खराजस्त्वं,
'कया' पदं तु केन सह वदसि।
पुमानसि त्वं त्वया वाच्यं –
कया सहोद्वाहो मम भविता ॥३१॥

मूर्खो युवा— इदमेवाऽहं पृच्छामि त्वाम्,
कया सह विवाहो भविता मे ?
भैरवनाथः— राजकुमार्या सह भविता सः.
मूर्खो युवा— 'राजकुमार्या सह'—स जहास ॥३२॥
भैरवनाथ--'कथं हससि रे ! पण्डितास्ति सा,
त्वां मूर्खं बुद्धं करिष्यति।
मूर्खो युवा— मां विद्वांसं करिष्यते सा,
तदहमुद्यतस्तां परिणेतुम् ॥३३॥
भैरवनाथः— परं त्वयोक्ता न परिणयाय,
नामगोत्रवंशादि परिचयः।
यमन्तरेण सम्भवति लोके,
कस्यापि नो जनस्य विवाहः ॥३४॥

मूर्खोयुवा— तद्विषयेऽहं किं कथयेयम्,
तौ तु मृतौ मे पञ्चमवर्षे।
पिता तु भारद्वाजगोत्रजो,
मिश्रवंशजः श्रूयते हि सः ॥३५॥

माता मे कालो नामाऽऽसीत्,
पिता च कालीनाथो नाम ।
कालीदासं मामकथयताम्,
इह मां मूर्ख वदन्ति सर्वे ॥३६॥

भैरवनाथः "अस्तु, कालिदासोऽसि करिष्ये,
तव परिणयं राजपुत्र्या सह ।
एहि मया सह गुरुकुलं चलेः,,
ययौ गुरुकुलं स तेन साकम् ॥३७॥

भैरवनाथः—गुरुवर ! नमामि सहाऽऽगतेन,
शिवनाथः— कोऽयं भद्र! कमानयो जनम् !
भैरवनाथः— अयमपण्डितः स यो विवाहम्,
तया विदुष्या सार्धमिच्छति ॥३८॥
शिवनाथः - त्वयाऽन्वेषितो जनः स इष्टो,
बुधापमानप्रतीकाराय ।
भैरवनाथः— भाग्यं भवति गुरो ! बहुबलवद्,
यदसम्भवं करोति सम्भवम् ॥३९॥

भवतां सद्यत्नेन जनोऽयं,
मूर्खो बुधवच्चरितुं शक्यः ।
येन भवत्कृपयाऽयमयोग्यो,
जेतुं शक्यस्तामपि विदुषीम् ॥४०॥

मन्ये राजकुमारीभाग्ये,
नास्ति कोऽपि पतिरूपो विद्वान् ।
तस्या वैवाहिकसम्बन्धो,
भविता सहाऽनेन मूर्खेण ॥४१॥

अतः पण्डितानाम 'मानं,
करोति सा प्रकृतिरिय तस्याः ।
प्रशिक्षितव्योऽयं गुरुवर ! स्याद्,
येन पण्डितावमानरक्षा ॥४२॥

शिवनाथः

भो वत्स ! एहि कुर्वेऽहं तव विवाहम्,
सार्धं तया विदुष्या यामिच्छसि त्वम् ।
गच्छे विहाय चिन्तां भैरव ! यथेच्छम्,
त्राणं भवेद्धि तस्या वै पण्डितानाम् ॥४३॥

कविः –

मेवाराममिश्रनामा यो विद्वान् वैद्योऽजायत,
यस्यां पुर्यां तस्यां सो गोंगुर्यामेव जन्मवान् ।
*विद्यावाचस्पतिपदधारी रामकिशोर मिश्र इह
विद्योत्तमाकालिदासीये षष्ठं सर्गं कृतवान् ॥४४॥

---

*विद्यावाचस्पतिः = (Ph.D.)

विद्योत्तमा-कालिदासीयम्

सप्तमः सर्गः

(विद्योत्तमा-कालिदासयोःमौनशास्त्रार्थः ।)

कविः ततः स मौनं चरितुं प्रशिक्षितं,
गृहीतसङ्केतविधिं गुरुर्बुधः ।
सहैव नीत्वा तमपण्डितं जनं,
जगाम काशीनृपतेः सभामुखम् ॥१॥

द्वारपालः— जय जय राजन्! अयं सशिष्यो
गुरुशिवनाथस्तिष्ठति द्वारे ।
आज्ञापय किमहं करवाणि ?

काशिराजः— शीघ्रं तं सादरं प्रवेशय ॥२॥

द्वारपालः— एष समायातो गुरुवर्यो
राजन् ! पश्यतु भवानिमं भोः ।

काशिराजः— प्रणामोऽस्तु मे पूज्यचरणयोः
भवदाशिषं कामये नित्यम् ॥३॥

शिवनाथः—कुशलमस्तु गृहे तव सर्वदा,
भवतु नो विभवैः रहिता प्रजा ।
किमपि भूप ! न ते त्वहितं भवेद्,
अनुदिनं जयतात्तव जीवितम् ॥४॥

काशिराजः पुत्रि ! प्रसिद्धो विद्वान्,
गुरुकुलात्समायातोऽयमाचार्यः ।
सशिष्यमेनं प्रणम्य,
यथेष्टं लभस्व वराशिषम् ॥५॥

सप्तमः सर्ग

विद्योत्तमा—सर्वतः प्राप्तयशसे,
आचार्याय विपश्चिते ।
काशिराजस्य पुत्रीयम्,
विद्योत्तमा प्रणमति ॥६॥
शिवनाथः—समग्रशास्त्रज्ञमजातदुर्हृदम्,
परार्ध्यवंशोद्भवमाप्तवाङ्मुखम्,
सुदर्शनं राजसुते ! महाकविम्,
निजानुरूपं पतिदेवमाप्नुहि ॥७॥
काशिराजः—इदं तुसमलंक्रियतां त्वयाऽऽसनं,
तदासने तिष्ठतु पण्डितो युवा ।
करोतु विद्वन् ! मयि शासनं भवान्,
क्रियेत सेवा भवतां च का मया ॥८॥
शिवनाथः—राजन् ! सभायां शास्त्रार्थसेवा,
करोति सम्प्रति बुधजातिमानम् ।
तदर्थमावामत्राऽऽगतौ स्वः,
कथयस्व शास्त्रार्थकृते स्वपुत्रीम् ॥६॥
काशिराजः— विद्योत्तमे पुत्रि ! प्रणं स्वकीयं,
प्रतिज्ञयाऽऽचार्यवरेण पूरय ।
शास्त्रार्थमाचरितुं ह्युद्यता भव,
पतिरूपमाचार्यवरं लभस्व ॥१०॥
विद्योत्तमा—किं पश्चिमे वयस्यस्मिन्नाचार्यकामवासना ।
तृप्ति नैवगता येन मां पत्नीत्वेन वाञ्छसि ॥११॥
अहमष्टादशावस्थाऽस्म्यारूढनवयौवना ।
तां शास्त्रार्थबलादेष त्वं मां नेतुं समीहसे ॥१२॥

शिवनाथः—नैवं कथय, राजसुते ! तु नाऽहं,
कर्तुं त्वया सह प्रयते विवाहम् ।
पत्न्यौ च मे द्वे ताभ्यां प्रजाताः,
पुत्राःषडेका पुत्री च जाता ॥१३॥
पूर्णाश्च सर्वे कामा मदीयाः,
शास्त्रार्थवाञ्छा प्रसृता त्वदीया ।
शिष्यस्य मेऽस्यापि तदर्थमिच्छा,
करिष्यसे तां वद काऽस्ति पृच्छा ?॥१४॥

विद्योत्तमा स्वीकरोमि तमहं तु परिचयं,
कारय तस्य मतिमतां प्रवर !
स च कोऽस्ति विद्वानर्थवेत्ता,
जित्वा मां यः स्याद्धि मे वरः ॥१५॥

शिवनाथः—अयं स तरुणो बुधकालिदासः,
शास्त्रार्थमभि यो न भवेन्निराशः ।
जाने सहाऽनेन तु जीवनन्ते,
ससुखं हि सरसं स्यात्सर्वमन्ते ॥१६॥

विद्योत्तमा—अयं युवा शिष्यस्ते मनीषिन् !
रूपाकृतिभ्यां यो भाति कान्तः ।
प्रशंस्यमाचार्य ! तु शीलमस्य,
मयेङ्गितो योऽस्ति गिरा प्रशान्तः ॥१७॥

शिवनाथः—अस्य प्रशान्तेरस्ति प्रयोजनम्,
जानासि तत्त्वं नो राजपुत्रि !
शास्त्रार्थशक्त्या यस्य त्वमद्य,
परिजितबुधा या पत्नी भवित्री ॥१८॥

विद्योत्तमा— आचार्य ! वद मां तं कः स हेतुः ?
येनाऽयमधुनाऽस्ति गृहीतमौनः ।
शिवनाथः— मौनमस्य वाचो निरोधकम् ।
व्रतादृते वद, वदति को न कम् ॥१६॥
विद्योत्तमा— मौनव्रती कथं शास्त्रार्थम्,
करिष्यतेऽयं तव बुधशिष्यः ?
शवनाथः— इङ्गितेन तव सर्वान् प्रश्नान्,
उत्तरिष्यति स, वद पृच्छसि किम् ॥२०॥
विद्योत्तमा— करोमि मौनशास्त्रार्थमहं नो ।
शिवनाथः— तत्त्वं स्वीकुरु निजपराजयम् ॥
विद्योत्तमा— वाचा शास्त्रार्थं कुर्वेऽहम् ।
शिवनाथः— मौनेनाऽत्र परं का बाधा ?॥२१॥
विद्योत्तमा— मौनमार्गलम्बितसङ्केतैः
सभासदः किमिमे ज्ञास्यन्ति ?
शिवनाथः— द्वयोरिङ्गिताऽभिप्रायान् तान्
सर्वा ् प्रतिबोधयाम्यहं तान् ॥२२॥

भवती विदुषी महापण्डिता,
विदुषोऽनेकान् पराजितवती ।
अविवाहिता समाजे नारी,
कलङ्क एव समाजदूषणम् ॥२३॥

तस्याः सुशोभनं शीलं प्रति,
दूषितदृष्ट्याऽङ्गुलिरुद्गच्छति ।
लोके वार्ता भवति जनानां,
प्रतिज्ञया साऽनूढा भविता ॥२४॥

इयं पण्डितानामपमानं
करोति तेन पण्डिताभावे ।
अस्या भोक्ता मूर्खः कश्चिद्,
भविता कामेन पीडितायाः ॥२५॥

युवती सा नृपपुत्री हर्म्ये,
वाञ्छितेन केनापि प्रियेण ।
यूना कर्मकरेण सङ्गता,
कामवासनां पूरयतीव ॥२६॥

विद्योत्तमा—को वदतीत्थं ज्ञापय तं तं,
नाऽहं कामवशाऽस्मि तादृशी ।
ज्ञानेऽयं दूषितः प्रचारः,
पराजितानां विदुषामेव ॥२७॥

शिवनाथः—कर्णपरम्परया श्रुतं यदा,
यत्तद् वक्तुं शक्यते किमु ?
नाम ग्रहीतुं कस्य शक्यते ?
श्रुतं न सत्यं भवति निश्चितम् ॥२८॥

त्वद्विषये दूषितः प्रचारो,
लोके न स्यादिति विचारयन् ।
अन्यसुयोग्यपण्डिताऽभावे,
मौनव्रतिनमहं प्रेरितवान् ॥२९॥

भवती पृच्छतु सङ्केतैः स्वै—
र्यद्यत्प्रष्टुमीहसे तत्तत् ।
यदुत्तरैः सन्तुष्टाऽनेन,
परिणीता जीवनसुखमनुभव ॥३०॥

इदं त्वदीयं वयो नवीनं,
रूपं यौवनभरं मनोज्ञम् ।
राजपुत्रि ! जीवनमवगच्छेः,
किं यौवनेऽपि नेच्छसि कान्तम् ? ॥३१॥

लोके नरनार्यो र्द्वयोश्च को,
यो नहि परस्परं कामयते ।
तयो र्विशिष्य त्वं यदि तत्त्वं,
देवतासि पशुरसि वा देवि ! ॥३२॥

नरं विना नारी न शोभते,
विदुषी सा भवेदविदुषी वा ।
नारी नरमिच्छति तत्प्रकृतिः,
सरसा सरला सहृदयभावा ॥३३॥

विद्योत्तमा— भवता सत्यमुक्तमाचार्य !
प्रतिज्ञयाऽहं परिणेष्यामि ।
मौनं त्यक्त्वाऽयं तव शिष्यः,
शास्त्रार्थाय समुद्यतो भवेत् ॥३४॥

शिवनाथः— मौनमस्य बाधैका देवि !,
तत्त्यक्तुं शक्नोति च नाऽयम् ।
अयं ब्रह्मचारी न परिणयं,
वाञ्छति, मया प्रेरितः कर्तुम् ॥३५॥

दार्शनिकोऽयं ब्रह्मवेत्ता,
लोकसारतां जानीतेऽयम् ।
क्षणभंगुरतां जगतो वेत्सि,
स्वमागतमिमं स्वीकुरु देवि ! ॥३६॥

शिष्यो मे विद्वान् त्वं विदुषी,
युवयोर्मिथुनं प्रशंसनीयम् ।
मौनमनेन गृहीतं सुभगे !,
षड्मासानन्तरं समाप्स्यति ॥३७॥

अतो मम वचनमङ्गीकृत्य,
सङ्केतैः शास्त्रार्थं कुर्याः ।
तव कल्याणमत्र प्रच्छन्नं,
ददाति जीवनसुखमिह नियतिः ॥३८॥

राजन् ! प्रेरय निजां दुहितरं,
समारूढयौवनबालेयम् ।
अस्याः परिणयकालोऽयं वै,
तस्य युवा मे शिष्यो योग्यः ॥३९॥

काशिराजः— आचार्योक्तं स्वीकुरु पुत्रि !,
निजानुरूपं पतिं लभस्व ।
इङ्गितेन शास्त्रार्थं कुर्याः,
उत्तरसन्तुष्टिं विज्ञापय ॥४०॥

विद्योत्तमा—अङ्गीकृतो मौनशास्त्रार्थः,
सङ्केतैस्तच्चाऽहमारभे ।
शिष्यस्तवेङ्गितेन ह्युत्तरतु,,
भवांश्च तद्भावान् ज्ञापयतु ॥४१॥

कविः—विद्योत्तमया स्वांगुलिरेका,
प्रदर्शिता तं कालिदासमभि ।
तेन जडेनांऽगुल्या नयनं,
निस्फोटयतीत्थं निज्ञातम् ॥४२॥

ततस्तेन तां प्रति सङ्केतो,
निहितोऽङ्गुल्यो र्द्वयोरेव सः ।
येन राजपुत्रीमुखकमलं,
विकसितमुत्तरकिरणेनाऽभूत् ॥४३॥

तदनन्तरमाचार्यः सोऽपि,
शिवनाथः सांसदज्ञानाय ।
तयो र्द्वयोरङ्गुलिसङ्केत-
द्वयभावौ प्रकटितवान् वाण्या ॥४४॥

शिवनाथः—एकाङ्गुल्याः सङ्केतेन,
ब्रह्मैकं नृपदुहितुर्भावः ।
अङ्गुलिद्वयेन तद्भेदौ द्वौ,
निराकारसाकारौ व्यक्तौ ॥४५॥

दर्शनशास्त्रममविज्ञेन,
मम विदुषा शिष्येण कृतेन ।
सङ्केतेन प्रसन्ना जाता,
विद्योत्तमा सभासद्वर्याः! ॥४६॥

काशिराजः—विद्योत्तमे ! कथय मां पुत्रि !
सङ्केतोत्तरमृतं न वेति ।
विद्योत्तमा—पितः ! युवाऽयं बुधोऽस्ति यो मे,
प्रश्नोत्तरं ददाति समुचितम् ॥४७॥

शिवनाथः— विद्योत्तमे ! तवाऽस्मिन् प्रश्ने,
विजयो मम शिष्यस्य समभवत् ।
प्रश्नान्तरं प्रष्टुमिच्छसि चेत्,
तत्प्राश्निकसङ्केतं कुर्याः ॥४८॥

कविः— ततस्तया पञ्चाङ्गुलियुक्तो,
दक्षिणहस्तस्तं प्रदर्शितः ।
येन चपेटं ज्ञात्वा तामभि,
मुष्टिस्तेन प्रदर्शिता ततः ॥४९॥
विद्योत्तमा तदुत्तरेण सा, पतिकामेन प्रसन्ना जाता ।
यद्भावं विज्ञायाऽऽचार्यः, सभासदस्तान् विज्ञापितवान् ॥५०॥

शिवनाथः—करेण राजसुताया भावः,
पृथक् पृथग् भूतानि पञ्च वै ।
तान्येकीभूतानिशरीरं,
कुर्वन्तीति प्रकटितं मुष्ट्या ॥५१॥
पञ्चभूतसंग्रहो जगत्यां, निर्माति तथा जीवशरीरम्।
पञ्चाङ्गुलिसंग्रहेण भद्रा, मुष्टि र्निर्मीयते यथैषा ॥५२॥
एकत्वञ्च गतैस्तै र्भूतैः,
सञ्चार्यते जीवनं वपुषि ।
भवति पृथग्भूतैः पञ्चत्वं,
शक्तिरैक्ये भावस्तस्य ॥५३॥
किं किं प्रष्टुमीहसे बाले ! राजसुते ! यदि विदुषी त्वमसि ।
तदयं मे शिष्यो विद्वानपि, यः प्रश्नोत्तरमृतं ददाति ॥५४॥

विद्योत्तमा—प्रसन्नाऽस्मि, स्वीकरोमि शिष्यं,
तवाऽऽचार्य ! विद्वांसमिममहम् ।
जितोऽयमहमङ्गीकुर्वे स्वं,
पराजयं पतिमिमं च विद्वन् !॥५५॥
अद्य प्रतिज्ञा मे सम्पूर्णा, यया पतिं बुधमपि प्राप्नोमि ।
हृदयं मे नन्दति यत्कुरुते, तवशिष्यविजयघोषं मनसा ॥५६॥

शिवनाथः—राजन् ! कालिदासविजयेन,
घोषय विद्योत्तमापरिणयम् ।
अद्य प्रसन्नं भवन्मनोऽपि,
पुत्रीयोग्यो वरोऽपि लब्धः ॥५७॥
काशिराजः—जितः कालिदासः पराजिता,
विद्योत्तमा तयोश्च परिणयः ।
श्रीशिवनाथस्याऽऽचार्यत्वे,
सम्पत्स्यते निशायामद्य ॥५८॥
आगच्छन्तु सभासद्वर्याः ! आमन्त्र्यन्ते ह्यत्र भवन्तः ।
आशिषं ददतु वधूवराभ्याम्, आनन्दामि परममहमद्य ॥५९॥
सभासदः—साधु साधु राजन् ! कालोऽयं,
बहुसमयानन्तरमायातः ।
आस्माकीनाः शुभाः कामनाः,
नवदम्पतीभ्यां सदा भवन्तु ॥६०॥
एनयोः कर्ममार्गोऽयं, यथेष्टं सुखदो भवेत् ।
परस्परं प्रवर्तेतां, जीवने सहयोगिनौ ॥६१॥
कविः—
एटायामपि शूकरक्षेत्रे सोरोंनगरे वासी,
ध्रुवमङ्गुष्ठदानमपि नाटकरचनाद्वयमाकृतवान् ।
गीतजवाहरस्य विरचयिता रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीये सप्तमसर्गं कृतवान् ॥६२॥

विद्योत्तमा-कालिदासीयम्

अष्टमः सर्गः

(विद्योत्तमा-कालिदासयो र्विवाहः ।)

कविः—

कालिदासवरयात्रा चचाल पण्डितैः सह ।
वरो गजासने त्वासीद् वस्त्रालङ्कारभूषितः ॥१॥

वरयात्रिषु केचित्तु रथेषु समलंकृता ।
अन्ये गन्त्रीषु त्वपरे समारूढास्तुरङ्गमान् ॥२॥

वादकास्तत्र वाद्यानि वादयन्ति स्म तालदाः ।
गायका मधुरगीतैः कर्षन्ति स्म प्रजामनः ॥३॥

नर्तकाः पादविक्षेपैर्बहुनृत्यकलागतैः ।
दर्शकानां हृदयानि हरन्ति स्म बलादपि ॥४॥

इत्थं च राजमार्गे सा तत्र सङ्गीतमण्डली ।
सावरोधा प्रतिस्थानं जनानां हरते मनः ॥५॥

शार्करं सलिलं केऽपि त्वपरे शीतलं पयः ।
प्रसन्नाः पाययन्ति स्म पिबन्ति वरयात्रिणः ॥६॥

तत्र गुरुकुलात् केऽपि काश्याश्च केचिदागताः ।
छात्रा बुधाश्च केऽप्यासन् ते सादरं निमन्त्रिताः ॥७॥

तेभ्यः पृथग्जनानान्तु सम्मर्दो बहुलोऽभवत् ।
यो दृश्यं वरयात्राया द्रष्टुं नाऽऽसीन्नियन्त्रितः ॥८॥

सम्मर्दे तत्र लोकानां कोलाहलः स्म जायते ।
वार्तां नैव शृणोति स्म यत्र कश्चन कस्यचित् ॥९॥
जहास कश्चिदन्यश्च शास्त्रार्थे कश्चिदब्रवीत् ।
विदुष्या तु तया मूर्खः कालिदासो वृतस्त्वहो !॥१०॥
'तूष्णी भव' जगादाऽन्यः शृणोति कोऽपि नेतरः ।
आचार्यस्य प्रभावोऽयं येन मूर्खः कृतो बुधः ॥११॥

कोऽपि—
यदा ज्ञास्यति सा तथ्यं मूर्खेणाऽहं विवाहिता ।
स्वमस्तके तदा भाग्यं हस्ताभ्यां ताडयिष्यति ॥१२॥

अन्यः –
मादृशानां बुधानां च याऽवज्ञा हि कृताऽनया ।
तस्या अयं प्रतीकारस्तं स्मरिष्यति सा कदा ?॥१३॥

अपरः—
अस्य मूर्खस्य भाग्यन्तु पश्यत कियदद्भुतम् ?
यो मार्गे पतितो ह्यस्तं प्रासादोऽद्य प्रतीक्षते ॥१४॥

इतरः—
तदज्ञः पृच्छति कश्चित् कस्येमे वरयात्रिणः ?
एषा कस्य वरयात्रा ? क्व याति, वद मित्र भोः !॥१५॥

कश्चित्—
पश्य, पश्य, गजारूढः कालिदासोऽयमज्ञकः ।
राजपुत्रीवरो याति हर्म्यं काशीप्रशासितुः ॥१६॥
कोऽपि—प्रबन्धमकरोत्कोऽस्य ?
अन्यः—राजा विद्योत्तमा-पिता ।
इतरः – अयन्तु तस्य जामाता
काशीमग्रे प्रशास्यति ॥१७॥

परः—

पश्य, सुबर्णमुकुटम् अलङ्करोति यच्छिरः।
पादयोश्चरणत्राणे हैमसूत्रै र्विनिर्मिते ॥१८।

अपरः -

वक्षसि कञ्चुकं मित्र ! तं न पश्यसि भासितम्।
राजपुत्रसमो भाति येनाऽयं रङ्कदेहजः ॥१९॥

कविः—

इति सह हासैर्वार्तालापै र्युक्तैषा वरयात्रिसमेता।
वरयात्रा मूर्खस्य तस्य सा शनैः शनैः प्रासादं प्राप ॥२०॥
विविधैर्दीपैः राज्ञो भवनं प्रकाशितं नागरैः शोभितम्।
किङ्करसेवकादिभृत्यानां कोलाहलेन गुञ्जितमभितः ॥२१॥

वेदमन्त्रैः कृतं तत्र पण्डितै र्द्वारपूजनम्।
जामात्रे पण्डितेभ्यश्च राज्ञा दत्तं धनादिकम् ॥२२॥
धौतवस्त्राणि तत्राऽऽसन् कञ्चुका हैमसूत्रिताः।
पादत्राणानि भास्वन्ति गुञ्जितानि सुचर्मरैः ॥२३॥

उष्णीषाण्युत्तरीयाणि दर्यश्च प्रच्छदपटाः।
पर्यङ्का बहुमूल्याश्च तूपधानानि कानिचित् ॥२४॥
अन्याश्च विविधाश्चोला राज्ञा दत्ता हि सादरम्।
हैमराजतलौहेषु पात्रेष्वासन्निमानि च ॥२५॥

स्थालिकाश्चमसाः स्थाला वेलाकटोरकंसकाः।
धिषणाश्चषकाः स्थाल्यो हसन्त्यः स्वेदनीयुताः ॥२६॥
ऋजीषाणि जलद्रोण्यः शरावाः कलशीमुखाः।
उदञ्चनानि सन्दंशाः कुम्भाश्च करकैर्युताः ॥२७॥

तस्मिन् पूजनसमये सम्भ्रान्तकुलजाः स्त्रियः ।
अगायन् बहुगीतानि तेषु मुख्यानि कानिचित् ॥२८॥
इमानि सर्वगीतानि तान्येवाऽऽसन् हि यानि तु ।
गीयन्ते वरमालक्ष्य लोके परिणयोत्सवे ॥२९॥

गीतम् (१)

मया गौरवर्णस्त्वाहूतः,
कथमागतः पुनः कृष्णस्त्वम् ?
मया महाधनिकस्त्वाहूतः,
समागतः कथमकिञ्चनस्त्वम् ?॥३०॥
वाणीबुधो मया त्वं हूतः
कथमागतो मौनविज्ञस्त्वम् ?
मया कामशास्त्री त्वंहूतः,
कथमागतः पुनर्मुग्धस्त्वम् ?॥३१॥

गीतम् -- (२)

सत्यमहं त्वां बुधमिच्छामि,
परमज्ञतां गतस्त्वं किमहो ?
वाग्योद्धारं त्वामिच्छामि,
इङ्गितज्ञतां गतोऽसि किमहो ?॥३२॥
तुरगारूढ त्वामिच्चामि
गजारूढ आगतोऽसि किमहो ?
वाङ्मुखरं त्वामहमिच्छामि
परन्तु मौनं गतोऽसि किमहो ?॥३३॥

गीतम्—(३)

त्वं मां कामयसे नहि वेति,
निश्चयेन त्वामहं कामये ।
त्वं मयि प्रणयं धरसि न वेति,
त्वयि प्रणयं प्रियमहं धारये ॥३४॥

त्वं मां गेहं नयसि न वेति,
प्रासादं त्वामहं प्रिय ! नये ।
त्वं मे भारं वहसि न वेति,
तव भारं प्रियमहं कामये ॥३५॥

पूजनानन्तरं तत्र भोजोऽभूद् वरयात्रिणाम् ।
सादरं खाद्यपदार्थान् वितरन्ति स्म काशिकाः ॥३६॥
कश्चिद् ब्रूते कलाकन्दं गृहाण मित्र ! शष्कुलीम् ।
भाषगर्भामिच्छसि चेद् मत्पार्श्वे सा न विद्यते ॥३७॥

एकः—किं ददासि महाभाग ?
द्वितीयः—पायसमस्ति पण्डित !
एकः—दीयतां तद्धि पात्रेऽस्मिन्,
द्वितीयः - गृह्यतां पीयतां च तत् ॥३८॥

अन्यः—संयावो गृह्यतां मित्र !
अपरः—कुण्डली स्यात् प्रदीयताम् ।
अन्यः—नास्ति,
अपरः— तामानय भद्र !
अन्यः—आनयाम्येष यामि च ॥३९॥

इतरः—गृह्णासि मल्लपूपं किम् ?
अन्यः—न, कौष्माण्डं वहाम्यहम् ।
इतरः – देहि तदेव मिष्टान्नम्,
अन्यः गृह्यतां,
इतरः—पत्रले क्षिप ॥४०

परः – अस्ति किं ?
अपरः— भद्र ! दाधेयम्,
गृह्णासि,
परः – नैव,
अपरः— किन्न तत् ?
भोजनान्ते तु दाधेयम्,
पिबेत् स्वास्थ्येच्छुको जनः ॥४१॥

कोऽपि—मोदकान् देहि मह्यं तु
अन्यः मोहनभोगमिच्छसि ?
कोऽपि—कथं नेच्छामि, तं देहि,
अन्यः – गहाण पण्डितवर ! ॥४२॥

परः—मधुमण्ठं न गृह्णासि ?
अपरः—पर्पटान् नैव दास्यसि ?
परः—लवणान्नं गृहाणाऽङ्ग !
अपरः – देहि दधि सशर्करम् ॥४३॥

अन्यः—स्वदसे रसगोलान्न ?
इतरः – पिण्डान् देहि महाशय ?
अन्यः—हस्तौ प्रसारय भद्र !
इतरः—पत्रले तान्निपातय ॥४४॥

एकः—मधुशीर्षं गृहाणेमाममृतीं दुग्धपूपिकाम् ।
परः—देहि मह्यमवलेहं पक्वबटान् च पण्डित !॥४५॥
कश्चित्—ब्राह्मणो मोदकप्रेमी
किन्न खादसि मोदकान् ?
अन्यः—प्रीत्या खादामि भगवन् !
सूत्रकाःस्युः प्रदेहि तान् ॥४६॥
कश्चित्—सूत्रकान्नैव दास्यामि सन्तानिकां गृहाण भोः !
अन्यः—देहि दधिबटान्, शाकं सीताफलजमालुजम् ॥४७॥
कविः—
कोऽप्ययाचत पानीयं पात्रे पातय शीतलम् ।
ताम्बूलं देहि भो भद्र ! भोजनन्तु कृतं मया ॥४८॥
भोजनान्ते ययुः सर्वे शिविरान् वरयात्रिणः ।
ययौ मण्डपमाचार्यो नीत्वा वरं सपण्डितम् ॥४९॥
अर्धरात्रे गते लग्ने तत्र विद्योत्तमा वधूः ।
पुरोहितैः समाहूता सखीभिः सह साऽऽगता ॥५०॥
तस्या एकावली कण्ठे मुक्ताहारेण भूषिता ।
सह शीर्षकिरीटेन ललाटाभरणं बभौ ॥५१॥
नासामौक्तिकपुष्पाभ्यां नासाचक्रेण नासिका ।
सगन्धकुसुमै र्वेणी राकेव तारकै र्बभौ ॥५२॥
सौभाग्यविन्दुको रक्तो मस्तके किरणैस्तथा ।
प्राच्यां प्रकाशितो भाति रक्तरश्मिर्यथा रविः ॥५३॥
कर्णयोः कर्णपूरौ च करयोर्हेमकङ्कणौ ।
भातः स्म काचवलयैः केयूरे भुजयोस्तथा ॥५४॥
हीरयुक्तांगुलीयानि तस्याः प्रत्यंगुलि बभुः ।
शुशुभे तत्कटौ काञ्चिः सुवर्णसूत्र सज्जिताः ॥५५॥

नूपुरौ किङ्किणीयुक्तौ पादयोश्चाऽप्यलंकृतौ ।
पादांगुल्यः परं तस्याः हीना अद्यापि वृश्चिकैः ॥५६॥
तत्सीमन्ते तु सिन्दूरम् आरोपितं न केनचित् ।
नाऽलक्तकश्चरणयो र्नासीद् रञ्जनमोष्ठयोः ॥५७॥
विवाहान्ते वधूनार्या सर्वमेतत्प्रसाध्यते ।
परं तन्नयने शुभ्रे कज्जलेन मनोहरे ॥५८॥
कठोरस्तनयो र्बद्धा क्षौमकञ्चुलिका तथा ।
धृतक्षौमान्तरीपा सा दुकूलशाटिकावृता ॥५९॥
काशिराजस्य सा पुत्री वधूर्विद्योत्तमा बुधैः ।
वरस्य कालिदासस्य वामे किलोपवेशिता ॥६ ॥
स्वस्तिवाचनमन्त्रै स्तैः स्वस्ति न इति वैदिकैः ।
श्रीगणेशस्य पूजान्ते कृत्वा नवग्रहार्चनम् ॥६१॥
पाणिग्रहणसंस्कारः पुरोहितैस्तयोः कृतः ।
सम्भान्तमहिलागीतैस्तत्राऽयमभिनन्दितः ॥६२॥

गीतानि

(१) अयं स समयो द्वयोः प्रेमिणोः,
जीवनमेकीकर्तुमागतः ।
बहुसमयानन्तरं शङ्करः,
स पार्वतीं परिणेतुमागतः ॥६३॥
(२) अयं स समयो द्वयोः प्रेमिणो—
र्जीवनमेकीकर्तुमागतः ।
बहुसमयानन्तरं स विष्णु—
र्गृहलक्ष्मीं परिणेतुमागतः ॥६४॥

(३) अयं स समयो द्वयोः प्रेमिणो—
जीवनमेकीकर्तुमागतः ।
बहु समयानन्तरं ययाति—
देवयानिं परिणेतुमागतः ॥६५॥

(४) अयं स समयो द्वयोः प्रेमिणो—
जीवनमेकीकर्तुमागतः ।
देवयानिं परिहाय ययातिः,
शर्मिष्ठां परिणेतुमागतः ॥६६॥

(५) अयं स समयो द्वयोः प्रेमिणो—
जीवनेमेकीकर्तुमागतः,
बहुसमयादद्य स दुष्यन्तः,
शकुन्तलां परिणेतुमागतः ॥६७॥

(६) अयं स समयो द्वयोः प्रेमिणो—
जीवनमेकीकर्तुमागतः,
बहुसमयानन्तरं स रामो,
जनकसुतां परिणेतुमागतः ॥६८॥

(७) अयं स समयो द्वयोः प्रेमिणो—
जीवनमेकीकर्तुमागतः ।
मौनी कालिदास इह विदुषीं,
विद्योत्तमां परिणेतुमागतः ॥६९॥

ततस्तौ पण्डितैरुक्तौ कर्तुमग्निप्रदक्षिणाम् ।
द्वयोर्येनाऽग्निदेवोऽयं साक्षी भवेत्परिणये ॥७०॥
यद्यप्यस्य विवाहस्य वयं सर्वेऽपि साक्षिणः ।
तथापीमं समाजे नो जानीतं भ्रामरविधिम् ॥७१॥

वेदमन्त्रैः सह ताभ्यामग्निपरिक्रमा कृता ।
रमणो-भ्रामरगीतैः या स्वीकृत्याऽभिनन्दिता ॥७२॥
प्रथमे भ्रामरे पुत्री पितामहस्य निश्चिता ।
यो विवाहयितुं पौत्रीं निजामन्यत्र तामलम् ॥७३॥
द्वितीये भ्रामरे पुत्री मातामहस्य निश्चिता ।
परिणेतुमलं योऽद्य दौहित्रीं क्वापि स्वेच्छया ॥७४॥
तृतीये भ्रामरे पुत्री मातुलस्य, पितुः स्वसुः ।
यौ शक्तौ तां परिणेतुं क्वाप्यद्यापि निजेच्छया ॥७५॥
चतुर्थे भ्रामरे पुत्री भ्रातुरेव विनिश्चिता ।
भ्राता विवाहयितुं च स्वसारं क्वापि तामलम् ॥७६॥
पञ्चमे भ्रामरे पुत्री पितुरधिकृता सुता ।
योऽधुनापि पिताऽन्यत्र शक्तः पुत्री-परिणये ॥७७॥
षष्ठेऽपि भ्रामरे पुत्र्या माताऽधिकारिणी मता ।
या विवाहयितुं शक्ता स्वेच्छयाऽन्यत्र क्वापि ताम् ॥७८॥
सप्तमे भ्रामरे पुत्री तस्य पत्नी येन सह ।
भ्रामराः पतितास्तस्याः, पित्रो र्न, तस्य सा धनम् ॥७९॥
सप्तप्रदक्षिणान्ते तौ पतिः पत्नी च घोषितौ ।
ततस्ताभ्यां निवासाय हर्म्यमेकं नृपो ददौ ॥८०॥
गृहदेवार्चनार्थं तौ राजभवनं प्रेषितौ ।
पण्डितेभ्यो दक्षिणायां राज्ञा दत्तं धनादिकम् ॥८१॥
शिवनाथः स आचार्यो राज्ञा सम्मानितस्ततः ।
शिष्यैर्विवाहचर्चां तां कुर्वन् गुरुकुलं गतः ॥८२॥
सेवकसेविकाभ्यश्च राज्ञा राज्ञ्या च सादरम् ।
मिष्टान्नं पारिश्रमिकं धनादिकमदीयत ॥८३॥

गृहदेवान् समभ्यर्च्य तौ सेवकपरिवृतौ ।
विश्रामाय पतिपत्न्यौ निर्दिष्टभवनं गतौ ॥८४॥
पुत्रीं विवाहितां दृष्ट्वा जामात्रा सङ्गतां गृहम् ।
राजा राज्ञी च तत्काले प्रसन्नौ तौ बभूवतुः ॥८५॥
सुसज्जितं स्वं शयनाय कक्षम्,
गतां स्वपत्या सह तां स्वपुत्रीम् ।
विलोक्य राजा सुतमेकमैच्छत्,
तयोर्भवेद् यस्त्विह काशिराजः ॥८६॥
कविः—राजेश-गौरवमिश्रौ तनूजौ,
पुत्री मदीया प्रतिभा च सर्वे ।
विवाहरचनामेतां निशम्य,
मात्रा समं श्रीमत्या प्रसन्नाः ॥८७॥

महामना मालवीय महाविद्यालये निजे ।
स्वामिना डालचन्द्रेण युक्तः संस्कृतसेवने ॥८८॥
मयराष्ट्रे जनपदे खेकड़ानगरे वासं कृत्वा,
पतिपत्नीविवादशतकं संस्कृतहिन्द्योर्विरचितवान् ।
काव्यकथोपन्यासरचयिता रामकिशोर मिश्र इह,
विद्योत्तमाकालिदासीये त्वष्टमसर्गं कृतवान् ॥८९॥

विद्योत्तमाकालिदासायम्

नवमः सर्गः

मिथुन-मेलन-शर्वरी ।

कविः—कक्षं प्रविष्टौ सह दम्पती तौ
सम्मानितौ भूपतिसेविकाभिः ।
सङ्केतितौ तौ शयनाय ताभि—
र्निर्मक्षिकं स्थानमथो कृतं तत् ॥१॥

पर्यङ्क एकोऽत्र सुसज्जितोऽभूद्
आसन्दिके द्वे अपि तत्र चाऽऽस्ताम् ।
पौष्पेण गन्धेन सुदीपदीप्त्या,
कामप्रदश्चित्तहरः स कक्षः ॥२॥

नेत्रेण विद्योत्तमया पतिः स्वः,
सङ्केतितो गन्तुमसौ स्वशय्याम् ।
आसन्दिकायामुपविष्टवांश्च,
गत्वा न शय्यां स हि कालिदासः ॥३॥

विद्योत्तमा—देव ! प्रसन्नो भव, गच्छ शय्यां,
कालाद् बहोः पूरय मे च कामम् ?
मौनं त्यजेयं मेलस्य रात्रि—
र्वार्तारसेन प्रणयेन नेया ॥४॥

कालिदासः—शय्या क्व मे देवि ! शयीय यत्र,
पर्यङ्क एकः पतितोऽयमत्र ।
स स्याद् भवत्या, असि राजपुत्री,
नो राजपुत्रोऽस्मि, न तस्य योग्यः ॥५॥
विद्योत्तमा—त्वं लोकमान्यो नृपपुत्रतुल्यो
राज्ञः सुतेयं तव धर्मपत्नी ।
पर्यङ्क एषोऽस्ति विभूषितस्ते,
भोग्यस्त्वया यो हि मयैव सार्धम् ॥६॥
कालिदासः—पर्यङ्कयोग्याऽसि महीशपुत्रि !
नित्यन्त्वहं देवि ! शयेऽधिखट्वम् ।
तत्त्वं स्वपर्यङ्कमयेस्तु खट्वाम्,
आनीय मे देहि च, रात्रिरेति ॥७॥
रात्रीयमेकाकिजनस्य नैव,
रम्या निशा नौ मिथुनेन नेया ।
पर्यङ्कमागच्छ मया च सार्धम्,
मां पश्य मे लोचनयोः सुखन्ते ॥८॥
कालिदासः—प्रेक्षे त्वदीयं नयनन्तु वामं,
पश्यामि नेत्रं त्वपि दक्षिणन्ते ।
किञ्चिन्न ते लोचनयोर्विलोके,
किं चक्षुषोस्ते वद मां प्रिये ! मे ॥९॥
विद्योत्तमा—रागं न तं पश्यसि येन लोके,
त्वामत्र शय्यां चलितुं ब्रवीमि ।
किं कामशास्त्रं पठितं त्वया नो ?,
जानासि नारीङ्गितमङ्ग ! किन्न ?॥१०॥

कालिदासः— शास्त्रं तु नाऽधीतमये ! मया तत्,
वाञ्छाम्यधीतुं त्वदहं तु विद्याम् ।
विद्योत्तमा— विद्यां च तां शिक्षयितुं समीहे,
पर्यङ्कमायासि समं मया न ?॥११॥
कालिदासः —मामीहसे शिक्षयितुं यदि त्वम्,
तद् गच्छ पर्यङ्कमयामि सार्धम् ।
कविः— साऽपि प्रसन्ना पतिपाणिहस्ता
प्राप्ता स्वशय्यां मिथुनस्य योग्याम् ॥१२॥

विद्योत्तमा नूतनयौवना सा,
मुग्धं प्रियं पश्यति तं पतिं स्वम् ।
वर्णान् गुरोः शिक्षितुमीक्षते स्म,
तस्या मुखं यो नवशिष्यतुल्यः ॥१३॥

कालिदासः—पाठं क्रमध्यापयितुं ब्रवीषि ?
विद्योत्तमा— कामस्य पाठं पठ देव ! कामम् ।
कालिदासः— अध्याययेस्तं, पठितो मया न
येनैव तज्ज्ञोऽपि भवेयमद्य ॥१४॥
विद्योत्तमा—विद्वान् भवानस्ति हि दर्शनस्य,
ज्ञातापि शास्त्रस्य न तस्य किन्तु ।
वात्स्यायनो यस्य ऋषिः प्रणेता,
नज्ज्ञो जनः सृष्टिविधे विधाता ॥१५॥

तस्य प्रपाठेन रसः प्रसूतः,
सर्वान् जनान् मादयतीह पीतः ।
पीतस्त्वया किं स ?
कालिदासः— मया न पीतः,
विद्योत्तमा—पिपाससि त्वं प्रिय ! तं रसं किम् ?॥१६॥

कालिदासः– कोऽसौरसः ? पापय तं प्रिये ! माम्,
पेयस्य री ! तस्य पिपासुरस्मि ।
विद्योत्तमा—आगच्छ पार्श्वं पिब तं रसं रे !
पार्श्वे तु मे तस्या रसस्य कुम्भौ ॥१७॥
कालिदासः—कुम्भौ रसस्य क्व च दर्शये र्माम्,
कस्मिन् प्रकोणे सरसौ स्थितौ तौ ?
विद्योत्तमा— वक्षस्थितौ पश्यासि मे न कुम्भौ ?
यौ जीवनीयेन रसेन पूर्णौ ।॥१८॥
एतौ हि सर्वः पिबतीति लोकः,
प्रेम्णा गृहीत्वा स्वकरद्वयेन ।
एत्य त्वमग्रे नय मां स्वपार्श्वे,
पीत्वा रस तं शमयेः पिपासाम् ॥१९॥
कालिदासः—वक्षःस्थले ते तु कुचौ, न कुम्भौ
बालः स्तनौ तौ पिबति स्वमातुः ।
विद्योत्तमा— यूना च पत्या हि कुचौ स्वपत्न्याः
विमर्दनीयौ भवतः कराभ्याम् ॥२०॥
कालिदासः – इच्छाम्यहं पातुमपः क्व कुम्भः ?
आर्ये ! पिपासा बहु बाधते माम् ।
विद्योत्तमा— आगच्छ पार्श्वं प्रणयं कुरुष्व
पीत्वाऽधरं मे कुरु तां च दूरे ॥२१॥
कविः—नारीप्रभावानवगन्तुमज्ञो,
नासीत्समर्थः स तु कालिदासः ।
कामप्रसारो न हि तत्र यूनि,
ज्ञानेन बद्धो भवतीति सोऽपि ॥२२॥

तज्ज्ञानतन्तो र्न विकास आसीत्,
कामस्य यस्माद् भवति प्रभावः ।
आसक्तिमुन्मादमनेन धत्त,
कामी स्वनारीं प्रति कामभावम् ॥२३॥

नोत्पद्यते यूनि जने स याव—
च्चित्तप्रचाञ्चल्यदकामतन्तुः ।
तावत्समाकर्षति तं न नारी,
सौन्दर्ययुक्तापि मनोहरापि ॥२४॥

विद्योत्तमा सा युवती नवोढा,
सौन्दर्यकान्त्या रतिकामरूपा ।
चेतांसि यूनां हरते स्म या सा,
जेतुं मनोऽज्ञस्य न तस्य शक्ता ॥२५॥

स्यात्सा निशाऽस्यां प्रथमा जगत्यां,
यस्यां न पत्नी पतिमेलमाप ।
रात्री द्वयोः सा मेलस्य यस्यां,
मेलं लभेते निशि दम्पती स्वम् ॥२६॥

सा राजपुत्री रतिरक्तनेत्रा,
मुग्ध पतिं सन्ततमीक्षते स्म ।
चाञ्चल्यमासीन्न तु तस्यकाये,
प्राप्तुं च पत्नीं न स कामभावः ॥२७॥

उष्ट्रस्तदैकश्च चकार शब्दान्
उक्तः स पत्न्या, वद, कस्य नादः ?
कालिदासः— जानासि नोट्रं ? स करोति शब्दान्
विद्योत्तमा— उष्ट्रस्त्वयाऽयं कथमुक्त उट्रः ? ॥२८॥

कालिदासः— उष्ट्रः स,वक्त्रस्खलितं क्षमस्व ।
विद्योत्तमा— विद्वानसि त्वं कुरु षस्य लोपम् ।
उच्चारितं यत्स्वमुखेन, सूत्रै—
स्तस्यैव सिद्धिं कुरु भोः ! पदस्य ॥२९॥
कालिदासः- सूत्राणि जानामि न राजपुत्रि !
विद्योत्तमा— विज्ञो भवान् दर्शनशास्त्रवेत्ता ।
नाऽध्यैत किं व्याकरणं सशब्दम् ?
त्वच्छ्रोतुमिच्छामि तदुट्रसिद्धिम् ॥३०॥
लज्जां न कुर्याः प्रिय ! रात्रिरेषा,
वार्ताप्रसारेण हि यापनीया ।
जानामि ते दार्शनिकेङ्गितैस्तै —
र्वैवाहिकोऽयं क्षणिकोऽस्ति मोदः ॥३१॥
दाम्पत्यधर्मे न रतोऽसि तस्मात्,
शास्त्रस्य वार्तां कुरु येन शय्या ।
विद्यास्थली स्याद् रमणस्थलीयं,
सूत्रैस्तदुट्रस्य कुरुस्व सिद्धिम् ॥३२॥
कालिदासः— त्वं मेऽसि पत्नी, कथयामि सत्यम्,
अध्यैषि शास्त्रं किमपि प्रिये ! न ।
मान्याऽसि विज्ञैर्विदुषी त्वमेव,
नाहं प्रिये ! दर्शनशास्त्रवेत्ता ॥३३॥
ये पण्डिताः सन्ति पराजितास्ते,
तैर्घोषितो विज्ञवरोऽस्मि मौनी ।
त्वां प्रेरितोऽहं परिणेतुमार्ये,
तद्विद्यया बोधय मां बुधः स्याम् ॥३४॥

विज्ञे ! च मां शिक्षय कामशास्त्रं,
जानासि तत्त्वं मम पार्श्वमेहि ।
सौख्यप्रदा त्वं भव कामशय्या,
येन द्वयोः स्यादवतारलाभः ॥३५॥

विद्योत्तमा—हासं करोषि प्रिय ! किं ब्रवीषि ?
सत्यं वचस्ते किमु तद् यदुक्तम् ।
अज्ञोऽसि विश्वासमहं न कुर्वे,
प्रश्नोत्तराणि त्वमदाः कथं मे ?॥३६॥

कालिदासः—तत्र प्रिये ! काऽऽस्त विशेषवार्ता ?
प्रश्ना यथाऽऽसन् हि तथोत्तराणि ।

विद्योत्तमा—प्रश्ना ममाऽऽसन् प्रिय ! कीदृशास्ते ?
तात्पर्यमासीद् वद किं हि तेषाम् ?॥३७॥

कालिदासः—तद् बोधये त्वां त्वमदर्शयो माम्,
एकाङ्गुलिं देवि ! ययेहलोके ।
कर्तुं त्वमैच्छो मम नेत्रवेधं,
शुभ्रे ! न तं सोढुमशक्नवं भोः !॥३८॥

तस्योत्तरेऽहं तु निजाङ्गुलिभ्यां,
द्व लोचने ते ह्यपि वेद्धुमैच्छम् ।
तं मे च सङ्केतमवेक्षमाणा,
तुष्टा त्वमासीः परिपूर्णकामा ॥३९॥

विद्योत्तमा—प्रश्नोत्तरे ते त्वयमस्तिभावः,
आश्चर्यमस्ति प्रबुधस्त्वमासीः ।
प्रश्ने द्वितीये तव को विचार -
स्तं श्रोतुमिच्छामि च ते मुखेन ॥४०॥

कालिदासः—तस्मिंस्तु काले प्रति मां स्वहस्तः,
उत्थापितः पञ्चनखस्त्वया सः।
त्वं मे कपोलावधिकर्तुमैच्छः,
स्वीयैश्चपेटैर्हि कृतैश्च येन ॥४१॥
मुष्टिस्तदा मे पतितुं सहैच्छत्,
पृष्ठे त्वदीये तव मस्तके वा।
दृष्ट्वा च यां त्वं परमा प्रसन्ना,
सन्तुष्टिरस्यां तवै सेति जाने ॥४२॥
सत्यं मदुक्तं हृदयेन विद्धि,
भूतञ्च यत्किञ्चन तद्धि सत्यम्।
वैवाहिकं बन्धनमावयोर्हि,
तत्पालनीयं प्रणयश्च कार्यः ॥४३॥
विद्योत्तमा—ज्ञाते त्वया साधु ममेङ्गिते नो,
जानामि-मूर्खोऽसि, न तत्र शङ्के।
पूर्णा प्रतिज्ञा मम नाऽऽस्त तत्त्वाम्,
अङ्गीकरोमि स्वजितं पतिं न ॥४४॥
कालिदासः—विज्ञोऽहमज्ञोऽस्मि च वाऽस्मि सुज्ञो,
विद्वानहं वा परमोऽस्मि मूर्खः।
कोऽप्यस्मि यः सोऽस्मि पतिस्तवाऽस्मि
मान्यस्त्वया जीवनसाधकोऽहम् ॥४५॥
आगच्छ पार्श्वं पतिरस्मि ते स,
ह्योऽभूद्धि ते येन समं विवाहः।
त्वं यासि साध्वी त्ववरा च कान्ते !
पत्नी मदीयासि विवाहितासि ॥४६

त्वां प्रेक्ष्य पार्श्वे हृदये मदीये,
संजायते चञ्चलता च काऽपि ।
त्वं सुन्दरी मां प्रतिभासि जाये !
आयाहि मां पूरय मे च कामम् ।।४७।।

विद्योतमा—रे मूर्ख! शय्यां त्यज गच्छ दूरं,
योग्योऽसि न त्वं मम पार्श्वमेतुम् ।
राज्ञः सुताऽहं विदुषी प्रसिद्धा,
तस्याश्च पत्या विदुषैव भाव्यम् ।।४८।।

कालिदासः—दूरं न गच्छेः प्रणयस्य काले,
नायासि पार्श्वं हि कथं ममाऽऽर्ये !
सङ्गो मदीयस्तव जीवनस्य,
यस्मादृते सार्थकता न ते स्यात् ।।४९।।

विद्योतमा—मूर्खोऽसि सामान्यबुधोऽपि न त्वं,
तत्पण्डितै मौंनवुधः कृतोऽसि ।
तत्रैव गच्छेः न्यवसो हि यत्र,
निर्गच्छ कक्षाच्छयनादधोऽय ।।५०।।

कालिदासः—स्वामी तवाऽहं मम सासि पत्नीं,
यस्या विवाहो हि मया सहाऽभूत् ।
पत्युस्त्वया मानतति विधेया,
पत्न्याः पतिर्वै परमेश्वरोऽस्ति ।।५१।।

मूर्खोऽस्मि नाहं मयि सोऽस्मि बोधो,
येनेह सांसारिककर्म कुर्वे ।
किन्ते प्रियं तत्करवाणि कान्ते !
कान्तोऽस्मि तेऽहं कुरु तस्य मानम् ।।५२।।

विद्योतमा—मूर्खोऽसि न त्वं यदि वेदये माँ,
किं वृद्धिरादैच् विदधाति कार्यम् ?
वागीशसिद्धि वद सूत्रमुक्त्वा,
कः सन्धिविच्छेद उमेश शब्दे ?५३॥

कालिदासः—सूत्रं न सांसरिककार्यसिद्धि -
स्तस्मात्तदध्यैसि न शब्दशास्त्रम् ।
जानामि किञ्चित्स्वकृतानुरूपं,
तद् ब्रूहि किन्ते प्रियकर्म कुर्याम् ?॥५४॥

विद्योत्तमा—यत्त्वं करोषि स्म गुरोः कुले तद्,
रे पण्डितम्मन्य ! समं प्रशंस ।

कालिदासः— काष्ठानि कृन्तामि वनानि गत्वा,
तत्कर्तुमर्होऽस्मि तवापि कान्ते !॥५५॥

विद्योत्तमा—कान्ते ! प्रिये ! मां गदितुं न योग्य-
स्त्वं मूर्ख ! मन्यस्व न मां स्वपत्नीम् ।
गच्छ त्वमस्माच्छयनस्थलान्मे,
मौर्ख्यप्रचारं कुरु राजपुत्र्याः ॥५६॥

जानन्तु सर्वे स्खलितं च मे तद्,
विज्ञैर्जितैः कल्पितपण्डितेन ।
सार्धं स्वसङ्केतित शास्त्र चर्चा,
याऽङ्गीकृता सा मम वञ्चनाऽऽसीत् ॥५७॥

तेषां बुधानां प्रतिशोध एष,
मन्ये हि मत्तः प्रपराजिता ये ।
तैः कारितो मौनबुधेन साकं,
यो मे विवाहस्तमहं न मन्ये ॥५८॥

मूर्खस्य सङ्गेन बुधोऽपि मूर्ख—
स्त्वज्ञोऽपि सुज्ञः क्रियते बुधेन ।
नारी समानेन नरेण भाति,
शोभामितस्तत्र समानधर्मौ ॥५९॥

यः शब्दशास्त्रं न च वेदविद्यां,
काव्यान्यधीते न च योऽर्थशास्त्रम् ।
लोकेऽस्ति तुल्यः पशुना जनः स,
ह्यन्नानि यः खादति तादृशस्त्वम् ॥६०॥

तद् गच्छ पश्यन्तु जनाः पुरे त्वाम्,
विद्योत्तमायाः पतिरेष आसीत् ।
त्यक्तस्तया मूर्खतया स तस्याः,
पत्या च भाव्यं विदुषा प्रणेन ॥६१॥

कक्षाद् द्रुतंनिस्सर मूर्ख ! मन्ये,
न त्वां पतिं मे शयनं जहीहि ।
नो यास्यसि त्वं नृपमाह्वयामि,
निर्वासनं स्यात्तव येन देशात् ॥६२॥

कालिदासः—त्वं भारतीयासि पतिव्रतासि,
पत्न्याश्च धर्मं परिवेत्सि सम्यक् ।
मन्यस्व मां ते पतिरस्मि कान्ते !
तस्मादवज्ञां न धवस्य कुर्याः ॥६३॥

विद्योत्तमा—विद्यां पठेरिच्छसि चेत्स्वमानं,
विद्वांश्च भूत्वा मम पार्श्वमेहि ।
विद्योत्तमां मां जय विद्यया त्वं,
मंस्ये पतिं त्वां व्रज शिक्षणाय ॥६४॥

अस्ति प्रतिज्ञा मम, यो हि विद्वान्,
मां विद्यया जेष्यति, मे पतिः सः ।
तद् गच्छ विद्यामधिगन्तुमङ्ग !,
कुर्वे त्वदीयाऽऽगमनप्रतीक्षाम् ॥६५॥

कालिदासः—अस्तु प्रिये ! यामि गुरोः कुलं तद्,
यस्मादिह त्वां परिणेतुमागाम् ।
त्वामागमिष्यामि गृहीतविद्यो,
दूरे न कुर्या मनसः स्मृतिं मे ॥६६॥

विद्योत्तमा—तुभ्यं सुबुद्धिं सुमुखो ददातु,
मार्गस्त्वदीयश्च शिवो हि भूयात् ।
रक्षन्तु देवास्तव कायमेनं,
सा शारदा स्यात्तववक्त्रवाणी ॥६७॥

कविः—पत्न्या त्यक्तः पतिर्मूर्खो गुरुकुलं जगाम सः ।
विद्योत्तमा तदा जाता चन्द्रहीना विभावरी ॥६८॥

कवे ! किं लिखसि ? कवे ! किं लिखसि ? इत्युक्त्वा मे जनको,
गुनगुनायमानं मां दृष्ट्वा मनसा बहु हर्षितवान् ।
पद्यगद्यकाव्यादिकवयिता रामकिशोर मिश्र इह,
विद्योत्तमा कालिदासीये नवमं सर्गं कृतवान् ॥६९॥

विद्योत्तमा-कालिदासीयम्

दशमः सर्गः

गुरुशिष्य वार्ता ।

कविः— छन्दसि छन्दसि तथा पादा, एकैकाक्षरेणैधन्ते ।
तथैव निशि तस्य तौ चरणौ,पथि विपिनं प्रत्यवर्धेताम् ॥१॥

गुरुकुलं तदसावगमत्ततो,
नृपसुतां परिणेतुमगाद्यतः ।
तमवदन् प्रमुखाः सहपाठिनः—
कथय राजसुताविषयं सखे !॥२॥

कालिदासः— किम्,
वः ।
ब्रू—
याम् ॥३॥

विद्यार्थिषु पवनदेवः—यत्ते,
भूतम् ।
तत्त्वं,
ब्रूहि ॥४॥

कालिदासः—उक्तोऽहम्,
पत्न्या मे ।
कक्षान्मे
गच्छ त्वम् ॥५॥

सोमदासः—तदोक्तं किम्,
त्वया मित्र !
कालिदासः— पतिस्तेऽहम्,
कथं ब्रूषे ?॥६॥
रामदासः—साऽपि पुनस्त्वाम्,
किं किमवोचत् ?
तद् वद सर्वम्,
यत्तव सत्यम् ॥७॥
कालिदासः—श्रूयतां मित्र ! तद्,
यत्तया जल्पितम् ।
कोऽपि दोषो न मे,
स्यात्स चेत्कथ्यताम् ॥८॥
चन्द्रदेवः—तत्र कः स्यात्ते दोषः ?
सा तवाऽपश्यच्छायाम् ।
किन्त्वया मौनं त्यक्तम् ?
येन सा त्वामज्ञासीत् ॥९॥
कालिदासः—वाणी तव सखे ! सत्या,
मूर्खस्त्वमिति साऽवादीत् ।
विज्ञाऽस्मि विदुषा पत्या,
भाव्यं गुणवता यस्याः ॥१०॥
पवनदेवः—विदुषा त्वया भवितव्यम्,
निकषा गुरुञ्चल मित्र ।
भव बुद्धिमान् पठ विद्याम्,
सुलभा त्वया विदुषी सा ॥११॥

कविः—साकं तैः सहपाठिभिस्ततः,
वार्तालापरसं पिबन् गतः ।
आचार्यं शिवनाथमागमत्,
नत्वा स प्रणनाम तं गुरुम् ॥१२॥

शिवनाथः –जीव चिरं वद भोः ! कुशलन्ते,
श्रावय राजसुताविषयं माम् ।
तत्पतिरस्ति भवान्नृपहर्म्यम्,
ताञ्च विहाय वनं कथमागात् ? ॥१३॥

कालिदासः—पूज्यगुरो ! सा तु मामध्यापयन्नो,
भूपतिहर्म्यात्तया निष्कासितोऽहम् ।
मूर्खवरस्त्वं बुधाऽहं मे पतिस्तु,
विज्ञवरः स्यादितो गच्छ त्वमुक्त्वा ॥१४॥

शिवनाथः—तव मूर्खता सा विज्ञाता कथं तया ?
वद तत्र मौनं त्यक्तं किं स्वकं त्वया ?

कालिदासः— स्खलितैर्मुखान्मे वर्णैः कैश्चिदक्षरै—
रबुधच्च रूपं मे मौनावृतं हि सा ॥१५॥

शिवनाथः—उक्तं तया वद पुनः किमु मौनबन्धो !
मौनं न रक्षितमतस्तदियं समस्या ।

कालिदासः— 'मन्ये न मूर्खपुरुषं स्वपतिं व्रजेतः,
तैर्वञ्चिताऽस्मि विजितैः प्रबुधैश्छलेन ॥१६॥

शिवनाथः—किमुक्ता त्वया राजपुत्री स्वपत्नी पुनः सा ?

कालिदासः— तवाऽहं पतिर्येन सार्धं विवाहस्तवाऽभूत् ।
बुधोऽहं न चेत्पाठयेर्मां बुधं मां च कुर्याः ।
गुरो! नो तया पाठितोऽहं तु निष्कासितश्च ।१७।

शिवनाथः—किं त्वं कामयसे वद कामं ज्ञापय मां प्रिय !
सङ्कोचं त्यज वत्स ! तु शीघ्रं ब्रूहि विवाहित !
विज्ञं मां कुरु पाठय विद्यां स्मारय तां द्रुत—
मीहे द्रष्टुमहं बुधमात्मानं गुरुदेव ! हि ॥१८॥

शिवनाथः—
त्वं तां विद्यां पठ हि सततं यया च बुधो भव,
जित्वा वाचा नृपदुहितरं गृहं नय शिष्य ! ताम् ।
पाणेः रेखा प्रकटयति ते कवि र्भवितासि यत्,
तच्छन्दानां रचननियमान् विधिं पठ छन्दसाम् ॥१९॥

कालिदासः—
छन्दोयुक्तं कतिपयदिवसैः पठ्यते शब्दशास्त्रम् ?
तत्सर्वं मां गुरुवर ! सततं शिक्षयेस्तद्विधानैः ।
येनाऽहं स्यां कविरिह च बुधां प्राप्नुयां तां स्वपत्नीम्
तत्प्रश्नानां स्वकृतरचनया पूज्य ! देत्वोत्तराणि ॥२०॥

शिवनाथः—
त्वदीया सा पत्नी स्वविजितबुधनामकरोदवज्ञाम् ।
तया भूयस्तस्य कृतमवज्ञानं पतिरस्ति योऽद्य ॥
परं त्यक्तोऽसि त्वं तदपि नृपपुत्रीं कथमीहसे ताम् ?
शठे शाठ्यं कुर्यादितिनयवशेन त्वमपि त्यजेत्ताम् ।२१।

कालिदासः—
गुरुदेव ! सा विदुषी यया पतिमानसं न विलोकितम्,
पतिरस्मि सा रमणी हि मे कथितस्तयाऽस्तु बुधः पतिः ॥
भविता गुरो ! स पति र्महान् यमसौ बुधं पतिमीहते ।
तदभीष्टमेव पतिं स्वकं गुरुदेव ! कर्तुमहं यते ॥२२॥

शिवनाथः—

प्रस्तुत्यस्ते विचारः प्रकटयति मुदं तस्याः प्रभावस्त्वयि ।
पत्न्या आकर्षणं तन्निपतति निशि यद् ग्रस्तस्त्वमज्ञोऽपि किम् ।
तस्यै दण्डं प्रदद्यास्तदपि मतिवरो भूत्वा त्वमिच्छे हि यत्,
यस्मात्कस्यापि पत्न्या स्वपतिपरिभवः कार्यः कदाचिन्नहि ॥२३॥

कालिदासः –

पूज्यगुरो ! मनसा प्रयतिष्ये पालयितुं कथितं तव धीमन् !
मामुररीकुरुते न पतिं सा ज्ञेन मया वचनं तव कार्यम् ।
पाठय मां निगमान् कविकाव्यं व्याकरणञ्च हि येन बुधः स्याम्,

शिवनाथः—

कामयसे यदि शर्म निजं तत्पालय मे कथनं कथये यत् ॥२४॥

कालिदासः—

हे गुरुदेव ! मया तव जल्पितमत्र कदा न कृतं कथयस्व ?
किं करवाणि हि शर्मकरं तवकर्म तु येन भवेत्त्वदभीष्टम् ॥

शिवनाथः -

वत्स ! यथेच्छमितो व्रज नात्र वसे नृपति र्जनकस्तव पत्न्याः ।
बालिशतामवगन्तुमलं तव नैव भवेत्स तयाऽत्र विसृष्टः ॥२५॥

कालिदासः—

विवाहितयाऽपि तया मम पत्न्या प्रेषितजनको मम च श्वशुरः ।
स मामवगन्तुमिहात्रभवन्तं श्री गुरुमुपयास्यति किं भगवन् !

शिवनाथः—

यदाऽवगमिष्यति ते श्वशुरो यत्तस्य न दुहितुः पतिरस्ति बुधः ।
तदैव स मामुपयास्यति राजा ते मतिमवगन्तुमये ! शृणु माम् ।२६।

कालिदासः–
विवक्षसि यद् गुरुदेव ! वचस्तत्पातय मुखतो मम कर्णगुहायाम् ।
शिवनाथः—
स मां कथयिष्यति बालिशमुक्त्वा मौनमतिवरं प्रबुधं भवता तम् ॥
कृतो दुहितुर्मम छद्मविवाहो मूर्खवरजनेन समञ्च कथं तत् ?
अवेहि वचो मम, गच्छ यथेच्छं, येन परिचयस्तव नात्र भवेद्धि ॥२७॥
कालिदासः—
गुरुदेव ! भवद्वचनं विदधामि विहाय पुरं भवतोऽहमयामि च ।
शिवनाथः—
कथयामि हितं तव वत्स ! नृपस्तव बन्धनमर्हति कर्तुमिहैव च ॥
त्वमितो व्रज पर्यट देशपुराणि च येन सुबुद्धिमवाप्नुहि वत्स ! हि ।
कुरु तत्र यथेच्छमये ! पठनं प्रबुधो भव येन सुतां नृपतेर्जय ॥२८॥
कालिदासः—
अयिगुरुवर ! यदाऽहं भविष्यामि विद्वान्,
तदा मां पतिं मंस्यते सा स्वसेव्यम् ।
ममवचनमवधेयं त्वया पूज्य ! तस्याः
परित्यागकालोऽपि तावद् भवेत्सः ॥
अनुनयमपि करोतीह यावन्न मे सा,
सुतां भूपतेस्तां तु पत्नीं न मंस्ये ।
अयमिह शृणु तदर्थं तु पर्याप्तदण्डो
य आवश्यकोऽस्माद् बहुर्नोचितोऽस्तु ॥२९॥
शिवनाथः—पठ गुरुविद्यामपनय मौर्ख्यम्,
कथयसि यत्त्वं खलु कुरु तत्त्वम् ।
कालिदासः— गुरुवर ! यामि द्रुततरगतया,
मम यदभीष्टं तदिह करिष्ये ॥३०॥

कविः—

इदमासीत्तस्य भाग्यं तद्,
येन स ह्यस्तद्वरः कृतः ।
परमद्य स तया त्यक्तो,
नगराण्यटितुमुद्यतः ॥३१॥

समय ! ते बलवत्परिवर्तनं,
यदिह कञ्चन जीवयति क्षणे ।
तदपरं च निहन्ति जनं तथा,
गतिरियं जगतः परिवर्तते ॥३२॥

कलकलो मधुरः सरिदम्भसां,
कलरवो मधुरश्च विहायसाम् ।
विपदि स त्वशुभो ह्यवगम्यते,
रव इवेह शिवामुखनिस्सृतः ॥३३॥

तिमिरमद्य चतुर्दिशि दृश्यते,
नरपतेः सुतयाऽप्युदिते रवौ ।
तदरुणो जलदै र्हि वृतो यतो,
द्युतिकरान् पथि कामयते स्म सा ॥३४॥

यस्य जनस्योन्नतिमभि,
भवति वर्तमाने सन्ततमाशा ।
यदि सोऽवनयति तस्य,
तिमिराच्छन्नं जगत्सर्वम् ॥३५॥

असफलस्त्वमसफलस्त्वम्,
इति शब्दाः पतन्ति तस्य कर्णयोः ।
भवति तत्फलानुभविनो,
हृदि किमसुखं को नु जानाति ? ।।३६।।

दैवीयं मानुषी वा,
संघटिता घटना, तां नहि जाने ।
अथवा संस्कारोऽयं,
येन पतिपत्नीवियोगोऽभूत् ।।३७।।

विद्योत्तमाऽद्य नासीत्—
प्रसन्ना, कालिदासोऽपि दुःखी न ।
ततः सा पतिवियोगं—
याति स्म, स तु विद्यायोगम् ।।३८।।

स तद् गुरुकुलं त्यक्त्वा,
राजभयात्काशीतो वहिर्ययौ ।
विवाहात्पश्चात्कोऽपि,
न तं द्रष्टुमलमभूत्तत्र ।।३९।।

कविः—पत्न्या सुशीलया श्रीमत्या देव्या प्रेरितः कविः,
त्यागपत्रनिरासमिति नाटकमष्टाङ्कं विरचितवान् ।
होतीलालकलावतीसुतो रामकिशोर मिश्र इह,
विद्योत्तमाकालिदासीये दशमं सर्गं कृतवान् ।।४०।।

विद्योत्तमाकालिदासीयम्

एकादशः सर्गः

पुत्रीविषये पितुश्चिन्ता ।

कविः—

चित्तं प्रसन्नं राज्ञः समासीद्,
यत्तस्य पुत्री पतिसङ्गताऽऽसीत् ।
या स्वं पतिं विद्वांसं समैच्छत्,
लब्धस्तया मूर्ख इदं न ज्ञातम् ॥१॥

परं न कालं जानाति कोऽपि,
मूर्खं बुधं यः समये करोति ।
भवेच्च विपरीतं यस्य दैवं,
तद् बुद्धिमन्तं विदधाति मूर्खम् ॥२॥

तत्क्षेममवगन्तु प्रेषिता तां,
परिचारिका तज्जनकेन निकषा ।
विज्ञाय वृत्तं राज्ञः सुतायाः,
व्यज्ञापयत्सा राजानमित्थम् ॥३॥

कुशलिका—

राजन् ! सुता ते विद्योत्तमा सा,
खिन्ना स्वकक्षे तिष्ठति सशोका ।
तस्याः पतिर्दर्शनमर्मवेत्ता,
मौनी स विज्ञोऽपि तु तत्र नाऽस्ति ॥४॥

काशिराजः—पृष्टं त्वया किं कुशलं न तस्याः ?
त्वमितो यदर्थं हि विसर्जिताऽऽसीः ।
एकाकिनी किं साऽऽसीत्स्वकक्षे ?
दृष्टिस्त्वया निक्षिप्ता न वेति ॥५॥

कुशलिका—जाने, पतिस्तस्याः क्वापि यातः,
तस्यैव विषये सार्धं जनन्या ।
विवर्णवदना सा खिन्नचित्ता,
वार्त्तां करोति स्म विषण्णहृदया ॥६॥

काशिराजः—किंतत्र राज्ञी दृष्टा त्वया भोः !
कुशलिका— आं, तत्र राजन् ! राज्ञी गताऽऽस्ते ।
काशिराजः— किञ्चिन्न साऽकथयत्त्वां सुभद्रे !
दृष्टं त्वया यद् वर्णय समस्तम् ॥७॥

कुशलिका —कक्षं प्रविश्याऽपश्यं तु राज्ञ्या,
हस्तः शिरस्यासीद् राजपुत्र्याः ।
रम्यञ्च मुखकमलं भूप ! तस्याः,
दिवसे रवावुदिते म्लानमासीत् ॥८॥

दृष्ट्वा च मामवदद् राजमहिषी,
गच्छेः कुशलिके ! राजानमानय ।
भवता च गमनीयं तत्र राजन् !
राज्ञ्या भवानधुनैव स्मृतोऽस्ति ॥९॥

काशिराजः—गच्छामि भद्रे ! कस्मिन् स्वकक्षे
विराजते सा साकं जनन्या ।
पन्थानमालोकय तं च शीघ्रं,
येनेह तद्दुःखं दूरयामि ॥१ ॥

कुशलिका—आयाहि राजन् ! सार्धं मयैवम् ।
अग्रेऽस्म्यहं पश्चादाव्रज त्वम् ।
कविः— इत्थं स सेविकया सह जगाम
विद्योत्तमायाः प्रासादकक्षम् ॥११॥
राज्ञी—जय जय भर्तस्त्वं जनहितकर्ता,
धर्मं धर्ता प्रजादुःखहर्ता ।
तथापि राजन् ! तावककुटुम्बिनो,
वयं हि सर्वे धनिनोऽपि दुःखिनः ॥१२॥
किमस्ति दुःखं ते तच्च ज्ञापय,
त्वमस्य काशीभूपस्य राज्ञी ।
सकोऽस्ति यस्ते वार्तां न मन्यते,
तं दण्डयिष्यामि यदिच्छसि त्वम् ॥१३॥

वाण्या निषेधादिह कः स्वजिह्वां,
शीर्षस्य कम्पादपि कन्धरां कः ?
कार्यस्य प्रतिषेधात्पाणिपादम्,
स्थानात्पृथक्कारयितुं क इच्छेत् ॥१४॥
राज्ञी—एतादृशः कोऽपि न किङ्करो नः
समीहते दण्डं तादृशं यः ।
काशिराजः—पुनश्च तुभ्यं दुःखं किमस्ति ?
कथयस्व तदहं दूरीकरिष्ये ॥१५॥
राज्ञी—पश्यति भवान् मम दुहितुः किमस्या—
स्तदाननं यत्पङ्कजमिवाऽऽसीत् ।
तदद्य दर्शयते न प्रसादम्,
अस्या विषादेन हि दुःखिताऽस्मि ॥१६॥

वराजः – कथं विसण्णा तव पुत्रिकेयं,
प्रतिज्ञया पत्या सङ्गताऽपि ।
प्रदर्शनीयो हर्षोऽनयाऽद्य,
पुनर्विषादस्य तु कः प्रसङ्गः ?॥१७॥

राज्ञी—हर्षः क्व ? भवता त्वविचार्य राजन् !
क्षिप्ताऽन्धकूपे प्रियपुत्रिका मे ।
अस्याः पति र्येन विवाहितेयम्,
बुधः क्व सोऽद्यास्ति स मूर्खराजः ॥१८॥

युवाऽपि यो व्यवहारं न वेत्ति,
सांसारिकं पत्न्या सार्धमत्र ।
मौनी स ह्यज्ञो मम पुत्रिकायाः,
कथं करिष्यति कामं प्रपूर्णम् ?॥१९॥

काशिराजः—प्रतिज्ञया तव सुतया स विहितः,
कर्तुंविवाहं शास्त्रार्थयोगः ।
स दार्शनिकविद्वानस्ति भोगं,
पत्न्याः सुखं क्षणिकं मन्वते यः ॥२०॥

काशिराजः—विद्योत्तमा तस्य महत्त्वमेव.
जानाति भवती न ज्ञातुमर्हा।
ह्यो यदि सभायामभविष्यदेवं,
तन्नाऽवदिष्यद् दृष्ट्वेङ्गितानि ॥२१॥

राज्ञी—प्रतारणाऽऽसीत् सङ्केतयोस्तयो-
स्तेषां बुधानां तु पराजितानाम् ।
यैरज्ञमुद्घोष्य हि सर्वविज्ञं,
परिणायितेयं मूखण पुत्री ॥२२॥

मयि चेन्न विश्वासस्ते स्वपुत्रीं
पृच्छेः, स मूर्खोऽस्त्यथवा स विद्वान् ।
मौनेन मूर्खोऽपि विभूषते तथा,
यथा स्ववाचा समलङ्कृतो बुधः ॥२३॥

काशिराजः—वत्से ! द्रुतं वद प्रियपुत्रिके ! मां
किमस्ति ते मातुर्वाग्रहस्यम् ?
सत्यं न वा तद्वचनं सुविज्ञे !
जानासि सर्वं त्वमधीतविद्ये !॥२४॥

विद्योत्तमा—मातुर्वचसि काचिदसत्यता नो,
सा यद्वदति तदृतं सर्वमस्ति ।
पितः स विज्ञो न, न सुज्ञ आसीत्,
स सर्वथाऽऽसीदज्ञः प्रकृत्या ॥२५॥

काशिराजः—कथयेस्त्वमज्ञात्तस्मात्कथं वै,
पराजिता विदुषी ज्ञानवृद्धा ?

विद्योत्तमा— मौनावृतैस्तत्कृतैः सङ्केतैः,

काशिराजः— पुनस्तदज्ञत्वमबुधः कथं त्वम् ?॥२६॥

विद्योत्तमा—मौनं तदावरणं तात ! भवति,
येन स्वरूपं स सदाऽऽवृणोति ।
वाणी यदा निर्गच्छति तदास्यात्,
सा तद्रहस्यं प्रकटीकरोति ॥२७॥

काशिराजः—किं वार्तया तस्य च पण्डितत्वम्
अज्ञत्वमङ्गीकृतवत् सुपुत्रि !

विद्योत्तमा— आं तात ! रात्रौ वार्ताप्रसङ्गात्,
मौनं तदावरणं छिन्नभिन्नम् ॥२८॥

काशिराजः—क्वाऽऽस्ते स सम्प्रति तं माञ्च दर्शय।
विद्योत्तमा— पितः ! स हर्म्यान्निस्सारितो मया।
काशिराजः— निष्कासितस्त्वया स सुते ! ब्रवीसि किम् ?
विद्योत्तमा— प्रतिज्ञया पतिमज्ञं न मन्वे ॥२६॥
काशिराजः—सुते ! विवाहस्तव येन समभूद्,
मूर्खः स विज्ञोवाऽऽसीत्पतिस्ते।
शृणु भारतीया नारी सदैव,
पतिं स्वपरमेश्वरमेव मन्वते ॥३०॥
विद्योत्तमा—एतादृशाः सन्ति न मे विचाराः,
प्रतिज्ञया पतिमङ्गीकरिष्ये।
किं विस्मृतं ? शास्त्रार्थेन घोषितम्—
स मे पति र्यो जेष्यति गिरा माम् ॥३१॥
काशिराजः—प्रणः स्मृतस्ते परमत्र तेन,
शात्रार्थविधिनैव जितासि पुत्रि !
सर्वैः सभासद्भि र्घोषितः स,
मौनी महादर्शनशास्त्रवेत्ता ॥३२॥
विद्योत्तमा—तत्तस्य मौनं कपटेन युक्तम्,
सोऽज्ञोऽपि विज्ञो विहितस्तु येन।
मध्ये तयोः स तु सुज्ञोऽपि नासीद्,
वाण्याऽस्य मौनावरणं निरस्तम् ॥३३॥
मौनी बुधो योऽस्ति न तस्य दोषः,
आचार्यवर्येण तु वञ्चिताऽस्मि।
तन्मौनशास्त्रार्थनिमित्तमेव,
मम स्वीकृति यन बलाद् गृहीता ॥३४॥

यदि मौखिक: शास्त्रार्थोऽभविष्यत्,
तदज्ञमौनी स न मामजेष्यत् ।
आचार्यसङ्केतितबोधनेन,
प्रतारिता तं प्रति कर्षिताऽस्मि ॥३५॥

काशिराजः—मन्ये, स मूर्खोऽपि पतिस्तवाऽऽसी—
न्निष्कासनीयो न गृहादतःसः ।
अध्यापने त्वं शक्ता हि तस्य,
नहि तदकरो र्यत्पत्नी करोति ॥३६॥

विद्योत्तमा— करोति पत्नी किं ब्रूहि तन्माम् ।
काशिराजः— शृणु, सा सदा सहयोगं करोति ॥
तमशिक्षयिष्यो यदि तत्त्वदीय—
स्तज्जीवने सहयोगोऽभविष्यत् ॥३७॥

अधुनापि तव भर्त्सनया स मौनी,
श्रमेण विद्वान् शक्नोति भवितुम् ।
त्यागस्त्वदीयस्तज्जीवनेऽयं,
विद्याप्रद: सौख्यप्रदः क्षणः स्यात् ॥३८॥

विद्योत्तमा—स मे समक्षं कृत्वा प्रतिज्ञाम्
गतो बुधीभवितुं क्वापि तात !
काशिराजः— तस्मिन् गते तव किञ्चिन्न दुःखम् ?
विद्यत्तमा— प्रणानुसारं मंस्ये पतिं तम् ॥३९॥

काशिराजः विज्ञं पतिं प्राप्तुं विज्ञपुत्रि, !
समयं प्रतीक्षस्व स्वजीवने तम् ।
यं प्राप्य स्वस्मिन् त्वं जीवनेऽग्रे,
प्राज्ञं पतिं प्राप्स्यसि किल ममाऽऽशीः ॥४०॥

तव पत्युरज्ञत्वं ज्ञातुमेष,
गच्छाम्यहं गुरुकुलमद्य बाले !
आगच्छ राज्ञि ! प्राणप्रिये ! मां,
सहैव गच्छावस्तत्र सुभगे ! ॥४१॥

राज्ञी—गच्छामि पित्रा सह तावकेन,
स्वधवस्य विषये चिन्तां न कुर्याः ।
दैनन्दिनं निजकार्यं कुरुष्व,
वर्तिष्यते पत्या सङ्गमोऽपि ॥४२॥

कविः—रथं समारुह्य स काशिराजो,
जगाम राज्ञ्या सह गुरुकुलं तत् ।
आचार्यकक्षं प्रविवेश शीघ्रम्,
तत्र स्थितं शिवनाथं ननाम ॥४३॥

विलोक्य भूपं विद्यार्थिभिः सह,
निजासनादुदतिष्ठद् गुरुः सः ।
सुस्वागतं कुर्वन् तस्य वाचा,
पुष्पैः सहाऽऽशीर्वादान् स चाऽऽस्यत् ॥४४॥

शिवनाथः—चिरंजीव राजन् ! गृहे च त्वदीये,
सुखं शान्तिरास्तां यशस्त्वं लभस्व ।
धनं वर्धयन्तु प्रजा मोदमाना–
स्तवारिर्विजेयस्त्वमक्रान्तराज्यः ॥४५॥

काशिराजः—महाराज ! राज्येऽस्मदीये भवानिह,
सुखं शान्तिमिच्छति हि नित्यं प्रजानाम् ।
परं मे सुताया विवाहस्त्वया ह्यः,
कथ कारितो मूर्खवर्येण साकम् ? ॥४६॥

शिवनाथः – तमज्ञं वदति कोऽत्र राजन् ! कथय माम् ।
स मौनी महादाशनिकोस्ति विद्वान् ॥
काशिराजः— तमज्ञं सुता मे व्यज्ञापयद् माम् ।
शिवनाथः— कथ सा हि तस्याऽज्ञतां तामवोधत ?॥४७॥
काशिराजः—सा तस्य मौर्ख्यमबुधन्निशि वार्तया भोः ।
शिवनाथः— मौनी स्वमौनमजहात्सम्मेल काले !
वर्षाय मौनमवलम्बितमत्र तेन ।
तत्त्यक्तुमर्हति कथं समयात्स पूर्वम् ! ॥४८॥
काशिराजः – विद्योत्तमा तमधुना वदतीह मूर्खम्,
किं सत्यमस्ति विधिरेव हि वेत्ति विद्वन् !
शिवनाथः— किं प्रत्ययस्तव न मे वचनेषु भूप !
मूर्खः स नास्ति परमोऽस्ति स विज्ञवर्यः ॥५१।
काशिराजः—शास्त्रार्थसंसदि तदिङ्गितजा प्रभा या,
सा दृश्यतेऽद्य कमलाभमुखे न तस्याः ।
नो वेद लौकिकसुखं स हि तेन पुत्र्या,
निष्कासितः स्वभवनात्स इहाऽऽगतः किम् ।५०॥
शिवनाथः—किम्वुक्तमेतदधुना हि बहिष्कृतः स,
नैवागतः सइह कुत्र गतो न जाने ।
विद्योत्तमा जितबुधा विदुषी पतिं स्वं,
त्यक्त्वा मुदं कथमवाप्स्यति ! वेत्ति दैवम् ॥५१॥

राजन् ! तवास्ति दुहिता त्वभिमानिनी सा,
पूर्वन्तु या हि विदुषामकरोदवज्ञाम् ।
मौनव्रतादकथनादबुधं तमुक्त्वा,
निष्कास्य चाद्य भवनात्स्वधवापमानम् ।।५२।।

काशिराजः—राजकुमारी वदति महात्मन् !
प्रतिज्ञया तं पतिं न मन्ये ।
अधुना वाचा यो जेष्यति तां,
तं पतिमङ्गीकरिष्यते सा ।।५३।।

शिवनाथः—अलं चिन्तया भूप ! सुता ते,
तमेकदा किल पतिं मंस्यते ।
मौनसमाप्तौ तस्य तया सह,
मौखिकशास्त्रार्थो भविष्यति ।।५४।।

एतत्सङ्गमनमिह दैवेन,
कृतं सम्प्रति मौनावरुद्धम् ।
नूनमेकदा मिथुनमेनया—
र्लब्धप्रतिष्ठं स्यादित्याशीः ।।५५।।

पत्न्या तिरस्कृतो मौनी स तु,
कालिदासो भवज्जामाता ।
लज्जितः क्वापि विपिनं गतवान्,
आयास्यति मौनं समाप्य खलु ।।५६।।

तदैव विज्ञास्यतो भवन्तौ,
तस्याज्ञतां विज्ञतां वा किल ।
विश्वासं कुरुतां मम वचने,
समयस्त्वतिबलवानिति मत्वा ।।५७।।

काशिराजः—राजकुमारी सौभाग्यचिन्ता,
प्रबाधते नितरां च भवन्तम् ।
सापि विद्वांसं पतिं गम्या-
दित्याशया स्वहर्म्यं यावः ॥५८॥

शिवनाथः—गच्छ भूप ! तव चिन्ता
सफला स्यात् पुत्रीकामनाऽपि ।
येन प्रजायाः कर्मणि,
व्यापृतं स्यात् त्वदीयं मनः ॥५९॥

कविः—राजा स शारदानन्दो राज्ञ्या शारदया सह ।
गुरुकुलाच्छताङ्गेन ततः प्रासादमाययौ ॥६०॥

भ्राता चन्द्रसहायमिश्र आ ! श्रोनेहरुदेहान्ते,
संस्कृतहिन्द्यो र्मम गोतानि निशम्य प्रसादमुक्तवान् ।
कृत्वा गीतजवाहरं ततो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयैकादशसर्गं कृतवान् ॥६१॥

विद्योत्तमाकालिदासीयम्

द्वादशः सर्गः ।

कालिदासस्य पत्नीं प्राप्तुं प्रयत्नः ।

कविः—ततो गुरुकुलान्निर्गत्य मौनी,
गच्छन्तमेकं साधुं ननाम ।
कुरु मां स्वशिष्यं मह्यं च देहि,
सेवावसरमेतदवेदयत्सः ॥१॥

निजगाद साधुस्तं नो ममैकं,
स्थानं किमप्यस्ति नित्यं भ्रमामि ।
कालिदासः—अहमप्यटिष्यामि पुराणि साकं,
प्राप्स्यामि भवतो ज्ञानं प्रभावात् ॥२॥

सार्धं च नय मां दासस्तवाऽहम्,
वदन्ति सर्वे मां कालिदासम् ।
श्रुतिं पिपठिषामि पाठय च तां मे
ज्ञानं प्रदेहि बुधोऽहं बुभूषे ॥३॥

साधुः—आगच्छ स्वं देशं वत्स ! पर्यट,
लोकश्रुतं प्राप्य श्रुतवान् भव त्वम् ।
कविः— इत्थं स तेन सह बभ्राम देशम्,
यस्मात्तदीया जजागार बुद्धिः ॥४॥

भ्रमणे सरयूतीरे सोऽयोध्यां रामजन्मदाम् ।
ततो गङ्गानदीकूले प्रयागं यज्ञसंकुलम् ॥५॥
कान्यकुब्जं प्रदेशं च पाञ्चालं हास्तिनापुरम् ।
द्वैतवनं कनखलं ततश्च तं हिमालयम् ॥६॥
ततश्च क्रौञ्चरन्ध्रं तत् कैलासं मानसं ततः ।
अलकां च ततो गत्वा निवृत्य क्रमशस्ततः ॥७॥
ब्रह्मावर्तं कुरुक्षेत्रं ततश्चर्मण्वतीं नदीम् ।
ततो विन्ध्याचलं तस्माद् मध्यस्थनगराणि च ॥८॥
ततो दशपुरं तस्मादग्र देवगिरिं ततः ।
गम्भीरां गन्धवतीं च निर्विन्ध्यां सिन्धुनिम्नगाम् ॥९॥
अवन्तीषूज्जयिनीं च क्षिप्रातीरे त्ववस्थिताम् ।
विदिशां वेत्रवतीस्थां दशार्णं च ततो वनम् ॥१०॥
रैवतीं चाम्रकूटं च गत्वा रामगिरिं ययौ ।
ददर्शैतैः समं स्थानै र्दृश्यानि प्रकृते र्दृशा ॥११॥
प्रतिस्थानं निवासेन तत्रत्यैः पूरुषैः सह ।
वार्तया व्यवहारेण लौकिकज्ञानमाप्तवान् ॥१२॥
तस्मिन् विवेक उत्पन्नः प्रज्ञा-प्रतिभया सह ।
शब्दक्रियादिवैभिन्न्यम् अनायासेन बुद्धवान् ॥१३॥
मध्ये मध्ये ततः साधो र्व्याकरणविशेषताम् ।
विज्ञाय भास-सौमिल्ल-कविपुत्रान् पपाठ सः ॥१४॥
त्रिभिः संवत्सरैरेव तस्य साधोर्मुखात्तदा ।
सोऽज्ञः सुज्ञोऽभवत्प्राप्य ज्ञानं विविधशास्त्रजम् ॥१५॥
स्वात्मानं स ततोऽजानाद् बुधं राजसुताप्रियम् ।
श्रावयामास साधुं च काशीं गन्तुं निजां कथाम् ॥१६॥

साधुराज्ञापयामास तं गन्तुं तत्र स्वेच्छया ।
ततो रामगिरेस्तस्मात् काशीं प्रति चचाल सः ॥१७॥
मध्येमार्गं नगरेषु ग्रामेषु गुरुकुलेषु च ।
वासं कुर्वन् विदुषां च शृण्वन् सम्भाषणानि सः ॥१८॥
तेभ्यश्च प्राप्नुवन् बोध लौकिकं व्यावहारिकम् ।
भाषाशब्दादिवंशिष्ट्यम् अवगच्छन् गिराप्रभम् ॥१९॥
उज्जयिनी-प्रयागादिमार्गेण गतिमाप्नुवन् ।
कतिपयैर्दिनैर्भूयः काश्यां प्राप गुरुकुलम् ॥२०॥
तत्र विद्यार्थिनो दृष्ट्वा तं परस्परमालपन् ।
'अयं मूर्खः स एवाऽस्ति योऽस्ति राजसुतापतिः' ॥२१॥
स गत्वाऽऽचार्यकक्षं तं गुरुं ननाम सादरम् ।
तं दृष्ट्वा पण्डितवेषम् आचार्यो मुमुदे बहु ॥२२॥
वार्तालापेन विद्वांसं यदा तमबुधद् गुरुः ।
प्रैषयद् राजपार्श्वे स तदा शास्त्रार्थसूचनाम् ॥२३॥
राजा तां पत्रमारोप्य सूचितवान् दुहितरम् ।
सा तत्पत्रोत्तरं पित्रे पत्राङ्कितं व्यसर्जयत् ॥२४॥

राजकुमारीपत्रम्

पितः ! राजसभायां मे शास्त्रार्थः सोऽन्तिमोऽभवत् ।
यस्मात्पश्चाद् विवाहो मे कालिदासेन कारितः ॥२५॥
स ममाऽस्ति पतिस्तात ! बुधश्चेत्तत्स एककः ।
समागच्छतु मे हर्म्यं वाचा स्वं साधयेद् बुधम् ॥२६॥
वार्तायामावयोः कोऽपि मध्यस्थो न भविष्यति ।
अतः स प्रेषणीयो माम् अद्वितीयो, निवेदये ॥२७॥

14596

राज्ञा विद्योत्तमा-पत्रं प्राप्य तद्भावसूचकम् ।
आचार्यायैकपत्रं स्वं राजदूतेन प्रेषितम् ॥२८॥

राज्ञः पत्रमुपलभ्य तस्य भावं निगद्य सः ।
विद्योत्तमासमीपे तं कालिदासं व्यसर्जयत् ॥२६॥

यदा स गन्तुमारेभे केचिद् विद्यार्थिनस्तदा ।
यासि क्वेति निगदन्तः परितस्थुरुपेत्य तम् ॥३०॥

सोमदत्तः – अद्य बहु प्रसन्नोऽसि यासि क्व मित्र ! मां वद ।
कालिदासः - स्वपत्नीं प्राप्तुमिच्छामि वाचा तत्तत्र यामि भोः ॥३१॥

पवनदासः—पत्न्या निर्भर्त्सितोऽसि त्वं निष्कासितो गृहादपि ।
अपमानं पुनर्लब्धुं जिगमिषसि तत्र किम् ?॥३२॥

कालिदासः—त्वमेतन्मित्र ! न ब्रूयाः सा बुधं पतिमिच्छति ।
तदहमधुनाऽधीती साहित्यव्याकरणयोः ॥३३॥

तपनदासः - सखे राजकुमारी सा तस्यास्त्वयि न कामना ।
जाने कञ्चित् स्वतुल्यं सा राजपुत्रं समीहते ॥३४॥
अभविष्यत् तदिच्छा चेत् त्वादृशे मुण्डिते जने ।
तन्निरसारयिष्यत्त्वां तस्यां निशि न सा गृहात् ॥३५॥

कालिदासः—तदा हि कामशास्त्रज्ञो नाऽऽसं मित्र ! युवाऽप्यहम् ।
योऽभूवमात्मसात्कर्तुं कामोन्मत्तां न तां प्रभुः ॥३६॥

तपनदासः—तत्किमधीतकामोऽसि ! येनाऽङ्के सा पतिष्यति ।
तन्मन्त्रिं ब्रूहि मां मित्र ! यत्त्वं क्षेप्स्यसि तत्र हि ॥३७॥

कालिदासः—तत्र गत्वा करिष्ये किम् ? किन्तेऽनेन प्रयोजनम् ?
हासेन गमनोत्साहं मन्दं कुरु न मित्र ! मे ॥३८॥

विद्यार्थिनः—यथेच्छं गच्छ नो मित्र ! वाचा पत्नीं प्रभावय ।
विहसामो न, पत्न्या ते मेलनं कामयामहे ।।३९।।
कालिदासः—सायं प्रत्यागमिष्यामि ।
तपनदासः— रात्रौ तत्र न वत्स्यसि ?
कालिदासः— तत्पूर्वं किं कथयेयम् ?
सोमदासः— गच्छ, पश्य भवति किम् ?।।४०।।
कालिदासः—गच्छामि तत्र किमहं वक्ष्ये न जाने,
मां स्वीकरिष्यति पतिं स्वं सा न वेति ।
शास्त्रार्थमाश्रयति दृष्ट्वा मोदते वा,
पश्यामि तां नयति केन पथा विधाता ।।४१।।
कविः—सोऽपि तद्भवनं प्राप्तः प्रतीहार्या प्रवेशितः ।
आसन्द्यामुपविष्टस्तां निजगाद समादृतः ।।४२।।
कालिदासः—पतिस्ते कालिदासोऽस्मि जानासि राजपुत्रि ! माम् ।
तत्सर्वं पृच्छ, मामार्ये ! यत्किञ्चित्प्रष्टुमीहसे ।।४३।।
विद्योत्तमा – किमधीत्याऽऽगतोऽस्यार्य ! यद् वेत्सि ब्रूहि मां हि तत् ।
कालिदासः—किञ्चिज्जानामि साहित्यं किञ्चिद्व्याकरणं स्मृतम्
।।४४।।
विद्योत्तमा—अस्ति कश्चिद् वागर्थः? इति प्रश्नस्य तूत्तरम् ।
यदि काव्यात्मक दत्से, मस्ये तत्त्वामहं बुधम् ।।४५।।
कविः— तत्सोऽभवदवाक् श्रुत्वा साऽपश्यत्तन्मुखं प्रति ।
कालिदासस्य सा दृष्टिर्नीचैर्निपत्य नोन्नता ।।४६।।
विद्योत्तमा—किं चिन्त्यते ?
कालिदासः— किञ्चिन्नहि ।
बिद्योत्तमा— किं वाञ्छसि ?
कालिदासः— कालं प्रिये ! ।।४७।।

विद्योत्तमा—ददामि तम् ।
कालिदासः— तद् गच्छामि ।
विद्योत्तमा— कदैष्यसि ?
कालिदासः— काव्यं कृत्वा ! ॥४८॥
विद्योत्तमा—क्व यास्यसि ?
कालिदासः— गुरुकुलम् ।
विद्योत्तमा— प्रतीक्षिष्ये ।
कालिदासः— आयास्यामि ॥४९॥
विद्योत्तमा—तथा भवसि चेद्, यथा त्वामहम्,
चिकीर्षामि तत्, स्वपतिं मंस्ये ॥५०॥
कालिदासः— तावदहं, प्रयतिष्ये ।
यावन्न मां, मंस्यसे स्वम् ॥५१॥
विद्योत्तमा—गच्छ तवाऽहं,
शुभ कामये ।
कालिदासः— मम कामनापि,
त्वां प्रतीदृशी ॥५२॥
कविः—ततः कालं स याचित्वा पुनर्गुरुकुलं गतः ।
आचार्येणापि सोऽध्येतुं काव्यं कर्तुं च प्रेरितः ॥५३॥
मम कविताः श्रुत्वा भ्राता श्रीगङ्गासहायमिश्रो,
भारत्यां नूतनगीतानि लेखितुं मां निगदितवान् ।
किशोरगीतानि च लेखित्वा रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीये द्वादशसर्गं कृतवान् ॥५४॥

विद्योत्तमाकालिदासायम् ।

त्रयोदशः सर्गः ।

विद्योत्तमायाः कालिदासं कवीकर्तुं प्रयत्नः ।

कविः—ततो हि काशीपतिशारदेशः,
स शारदानन्दः शारदायाः ।
वृत्तं सुताया विज्ञातुमैच्छद्,
विद्योत्तमाया भवनं जगाम ॥१॥

काशिराजः—पुत्रि ! त्वदीयः पतिरस्ति विद्वान्,
समागतोऽभूत्स च तव सकाशम् ।
किं प्रश्नमुत्तरितुं तव स नाऽलम् ?
नाङ्गीकृतो यत्स त्वयाऽधुनापि ॥२॥

सेविका—राजन् ! स प्रश्नोत्तरशक्त आसीत्,
परमस्मदीयेयं राजपुत्री ।
तत्कवितया तस्माच्श्रोतुमैच्छत्,
सोऽभून्न यच्श्रावयितुं समर्थः ॥३॥

काशिराजः—कवितापणस्तत्र नियोजितः किम् ?
वत्से ! स्वमनसा तं नाभिलषसि ?
अधुना स भूतस्त्वज्ञादिह ज्ञः,
तस्माच्चिकीर्षसि तं प्राज्ञपुरुषम ? ॥४॥

विद्योत्तमा—आं, तं चिकीर्षामि कविं पितर्भोः !
ज्ञविज्ञमध्यः सुज्ञो भवेत्सः ।
वर्षैस्त्रिभिर्भारतपर्यटनतो,
ज्ञानं स लब्ध्वा ज्ञोऽभूदविज्ञात् ॥५॥

कश्चिच्च कालः कविकर्ममार्गे,
व्ययं गमिष्यति तस्याऽत्र लोके ।
ज्ञानं विशेषं प्राप्स्यन् प्रभविता,
विरहेण कान्तायाः कवयिता सः ॥६॥

कवि र्भवति सुज्ञो लौकिकज्ञो,
व्यवहारवेत्ता जनभावमानी ।
जनप्रियो विद्वल्लोकमान्यो,
राजाऽऽदृतो जायाप्रेमदानी ॥७॥

काशिराजः—यदि तं चिकीर्षसि कविमत्र गेहे,
शक्नोषि कर्तुं तं वासयित्वा ।
अधुना तमङ्गीकुर्याः पतिं, मे
चिन्तां स्वजीवन दुःखं च दूरय ॥८॥

विद्योत्तमा—प्रश्नोत्तरे मे काव्यं स कृत्वा,
स्वयमेकदाऽऽगन्ता मामवश्यम् ।
तदा विचारः कार्योऽयमेव,
भाव्यं न वा मम पत्या हि तेन ॥९॥

काशिराजः—पत्न्या हृदये काचिदुपेक्षा
कर्तव्या न पतिं प्रति वत्से !
विद्योत्तमा— तात ! नास्ति, सा तस्योन्नत्यै
मया कृतोऽयं साधुर्यत्नः ॥१०॥

कविः—तदा समायाता वै तस्याः,
काचित्सखी सुशीला नाम ।
नृपोऽवदत्पतिविषयं बोधय,
विद्योत्तमां सुशीले ! यामि ॥११॥
सुशीला—सखि ! जनकस्ते गतः कथय माम्,
किं किं विचारयसि पतिविषये !
विद्योत्तमा — नैव किमपि सखि ? यादृशं पतिम्
चिकीर्षामि स तथैव करोति ॥१२॥
सुशीला – अधुना त्वं सादरमाह्वय तम्,
येन सुखं तव जीवने भवेत् ।
विद्योत्तमा— मम जीवने कथय किं दुःखम् ?
यत्सखि ! तुभ्यं नैव रोचते ॥१३॥
सुशीला—मम रुच्या किं ? तत्र प्रधाना
रुचि र्भवेत्तव स्वस्मिन् पुरुषे ।
सखि ! वद पतिमन्तरेण लोके,
नारीजीवनमपि किं किञ्चित् ?॥१४॥
विद्योत्तमा – तत्पत्या रहितं वनितायाः,
जीवनमालि ! कथ्यते किं वद ?
सुशीला— पतिरहितं जीवनं केवलम्,
भवति जगत्यां समययापनम् ॥१५॥
विद्योत्तमा—जानीषे किं पतिसहितस्य,
जीवनस्य काञ्चिद् विशेषताम् ?
तत्र सुखं किं भवति यन्न मे,
प्रासादे दृश्यते त्वया सखि ! ॥१६॥

त्रयोदशः सर्गः

सुशीला—पत्या सह जीवने तु नारी,
यमानन्दमनुभवति लौकिकम् ।
तमिन्द्रियैर्जनितं मनीषिणः,
परमानन्दमेव निगदन्ति ॥१७॥
इदं तदेव जीवनं यस्मिन्,
भवति द्वयोरात्मनोरेकता ।
परमात्मनि विलयोऽयमात्मनः,
पत्नी स्वतां मेलयति पत्यौ ॥१८॥
आत्मा परमात्मनं न यावद्,
गच्छति तावल्लोकं भ्रमति ।
तथैव नारी नरं न लब्ध्वा,
यौवनविषमबनानि गच्छति ॥१९॥
विद्योत्तमा— परमस्मिन् जीवने स्वकीये,
पीडामनुभवामि काञ्चिन्नो ।
काऽपि विषमता नास्ति न कष्टं,
यदनुभूयते त्वया ममाऽऽलि! ॥२०॥
सुशीला—राजकुमारी त्वमसि येन सखि !
प्रासादं मन्यसे निजमिभम् ।
यदत्र तत्सर्वं पितुरास्ते,
वद किमस्ति ते? मनसा चिन्तय ॥२१।
पितुर्गृहं तव गृहं नास्ति भोः !
विद्ये ! पतिगृहमस्ति तावकम् ।
विद्योत्तमा— जानीषे न जनकसम्पत्तौ,
पुत्रस्येव सुतायाः स्वत्वम् ।॥२२॥

अहमस्त्येकमपत्यं स्वपितु-
स्तत्सर्वंपितुरस्ति मदीयम् ।
प्रासादं नगरं राज्यं च
यत्किञ्चित् तदखिलमधिकुर्वे ॥२३॥
सुशीला—यदि नार्याऽधिगतं न पतिसुखं,
तत्सुखमखिलं व्यर्थं तस्याः ।
भवती पतिमाहूय जीवने
तज्जीवनरसमपि गृह्णातु ॥२४॥
तद्योगेन स गन्धस्त्वयि सखि !
समुत्पत्स्यते श्रृणु मम वचनम् ।
यः कस्मिन्नपि भवत्युपवने,
पुष्पविकासात्प्रसरति परितः ॥२५॥
विद्योत्तमा – एतत्सर्वमनुभवति नारी,
पतिमनुकूलं प्राप्य सर्वदा ।
सुशीला – सम्प्रति तव प्रतिज्ञयापति-
र्बुधोऽभवत्ते प्रतिकूलो न ॥२६॥
विद्योत्तमा—तव विचारमाद्रिये सुशीले !
वचोऽनुरूपं ह्यागन्ता सः ।
यदि स परीक्षासफलः स्यात्तत्
पतिरूपेण तमङ्गीकुर्याम् ॥२७॥
कविः—इत्थं तस्या जनको माता
सख्यः सेविकाश्च तामगदन् ।
परं तया न गृहीतं कस्मा-
दपि शिक्षणं स्थिरश्च तत्प्रणः ॥२८॥

त्रयोदशः सर्गः

एतद्विलिख्य लिख लेखनि ! तस्य वृत्तम्,
अज्ञोऽभवत्स किल काव्यकरोऽद्य विज्ञः ।
अभ्यासमाशु स हि वर्धयति स्म काव्ये,
पत्नी हि तस्य खलु येन भवेत्प्रसन्ना ॥२९॥
मित्रैर्निजैः परिवृतः कविकर्मणा सः,
सम्मानितः प्रतिदिनं भवति स्म काश्याम् ।
श्लोकान् लिखन् कवितया समयानुसारम्,
लोके प्रसिद्धिमगमत्कविकालिदासः ॥३०॥
तस्यैकदा सखायः केचन,
कवितामभ्यस्यतः समीपे ।
गत्वाऽन्योऽन्यमालपन् सर्वे,
विनोदयन्तः स्वमानसानि ॥३१॥
तपनदासः—किं करोषि कविकालिदास रे !
कालिदासः— कविमुक्त्वा मां कथमुपहसि ?
पवनदासः – अधुना त्वमभूर्मान्यो विद्वान् ।
सोमदासः— किं सा त्वामधुनापि नेच्छति ?॥३२॥
कालिदासः—सा विदुषी जितबुधाऽस्ति मित्र !
कामयते निजपतिं कविं सा ।
सोमदासः— अस्मात्किञ्चिद् गुनगुनायसे,
किं कवयसि कथयस्व कवे ! माम् ॥३३॥
पवनदासः—किं पत्नीं प्राप्तुं तद्विषये,
तुकबन्धनं करोषि कवे ! त्वम् ।
कालिदासः— ऋतुविषयकपद्यानि कानिचिद्,
विरचयामि किं श्रोतुमिच्छथ ?॥३४॥

सोमदासः—श्रावय मित्र ! तानि पद्यानि,
त्वया यानि लिखितानि कवे ! नः ।
कविः— ऋतुसंहारसंकलितपद्या-
न्यश्रावयत्कालिदासस्तान् ॥३५॥
सोमदासः—साधु मित्र ! कविरसि ते काव्यं,
चित्तहरं मन्ये मनोरमम् ।
राजसुता साऽधुना पतिं त्वा-
मङ्गीकरिष्यतीति निश्चितम् ॥३६॥
कालिदासः—मित्र ! प्रशंससि मान्तु केवलं,
तद्योग्योऽहं नास्म्यधुनापि ।
तपनदासः— तव जीवने न तस्या भोगो,
येन द्वयोरधुनापि वियोगः ॥३७॥
सा क्व तु राजकुमारी रमणी ?
सरसमिवोपवनं विभाति या ।
नीरसवनमिव विभासि च त्वं,
द्वयोरतो मेलः कथं भवेत् ?॥३८॥
सोमदासः—मैवं वादीर्मित्र ! कविरयं,
चारुतरं काव्यं करोति यः ।
अस्मिन्नपि स रसः सञ्चरति,
किमस्य पद्यानि श्रुतानि नैव ?॥३९॥
विपिनदासः—श्रुतानि तानि मधुरपद्यानि,
यदि सा कर्णगतानि करोतु ।
तत्तैराकृष्टा सा शीघ्रम्,
अस्याऽङ्कमेष्यतीति निश्चयः ॥४०॥

तपनदासः—क्वाऽस्ति तादृशं भाग्यं त्वस्य,
भवानत्र चिन्तयति यादृशम् ।
पवनदासः— किं कथयसि, ते विचारधारा,
निम्नगेति बलवदस्य भाग्यम् ॥४१॥
सोमदासः—परिवर्तनमेतत्समयस्य,
यद् धनिनं निर्धनं करोति ।
बलवत्तयाऽस्य कोऽप्यकिञ्चनो
राजसमोन्नतिगजमारोहति ॥४२॥
अधनाऽस्मिन् शारदा प्रसन्ना,
या कवित्वमस्मै प्रददाति ।
येन कतिपयैरहोभिरेष्यति,
विद्योत्तमा पार्श्वमेतस्य ॥४३॥
तपनदासः—किम्वुक्तं मे मित्र ! त्वयैतत् ?
कथं कालिदासं त्वं हससि ?
सा किमेनमायास्यति ? वद, कि-
न्नारी नरमुपगच्छति पूर्वम्? ॥४४॥
विपिनदासः—द्वितीयवारमयमगमत्तत्र,
परमेनं सा कामयते न ।
तृतीयवारमेष स्वं काव्यं,
गायं गायं तामनुनेष्यति ॥४५॥
कालिदासः—शृणु नाऽहं तामनुनेष्यामि,
पूरयितुं तत्प्रणं यतिष्ये ।
पवनदासः— पूर्णे प्रणे मित्र ? सा सेवां,
करिष्यते तव, समयोऽयं ते ॥४६॥

सोमदासः—शृणुत यदाऽस्य काव्यधारेयं,
प्रवाहमेष्यति तदा द्रक्ष्यथ ।
तत्र महाकवयो मङ्क्ष्यन्ति,
क्व सा वराकी राजकुमारी ?॥४७॥
सा चेमं पतिरूपं लब्ध्वा,
सौभाग्यादतिगर्वं वोढा ।
अतो मित्र ! तामय कविरूपं-
ज्ञापय येन हर्षितां नय ताम् ॥४८॥
काव्यं त्वं कुरुषे हि यादृशम्,
आशासे त्वं महाकविः स्याः
तत्कवितां प्रतिदिनमभ्यस्येः,
येन शक्नुयाः कर्तुं काव्यम् ॥४९॥
कालिदासः—काव्यचर्चया कालो गतवान्,
भोजनाय मित्राणि ! सह चलत ।
कविः— इत्थमहरहः स कालिदासः,
कविताभ्यासं करोति स्म ह ॥५०॥
इष्टमित्रै र्निजैः साकं कविसम्मेलनेषु सः ।
श्रावयित्वा स्वकाव्यानि कवित्वमगमत्ततः ॥५१॥
उत्तरभारत एटाजनपद-सोरोंनगर निवासी,
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान् ।
संस्कृतकथावलीकर्ता कविरामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयत्रयोदशसर्गं कृतवान् ॥५२॥

विद्योत्तमाकालिदासायम् ।

चतुर्दशः सर्गः

कालिदासस्य कवित्वम् ।

कविः – विद्योत्तमा राजसुतैकदा सा,
सार्धं सखीभिर्निजकक्षमध्ये ।
वार्ता करोति स्म तदा सुशीला,
सा श्रीमती तां मधुरं जगाद ॥१॥

सुशीला—ध्यानेन वाक्यं शृणु राजपुत्रि !
स कालिदासः कविरस्ति मान्यः ।
चारूणि काव्यानि भवन्ति तस्य,
ख्यातिश्च जाता कविगोष्ठिकासु ॥२॥

शुश्रूषसे राजकुमारि ! किं त्वं,
चेतोहरास्तत्कविता मनोज्ञाः ।
विद्योत्तमा—श्रुतास्त्वया तत्कविताः क्व भद्रे !
सुशीला— वर्षे गते राजसुते ! वसन्ते ॥३॥

कमला— किं वर्णितं तत्कवितासु शीले !
सुशीला – षण्णामृतूनां कवनन्तु तत्र ।
विद्योत्तमा— तत्तानि पद्यानि च किंविधानि ?
सुशीला— छन्दोनिबद्धानि मनोहराणि ॥४॥

विम॰ – पतिं कविं वाञ्छति राजपुत्रि ।
सुशीला पूर्णा भवेत्सम्प्रति कामनाऽस्याः ॥
विद्योत्तमा – यदा स आयास्यति, दास्यते मे
प्रश्नोत्तरं, तं पतिमाशु मंस्ये ॥५॥

सुशीला—प्रश्नोतरं ते कवनेन दातुं,
सचाऽधुना राजकुमारि ! शक्तः ।
विद्योत्तमा— एवं भवेत्तत्सखि ! ते मुखेऽस्मिन्,
क्षेप्स्यामि शीले ! घृतशर्करे हि ॥६॥

कमला— प्रणेष्यते त्वद्विषयेऽपि काव्यं,
तमालि ! ते प्रेरयिता वियोगः ।
विद्योत्तमा— इत्थं स कुर्याद् यदि तत्तु भद्रे !
त्वयाऽऽदयिष्यामि सुमोदकान् हि ॥७॥
विमला— विद्योत्तमे ? दास्यसि किञ्च मह्यम् ?
विद्योत्तमा— याचिष्यते यत्तदहं प्रदास्ये ।
कविः— तास्वालपन्ताप्वकरोच्च शब्दान्
कश्चित्कपाटे खट् खट् खटं खट् ॥८॥
विद्यो॰मा— पश्य, कुशलिके !गच्छ,
द्वारे कः खट्खटायते ?
कु॰लिका— स कविः कालिदासोऽस्ति,
कविः— व्यज्ञापयन्निवृत्य सा ॥९॥
विद्योत्तमा— किं कविः कालिदासोऽस्ति ?
कुशलिका— राजकुमारि ! सोऽस्ति ह ।
विद्योत्तमा— गच्छ मे वचनान्नत्वा,
कविमानय सादरम् ॥१०॥

सख्यः—इष्टं कविं पतिं वा ह्यालप, त प्रणयैः कुरु वा हृदयान्तः ।
राजानं कुरु मनसो यामो, निर्भक्षिकं कृतं स्थानं ते ॥११॥

कविः—राजकुमारीदृष्टिं दृष्ट्वा,ततः सेविका अपि निर्जग्मुः ।
तत्राऽऽसीदेका युवती सा, युवा स कविरेकश्च समक्षम् ॥१२॥

विद्योत्तमा—एहि कवे ! स्वागतं त्वदीयम्,
समलङ्कुरु पर्यङ्कमिमं मे ।

कालिदासः— नाहं योग्यस्ते पर्यङ्कम्
आरोढुं, स कालिदासोऽस्मि ॥१३॥

विद्योत्तमा—मैवं वादीरहं प्रतीक्षे
तव कवित्वमद्यावधि नित्यम् ।

कालिदासः— प्रश्नोत्तरं श्रूयतां विज्ञ !
अत्राऽऽसन्द्यामवस्थितोऽस्मि ॥१४॥

भवत्प्रश्नविषये लिखितानि, मया त्रीणि काव्यानि विधिज्ञे !
यत्प्रारम्भो वाक्यपदाग्रः, प्रथमं तेषु कुमारसम्भवम् ॥१५॥
अस्ति मया पार्वतीस्वरूपा, भवत्यत्र चित्रिता तापसी ।
या स्वैः कष्टकरैस्तपोभिरिह, शिवमवाप्तुमसमर्था नाभूत् ॥१६॥

द्वितीयं मेघदूतकाव्यं मे, यस्मिन् त्वं यक्षिणी चित्रिता ।
कश्चिद् यक्षो यस्या विरहे, सन्देशं मेघेन प्रैषयत् ॥१७॥
तृतीयं मे रघुवंशं काव्यम्, दाम्पत्यं प्रकटितं यत्र तत् ।
वागर्थौ मिलतः परस्परं, तथा यथा पतिपत्नीमेलः ॥१८॥

सासांरिकं कर्म सम्भवति, तयो र्द्वयोर्योगेन विना नो ।
वाण्यामर्थो यथा विभाति, पत्न्यां पतियोगस्थतेष्यते ॥१९॥

पत्नीयोगोऽपि तादृशः स्याद्, येन विना पत्युर्विह्वलता ।
अजे यथा रामे वा दृष्टा, तथा ममापि स्थितिस्त्वां विना ॥२०॥

त्वदीयरूपं सुदक्षिणाया, इन्दुमती—सीतयोः स्वरूपम् ।
येन पतिः स्वः स्वःप्रभावितस्तादृशमेवाऽऽचर देवि ! त्वम् ॥२१॥
काव्यत्रयी गृह्यतां यस्यां , प्रश्नस्योत्तरमस्ति भवत्याः ।
इहाऽस्ति कश्चिद् वागर्थः किम्? इष्टस्त्वया यो हि कथयस्व ॥२२॥

विद्योत्तमा —प्राप्तो मयाऽत्र तव वागर्थः ,
कविरसि विद्वानसि छन्दोज्ञः ।
त्वामहमैच्छं यादृशं कविं ,
तादृशोऽसि पतिमधुना मन्ये ॥२३॥

अद्य च तव वाणी परिष्कृता, सुसंस्कृतोऽसि यया प्रबुधोऽसि ।
प्रसादयति सा प्रत्यङ्गं मे , यत्राऽनङ्गसमं त्वां प्रेक्षे ॥२४॥
येन त्वं मम हृदये मनसि , काये च जयं लब्धवानहो !
तदेहि पर्यङ्कं प्रिय ! पूरय , मम कामं मम तृषं च शमय ॥२५॥

पाणिग्रहणमद्य मे भविता , ह्यग्रे सर मम करं गृहाण ।
पारस्परिकसमर्पणेन प्रिय ! , आवामेकत्वं गच्छेव ॥२६॥
कालिदासः नहि नहि मां क्षमस्व विज्ञे ! त्वं ,
तदनर्थं कर्तुं नो प्रेरय ।
त्वया कृतं तत्कर्म यदत्र ,
गुरुरेकः शिष्य प्रति कुरुते ॥२७॥
तन्मम हृदये सा गुरुश्रद्धा , या नमयति मां भवदग्रे हि ।
भर्त्सनया तेऽहं कविः कृतस्तत्त्वां पत्नीं नाऽङ्गीकुर्वे ॥२८॥

विद्योत्तमा— मैवं वद प्रियतमोऽसि मे त्वं ,
मया कृतं तत्पत्नीकार्यम्,
साध्वी याऽस्ति करोति सा पतिं ,
साधुं यथा तथा मया कृतम् ॥२९॥

तस्य सदाचरणस्य मम कवे ! किमयं परिणामो यत्त्वं ताम् ।
पत्नीमपि नाऽङ्गीकुरुषेऽद्य, व्यवाहयो यां पुरा समाजे ॥३०॥
त्वयाऽभिव्यक्ता निजकाव्येषु, पत्नीं प्रति या प्रेमभावना ।
तदधिकारिणी नाऽस्मि कवे! किं? पुनः कथमयं मतिविपर्ययः?॥३१॥
कालिदासः— परिवर्तनं जीवने भवति,
कोऽपि जनो नोन्नयति यद् विना ।
विस्मर न शुभे ! पुरा त्वयापि,
परिवर्तिता विचारसंस्थितिः ॥३२॥

न पर्यवर्तिष्यन्त विचारास्तव चेत्तदा मेलशर्वर्याम् ।
तत्स्थितिरद्यतना मे विज्ञे ! परिवर्तिताऽभविष्यन्नैव ॥३३॥
अतो मदीये हृदये सुभगे ! यत्स्थानं निर्मितं भवत्या ।
तत्पदमुच्चं पूज्यगुरोरिह कृपया स्वीकुरु विद्ये देवि !।३४॥

विद्योत्तमा – प्रिय ! तव पत्नी प्रेमपिपासु—
र्या पतिप्रेमाऽभिलषति नित्यम् ।
मह्यं देहि तदेव कामये
प्रियापदमहं नैव गुरुपदम् ॥३५॥

कालिदासः – यद्यकरिष्यः पत्यौ प्रणयम्,
तन्मां गृहान्न बहिरकरिष्यः ।
विद्योत्तमा— रतिर्मया प्रदर्शिता प्रियतम !
परं त्वमासीरज्ञस्तस्याः ॥३६॥

विस्मर तां घटनां प्राणेश्वर !
प्रेममार्गमनुसर मे प्रियवर !
भवतो मुखाच्छ्रोतुमिच्छामि,
'प्रिये! प्रिये !' सम्बोधनवचनम् ॥३७॥

कालिदासः— प्रेममार्गमनुसरामि भद्रे !
केवलमन्तरमत्रैतावत् ।
आसीः पुरा प्रिया गुरुरद्य,
तत्प्रणयं त्वयि कथन्त् कुर्याम् ? ॥३८॥

विद्योत्तमा— यदि पत्नी स्वं पतिं शिक्षयेत् ,
तत्किं दाम्पत्यं स जहाति ।
तयोः शिक्षकः कोऽपि जनः स्यात् ,
प्रेममार्गमनुसरतो द्वावपि ॥३९॥

अतो भवान् हृदयेन मां गुरुं , मनसा पत्नीमङ्गीकुरुताम्
येनाऽऽवयोर्जीवनं गच्छेत्, पतिपत्नीप्रणयानन्दं प्रिय ! ॥४०॥
एहि प्रियतम ! मम पर्यङ्कं , मनसश्च मे पिपासां शमय ।
प्रेमवचनमवलम्बय शीघ्रं , चुम्ब कपोलौ मामालिङ्ग ॥४१॥

कविः— इत्युक्त्वा सा करं गृहीत्वा ,
कालिदासमाकर्षत्पार्श्वे ।

कालिदासः— किं कुरुषे किं कुरुषे विदुषि !
पतिस्तवास्मि न, पतिस्तवास्मि न ॥४२॥

विद्योत्तमा—तव भावनामहं पश्यामि ,
ग्रस्तं यया मोचयिष्यामि ।

कालिदासः— मुक्तं ततो यदा द्रक्ष्यामि,
तदा त्वामहं पत्नीं मंस्ये ॥४३॥

कविः— इत्याकृष्य बलात्करं तत
स्तस्याः कक्षात्पलायितः सः ।

विद्योत्तमा— प्रिय ! क्व यासि विहाय मामितो
दूरं मा गा दूरं मा गाः ॥४४॥

कविः—इति सा चीत्कारं प्रकुर्वती, निजकक्षान्निर्गता यदाऽशु ।
पलायितं स्वं पतिं विलोक्य, प्रविश्य कक्षं रुरोद बहुधा ॥४५॥
पल्यङ्के पतिता सा शीघ्रम् , उपधाने कृत्वा स्वमाननं ।
शिरस्ताडमकरोत्स्वकराभ्यां, वाचा सा स्वबोधमाक्रोशत् ॥४६॥

विद्योत्तमा— वैदुष्येण कृतं किं मम हा! ,
येन भर्त्सितः पतिस्तदानीम् ।
प्रतिज्ञया मे सर्वं नष्टम्,
विवाहितापि स्वपतिहीनाऽहम् ॥४७॥

कुर्यामहं केन विधिना तं , स्वाधीनं प्रेम्णा विना पतिम् ।
अद्य मे स्थितिः परमविचित्रा, सधवाऽहं विधवेव विभामि ॥४८॥
राजनरै र्निग्राह्य किञ्च तं , राजादेशात्कारागारे ।
क्षेपयेयमहमधुना कञ्चित् कालं यावत् किं करवाणि ? ॥४९॥
मनसा क्रियते प्रेम सर्वदा , बलान्न कर्तुं शक्यते हि तत् ।
पुनर्विचारोऽयं तथाविधो , व्यर्थो नित्यं त्यजनीयोऽपि ॥५०॥

कविः—तस्या वचनं सरोदनं तत्, निशम्य द्वारपालिनी कक्षम् ।
प्रविश्य पृष्टवती किममूर्त्कि राजकुमारि! गतः पतिदेवः? ॥५१॥

विद्योत्तमा—आं कुशलिके ! अहं किं कुर्याम् ?
भूत्वा कविर्मयि स रुष्टोऽस्ति ।
कृत्वा प्रणं नाशितं सर्वम्
जीवनं मया जीवनाशया ॥५२॥

पतिसङ्गमो न यया गृहीतस्तन्नारीजीवनेन कोऽर्थः ?
प्रणेन पुत्र्याऽथवा स्वेच्छया, करणीयः परिणयः कदापि न ॥५३॥
स्वाभिलषितवरेण जनकेन, सम्पादितो विवाहस्तस्याः ।
सुखशान्तिप्रदायकः प्रायः, पतिपत्न्योश्च हर्षदो भवति ॥५४॥

या नारी स्वेच्छया करोति, प्रणेन वा परिणयं जीवने ।
तस्याः कष्टान्युत्पद्यन्ते, यन्निदर्शनं शकुन्तला सा ।।५५।।
कथय कुशलिके ! किं करवाणि ?
सखीसमा त्वं देहि सन्मतिम् ।
कुशलिका— अनुनय तं श्रृणु राजदारिके !
पत्न्याः पतिः प्रपूज्यो भवति ।।५६।।
भाव्यं निराशयाऽत्र न त्वया, पतिं प्रसादयितुं प्रयतस्व ।
शकुन्तलाया इव तव यत्नो ,जीवनं हि सुखदः स्यादन्ते ।।५७।।
विद्योत्तमा - सखि ! सा पूर्वं पतिसुखमभुनक्,
पश्चाद्राजसुखं शकुन्तला ।
मम मेलनशर्वर्यामेव ,
विषमस्थितिरद्भुता प्रजाता ।।५८।।
यस्याः कारणेन मे त्यागं, कृत्वा पतिर्गतःक्व ? न जाने ।
अबलाऽहं गच्छेयं कुत्र ? क्व चाऽन्वेषणं कुर्यां तस्य ।।५९।।
कुश[ ]का – सखि! सबला त्वं कथं व्यस्मरः ,
स्वात्मानयद् राजसुताऽसि ।
सेनाबलेन निखिले देशे ,
तदन्वेषणं कर्तुं मलमसि ।।६०।।
पूर्वं त्वया गुरुकुलं गत्वा , पृष्टव्यस्तद्विषये कश्चित् ।
आशासेऽहं त्वं यत्नेन, तं प्राप्तुं ह्यसमर्था न स्याः ।।६१।।
बुद्धिमती त्वं रोदनेन किं ? बुद्ध्या कार्यं साधये निजम् ।
मत्या यया बुधास्त्वया जितास्तया त्वया जेयः पतिर्निजः ।।६२।।
रुष्टं स्वपतिं प्रेम्णा पत्नी वशीकरोत्यनुनयेन वेह ।
तमेव मार्गमाश्रये गच्छे गुरुकुलं च साधये: स्वकार्यम् ।।६३।।

विद्योत्तमा—वरं सखि ! त्वं गच्छ मातरं
पितरं चाऽऽनय सह मम पार्श्वम् ।
कविः— गता कुशलिका, तस्याः पितरा—
वागतौ ततो ज्ञातुं वृत्तम् ॥६४॥

काशिराजः—पुत्रि ! कथय मां, समागतः किम्
तव पतिदेवः स कालिदासः ?
विद्योत्ताम— आं, प्रश्नोत्तरं स दत्वा मे
गतवानवरोधितोऽपि कामम् ॥६५॥
काशिराजः—कः प्रश्नस्ते तदुत्तरं किम् ?
यदि नो गोप्ये विज्ञापय ते ।
विद्योत्तमा— प्रश्नः—'कश्चिद् वागर्थोऽस्ति ?'
त्रीणि तत्र काव्यानि सोऽलिखत् ॥६६॥

काशिराजः—कानि तेन काव्यानि कृतानि ?
विद्ये ! त्वया तानि दृष्टानि ?
विद्योत्तमा— तान्येतानि- कुमारसम्भवम्
तथा मेघदूतं, रघुवंशम् ॥६७॥

काशिराजः—विद्योत्तमे ! सत्यमेतत्किं ?
यथा त्वमैच्छस्तथा सोऽभवत् ।
विद्योत्तमा— यथाऽहमैच्छं तं पितस्तथा
सम्प्रति कविः स संवृत्तोऽस्ति ॥६८॥

राज्ञी – वत्से ! त्वया किमधुनापि पतिः,
सहवासाय निवेदितो न ? वद ।
विद्योत्तमा—वाढं, मया स कथितो मातः!
परं स मां न मन्यते पत्नीम् ॥६९॥

राज्ञी— पुनः स किं त्वां मन्यते कविः ?
किं तव जीवने न पतिभोगः ?
त्वां गृहलक्ष्मीं चिकीर्षति न को,
बुधेषु कः स्पर्धते न तुभ्यम् ? ॥७०॥

विद्योत्तमा—स मां वदति 'न त्वं मे पत्नी,
परमधुना गुरुरसि मे, मातः !
तव भर्त्सनाऽकरोद्यत्कार्यम्,
तद्गुरुकार्यमहं कथयामि' ॥७१॥

प्रणेन मे सर्वं विनाशितम् ।
कविः— इत्युक्त्वा बहु रुरोद सोच्चैः ॥
राज्ञी— धैर्यं धारय, मा रोदीस्त्वम् ।
विद्योत्तमा— मातः ! कथय, पुनः किं कुर्याम् ? ॥७२॥

कविः— जगाद सा पितरं क्रन्दन्ती—
"पितः ! कथय, किमहं करवाणि ?
पूर्वं पराजितैर्विद्वद्भिः,
कृतः पराजयस्य प्रतिशोधः" ॥७३॥

विद्योत्तमा—प्रतार्य मां तै विवाहिताऽहं,
तमज्ञमुद्घोष्य मौनविज्ञम् ।
यथा बुधीभवितुं तमत्यजं,
मामत्यजत्तथाभूतः सः ॥७४॥

काशिराजः— यथाऽऽचरति यस्तथाऽऽचरेत्तं
प्रति बुद्ध्या मतिमानिति नीतिः ।
व्यवाहरत्स त्वां तथाऽधुना
यथाऽकरोस्त्वं तं प्रति पूर्वम् ॥७५॥

विद्योत्तमा—यदभूत्किञ्चिद् भावि पितर्मे,
तत्सर्वमभूदलं चिन्तया ।
क्रियतां चमूप्रवन्धस्तात !
जिगमिषामि गुरुकुलमधुनाऽहम् ।।७६।।

काशिराजः—यो मनसा न मन्यते पुत्रि !
स किं ब्रलेन मंस्यते वाले ।
अनुनयेन विनयेन पतिस्तु ,
जेतुं शक्यो नैव बलेन ।।७७।।

राज्ञी— अतः सेनया किं भविष्यति ?
गच्छेरेकाकिनी त्वमेव ।
एकान्ते स्वपतिं प्रसादय
ह्यनुनयेन मधुरालापेन ।।७८।।

काशिराजः—गच्छ पुत्रि ! स्यन्दनमारुह्य
बुद्ध्या सदाचारैस्तद्येन ।
स त्वां पत्नीमङ्गीकुर्यात्
तव मधुरालापेन प्रसन्नः ।।७९।।

कविः— ततः समारुह्य रथं जगाम,
विद्योत्तमा सा गुरुकुलमवाप ।
प्राचर्यकक्षं प्रविवेश तत्र,
शिवमिव गुरुं शिवनाथं ववन्दे ।।८०।।

शिवनाथः—स्वस्त्यस्तु ते राजसुते ! सुविज्ञे !
भूयाः स्वसौभाग्यवती चिराय ।
कविकालिदासात्पुत्रं लभस्व,
कथयेः किमर्थं त्वमिहाऽऽगताऽसि ? ।।८१।।

विद्योत्तमा यस्माज्जनयितुं तनयं भवन्तः
शुभाशिषं मह्यं दत्तवन्तः ।
तमत्र मार्गयितुं ह्यागताऽहं
सफलं कथं स्याद् वचनं विना यम् ।।८२।।

व्यवाहयो मां तेनेह विद्वन् ! यद्यपि स आसीदज्ञस्तदानीम् ।
मम भर्त्सना कविमकरोत्तमद्य,स मन्यते मां स्वगुरुं, न पत्नीम् ।।८३।।
निवेदयेऽहं गुरुदेव ! सम्प्रति, पतिदेवमाकारय मे समक्षम् ।
स मां स्वभार्यामङ्गीकरोतु, तमित्थमाज्ञापय, सोऽस्ति कुत्र ? ।।८४।।

शिवनाथः— कालाद् बहोर्वसति न नात्र वत्से !
गतस्य तस्येतो वर्षमातीत् ।
सम्प्रति स उज्जयिनीराजपूजित
कविपदनियुक्तस्तत्रैव वसति ।।८५।।

विद्योत्तमा— मम पूर्वप्रश्नोत्तरमद्य दत्वा
किन्नाऽऽगतो मन्निकटान्निवृत्य ?
शिवनाथः— मन्ये स उज्जयिनीतः समायात्
तवाऽन्तिकादुज्जयिनीमयासीत् ।।८६।।

विद्योत्तमे ! विद्या वस्तुतस्त्वं,
कृतः स्वभर्त्सनयैव स बुधो यया ।
ततः कवीभवितुं प्रेरितस्त्वया,
तत्काव्यलक्ष्यं त्वं राजपुत्रि ! ।।८७।।

विद्योत्तमा— नैवं कथय गुरुवर ! तस्य हेतोः
कृता महान्तो भवता प्रयत्नाः ।
स राजजामाता तद्बलेन,
पुनरुज्जयिन्यां राज्ञा नियुक्तः ।।८८।।

शिवनाथः—श्रृणु शारदानन्दसुते ! वचो मे
त्वमेव तत्कारणमसि हि विज्ञे !
जानासि सिद्ध्यति समयेन सर्वं
पुनस्त्वमेवं कथयसि कथं भोः ! ॥८६॥

विद्योत्तमा—मम जीवनं पतिसिद्ध्या विहीनम्,
तत्रापि भवतामाशिषमपेक्षे ।

शिवनाथः— कुरु प्रयत्नं पतिसिद्धये पुनः,
मधुरं फलं पुत्रि ! ददाति यत्नः ॥९०॥

त्यक्तस्त्वया यः स तु भूतपूर्वो,
मूर्खो जनः पतिरथ मन्यते किम् ?

विद्योत्तमा— प्रतिज्ञया स पतिर्मन्यते मया,
परं कविर्मयि विमनायते सः ॥९१।

शिवनाथः – हृदयेन कामयते त्वां कविः स कविप्रेरणा त्वं तत्कल्पना च
त्वमेव तच्चित्ते काव्यमूर्तिरधिकारिणी त्वं तस्यैव जाया ॥९२॥

विद्योत्तमा—किमुज्जयिन्यां मेलिष्यते स मां ?
प्रसादयिष्याम्यनुनीय त कविम् ।

शिवनाथ – आं मेलिता तत्र नयेन स त्वां,
गत्वा स्वपतिमधिगच्छेः स्वमत्या ॥९३॥

तत्रत्यभूपो न्यायप्रियो यः ,स विक्रमादित्यनाम्ना प्रसिद्धः ।
तं जनपमावेदय तन्नयेन, स्वपतिं लभस्वेयं मम शुभाशीः ॥९४॥

विद्योत्तमा—गच्छाम्यहं तत्र विवाहितत्वा—
दभियोजयिष्याम्यधिगन्तुमपि तम् ।
भवदाशिषा यत्नो वर्धते मे,
सफलो भवेद् यो न्यायेन राज्ञः ॥९५॥

कविः—जिगमिषया तत्र शीघ्रं ततः सा,
प्रणनाम पितरौ भवनं प्रगत्य ।
काशिराजः—कल्याणमस्तु ते, मिलितः पतिः किम् ?
राज्ञी— वद, तस्य काऽभूद् वार्ता त्वया सह ? ॥९६॥

विद्योत्तमा—स तत्र नासीन्मातः ! प्रयामि,
तां शीघ्रमुज्जयिनीं विक्रमस्य ।
स राजकविपदयुक्तो हि यस्यां
वसतीत्यवादीदाचार्यवर्यः ॥९७॥

भवतो र्द्वयोः स्यादासीर्यया मे,
पतिलब्धियत्नः सफलत्वमेतु ।
राज्ञी— गच्छेः सुते ! सान्निध्यं धवस्य,
समं त्वयाऽऽशीर्वादो मदीयः ॥९८॥

काशिराजः—पुत्रि ! त्वया सह गच्छति ममाशी-
र्यया स्वपतिमधिगन्तासि तत्र ।
नियोज्य स्वात्मानं कालिदासे,
निरन्तराऽमरकीर्तिः प्रभूयाः ॥९९॥

कवि।—लब्ध्वा जनकयोरित्थमाशीर्वादं रथेन सा ।
नगरीमुज्जयिनीं तां प्रतस्थे सत्वरं ततः ॥१००॥

उत्तरप्रदेश एटाजनपद—सोरोंनगरनिवासी
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान् ।
प्रेमहर्षगीतादिरचयिता रामकिशोरमिश्र इह
विद्योत्तमाकालिदासीयचतुर्दशसर्गं कृतवान् ॥१०१॥

-☆-

विद्योत्तमाकालिदासीयम् ।

पञ्चदशः सर्गः ।

(पत्नीत्यागपत्रम्) ।

कविः—प्रयागोज्जयिनीमार्गं प्राप्य तस्या रथो गतः ।
कतिपयैरहोभिश्च सोज्जयिनीतटं गता ॥१॥
तत्र क्षिप्रानदीतीरे महाकालेशमन्दिरम् ।
गत्वा पतिमवाप्तुं सा कृतवती शिवस्तुतिम् ॥२॥

विद्योत्तमा जय जय शिव शङ्कर महादेव !,
जगतः कर्ता धर्ता त्वमेव ।
हे विश्वनाथ! त्वं हर्ताऽसि,
निजसेवकविपदोऽवश्यमेव ॥३॥

त्वं पर्वतपुत्रीभर्ताऽसि हितकर्ता भक्तानां त्वमेव ।
हे सोमनाथ! रिपुहन्ता त्वं, जय जय शिवशङ्कर महादेव!॥३॥
त्वं सतीपतिः पार्वतीपतिः, हे हर ! जगतीकालस्त्वमेव ।
शूराः समरे त्वां निगदन्ति, जय जय हर हर हर महादेव ॥५॥
हे महाकाल ! हे कालेश्वर ! जगतो भर्ता हर्ता त्वमेव ।
भक्तास्त्वां स्मरन्ति पुनः पुनः हर हर शिवशङ्कर महादेव! ॥६॥
भक्ताऽहं ते प्रार्थनं च मे उज्जयिनीश्वर ! शृणु विश्वदेव ।
सफलं कुरु मे शरणाऽऽगमनं, जयशिव जय हर जय महादेव!॥७॥

पञ्चदशः सर्गः

कविः— ततः सा पतिमुद्दिश्य राज्ञः कार्यालयं गता ।
तत्र स्वप्रार्थनापत्रं पतिं प्राप्तुं समापर्यत् ॥८॥
स विक्रमादित्यो नाम राजा,
रथं समारुह्य सभां जगाम ।
सभासदां जयजयकारशब्दैः,
परितस्तदा सोज्जयिनी जुगुञ्ज ॥९॥
न्यायपदासीनः स मन्त्रिणम् अद्यतनं किं कार्यमपृच्छत् ।
विद्योत्तमा प्रार्थनापत्रं, पतिविषयकमज्ञापयत्स तम् ॥१०॥
नृप आदिदेश तामाह्वयितुम्,
उपस्थिता सा राजसमक्षम् ।
विद्योत्तमा— न्यायं कुरु महाराज! प्रति माम्,
विक्रमादित्यः — का त्वं कुतः समायाताऽसि ? ॥११॥
विद्योत्तमा— काशीनरेशपुत्री राजन् !,
विद्योत्तमानामधेयाऽस्मि ।
विक्रमादित्यः— अये राजनर! राजकुमार्यै,
सादरमासन्दिकां प्रदेहि ॥१२॥
विद्योत्तमा — नहि महाराज! अहं भवदीय—
प्रजासमा न्यायं वाञ्छामि ।
विक्रमादित्यः— वत्से! शुश्रूषेऽहं कथय,
त्वं कं न्यायं प्राप्तुमिच्छसि? ॥१३॥
विद्योत्तमा— अहमेतत्प्रष्टुं कांक्षामि
ज्ञापय पत्नीस्थानं कुत्र?
विक्रमादित्यः—तदस्ति तत्पत्युर्हि पादयोः ।
विद्योत्तमा— किं स्वीकरोति भवत्सभेयम् ? ॥१४॥

विक्रमादित्यः—कथन्न, वद, तत्को न मन्यते ?
विद्योत्तमा— अस्तीदृशोऽपि सज्जन एकः ।
यो भवन्मतं नाऽङ्गीकुरुते,
तस्यैवाऽहं त्यक्ता पत्नी ॥१५॥
विक्रमादित्यः—स कोऽस्ति राजसभायामस्यां ?,
तन्नामाक्षराणि विज्ञापय ।
विद्योत्तमा — राजसभाभूषणं वर्तते,
स कालिदासः कवि र्मे पतिः ॥१६॥
विक्रमादित्यः – ब्रूषे किमिदं सत्यं भद्रे !,
कविलदासस्कविः त भर्ता ।
विद्योत्तमा— आमेवं सत्यं महाराज !
परिणेताऽयं मम राजकविः ॥१७॥
मामयमग्नि साक्षीकृत्य, पूर्वं पत्नीमङ्गीकृतवान् ।
परमधुना चरणसेविकामपि, मामभ्युपगन्तुमभिलषति नो ॥१८॥
तन्न्यायं कुरु न्यायप्रिय नृप !
परिणेता गच्छेत्परिणीताम् ।
विक्रमादित्यः—न्यायो भविता त्वां प्रति नूनं,
माकार्षीः सुभगे ! त्वं चिन्ताम् ॥१९॥
सभासदः—न्यायः क्रियतां राजन् ! ह्यस्यै,
कविसेवावसरः प्रदाप्यताम् ।
यस्माल्लोके कविजायेयं,
पत्या त्यक्ता दुःखं नेयात् ॥२०॥
विक्रमादित्यः—अथ कविं पिपृच्छिषामि तदहं,
काशीनरेशपुत्रीकथनम् ।
यत्किञ्चित्तत्सर्वं सत्यं ?:
चेदनृतं तत्स वदेन्निखिलम् ॥२१॥

कालिदासः—तत्सत्यं नास्त्यखिलं राजन् !
पत्नीं मतवानिमां यदाऽहम् ।
तदा पतिमियं नाऽमन्यत मां,
को भूयः पतिपत्नीबन्धः ? ॥२२॥

सभासदः— कालिदासकथनं नोपेक्ष्यं,
भवतो न्यायस्तादृशो भवेत् ।
येन भवेतां द्वावपि तुष्टौ,
राजन्नित्यं प्राथयामहे ॥२३॥

विक्रमादित्यः—भविता न्यायः समुचित एव,
सर्वे सन्तुष्टा भवितारः ।
विद्योत्तमे ! कथय किं सत्यं ?
यत्किञ्चित्कथयति कविरत्र ॥२४॥
निस्सङ्कोचं लज्जां त्यक्त्वा,
तत्सर्वं प्रकटय यत्सत्यम् ।

विद्योत्तमा—सत्यमार्गमाश्रयामि राजन् !
तत्कथयामि सत्यवृत्तं यत् ॥२५॥
मया प्रतिज्ञा कृतैकदेयं, यन्मे पतिः स विद्वान् भविता ।
यो मां पराजयेत विवादाद्, अभूत्तु तत्कर्तुमलं न कोऽपि ॥२६॥

विक्रमादित्यः—पुनस्तवाऽयं कथं विवाहः,
कविना सार्धमनेनाऽक्रियत ?

विद्योत्तमा— कविरयमासीत्तदा न राजन् !
परमेकोऽयमज्ञजन आसीत् ॥२७॥

विक्रमादित्यः—तत्कथमज्ञः परिणिनाय, वद,
त्वां विदुषीं शास्त्रार्थवादिनीम् ।

विद्योत्तमा— तां सर्वां छलपूर्णां घटनाम्,
प्रकटयामि, शृण्वन्तु भवन्तः ॥२८॥

Deemed University Rajiv Gandhi Campus 14596

ये पराजिता बुधा मत्तु ते, सर्वे सम्मिल्यैनमानयन् ।
मौनपण्डितं च तमुद्घोष्य, मौनविवादाय मां प्रैरयन् ॥२६॥
गुरुकुलस्याऽऽचार्यविबोधितैः, साङ्केतिकैः समाधानैस्तैः ।
तुष्टैः सर्वैः सभासज्जनैः, पराजिताऽहं समुद्घोषिता ॥३०॥
ततोऽनेन मौनपण्डितेन, सह मे पित्रा कृतो विवाहः ।
अहमप्येनं स्वीकृत्य पतिं, प्रमोदिताऽऽसं परमयमज्ञः ॥३१॥

विक्रमादित्यः—तत्त्वया पतिरयमङ्गीकृतो ?
विदुषि ! प्रकटय वस्तुतो मतम् ।
विद्योत्तमा— आमेवं राजाधिराज ! तं,
साम्प्रतमपि पतिमङ्गीकुर्वे ॥३२॥

सभासदः—तन्नृप ! कालिदासपत्नीयं,
पुनरिमां स किं स्वीकरोति न ?
भवन्नयोऽन्वेषयतु वस्तु तद्
येन सत्यमस्त्वगोपनीयम् ॥३३॥

विक्रमादित्यः—अथ यत्सत्यं भवत्समक्षं,
प्रकाशयति शीघ्रं निजरूपम् ।
सभासदः! शान्त्या हि भवन्तः
कर्णयन्तु मम निर्णयरीतिम् ॥३४॥

कालिदास ! विज्ञापय तथ्यं, विद्योत्तमावचः किं सत्यम् ?
निस्सङ्कोचं प्रकटय घटनां, यया द्वयोः स्याद् वियोगबोधः ॥३५॥

कालिदासः—महाराज ! सत्यं कथयेऽहं,
मेलनिशायां राजकुमारी ।
पतिमस्वीकुर्वती तदेयं,
मामत्यजद् मूर्खमुक्त्वा नृप ! ॥३६॥

मम वचने स्यात्किञ्चिदसत्यं, किमपि भवेत्तत्कथने तथ्यम् ।
तदयं दण्ड्यो जनोऽन्यथा वा, स्वीकार्यो मम पत्नीत्यागः ॥३७॥

विक्रमादित्यः—विद्योत्तमे ! किमेतत्सत्यम् ?
यदमन्यथा न पतिमिमं कविम् ।

विद्योत्तमा— न हि राजन् ! पतिमभ्युपगन्तुम्
न्यषेधिषं न कदापि कविमिमम् ॥३८॥

अहमद्यापि पतिमिमं मन्ये, परमयमेको मम परिणेता ।
यः परिणीतामस्वीकुरुते, तदहं भवतो न्यायमपेक्षे ॥३९॥

सभासदः – न्यायप्रिय राजन् ! न्यायः स्यात्,
कविना पत्नी स्वीकर्तव्या ।
पतिमद्यापि मन्यते सा तम्,
अतो न पतिविरहः स्यादस्याः ॥४०॥

विक्रमादित्यः—अये ! भवद्भिः शान्तैं भाव्यं,
न्यायः साम्प्रतमग्रे सरति ।
सत्यं समक्षमागच्छति भोः !
सावधानमखिलं निशम्यताम् ॥४१॥

कवे ! त्वमधुना वक्तुमनाः किं ?
युक्त्या पुषाण पत्नीत्यागम् ।

कालिदासः— विद्योत्तमा वदति यत्किञ्चित्,
तदस्ति राजन् ! समस्तमनृतम् ॥४२॥

तस्यामियं मेलराकायां, स्वधवं यदि मामग्रहीष्यदिह ।
तदियमद्य न स्थितिरभविष्यद्, यस्या नृप!साम्मुख्यं क्रियते ॥४३॥

यया कृतो न पुरा पतिमानस्तामहमद्य न पत्नीं मन्ये ।
अवसरवादिनीयमपि तन्मे, पत्नीत्यागपत्रमूरीकुरु ॥४४॥

सभासदः—संसूच्यतां भूप ! किं कविना,
पत्नीत्यागपत्रमपि दत्तम् ।
यदि दत्तं तच्छ्राव्यतां हि तद्,
येन स्युर्ज्ञापिताः सांसदाः ॥४५॥

विक्रमादित्यः—त्यागपत्ररक्षक ! यत्पत्रं,
त्वया गृहीतं कवेः सकाशात् ।
तद् वाचय, श्रावय सभासदो,
लिखितं किं कविना ? विज्ञापय ॥४६॥

कविः—राजादेशं प्राप्य रक्षकः स्वस्थानादुत्थाय करे च !
कृत्वा पत्नीत्यागपत्रकम्, अश्रावयद् वाचयित्वैवम् ॥४७॥

त्यागपत्ररक्षकः—राजाधिराज ! नृप ! उज्जयिनीनरेश !
आदित्य! विक्रम ! अहं कविकालिदासः ।
काशीनरेशदुहितुर्यदिदं विरुद्धम्,
आवेदये सविनयं शृणु तद्धि देव ! ॥४८॥

विद्योत्तमा वदति मां पतिमात्मनः सा,
सर्वत्र जीवनपथे प्रददाति बाधाम् ।
स्वात्मा यया नहि कदापि समर्पितो मे,
भूयः कथं मिथुनबन्धनमद्य राजन् ! ॥४९॥

षड्वर्षपूर्वमनया भवने स्वकक्षाद्
निष्कासितः स्वशयनादवतारितोऽहम् ।
कायोऽपि मह्यमपि नैव समर्पितः स्वः,
भूयः कथं मिथुनबन्धनमद्य राजन् ! ॥५०॥

पश्चान्निजात्परिणयादधुना कदापि
निर्वाहितो न परिणीतरमात्वधर्मः ।
शारीरिकं किमपि नाऽभवदर्पणं नौ,
भूयः कथं मिथुनबन्धनमद्य राजन् ! ॥५१॥
पूर्वन्त्वियं विपदि मां पतिमग्रहोन्नो
किन्त्वद्य सम्पदि हि मामुपयाति रन्तुम् ।
किं व्यस्मरद् मुखकृतां निजभर्त्सनां ताम् ?
भूयः कथं मिथुनबन्धनमद्य राजन् ! ॥५२॥
राज्ञः सुतेयमभिमानमपीह धत्ते
न श्रद्धधाति हि पतिं प्रति बोधयुक्ता ।
मन्ये प्रियां न तदिमां परिणीतपूर्वाम्,
तत्त्यागपत्रमुररीकुरु मेऽद्य राजन् ! ॥५३॥
कविः—इत्थं च श्रावयित्वा तत् स त्यागपत्ररक्षकः ।
नमयित्वा शिरस्तूष्णीं भूत्वा स्थानमुपाविशत् ॥५४॥
विक्रमादित्यः—सभासदः! किं श्रुतं भवद्भिः ?
तद्यल्लिखितं त्यागपत्रके ।
सभासदः— राजन् ! यदावेदितं कविना
तदनुसारमियमत्याज्या न ॥५५॥
विक्रमादित्यः—राजसुतां सम्प्रति पृच्छामि,
कविना यल्लिखितं तत्सत्यम् ?
सा सम्प्रति सङ्कोचं त्यक्त्वा,
प्रवदतु पोषयतु च निजपक्षम् ॥५६॥
विद्योत्तमा—तन्निखिलं यत्किञ्चित्कविना,
कथितं सत्यमस्ति हे राजन् !
मन्ये बुधं कविमिमं स्वपतिं,
कालिदासमज्ञं न तं परम् ॥५७॥

विक्रमादित्यः— न कालिदासः कविः केवलो,
राजकविरपि स राजपूजितः ।
कविरयं हि मे सभाभूषणं,
परमिममज्ञं कथं वदसि भोः ? ॥५८॥

विद्योत्तमा— अद्य कविरयं बुधो वर्तते
परमयमासीदज्ञः पूर्वम् ।

विक्रमादित्यः— पूर्वं सर्वस्त्वज्ञो भवति
विद्याभ्यासाज्जायते बुधः ॥५६॥

भारतीयनारी तु सेवते,मूर्खमपि पतिं त्यजति नैव तम् ।
त्वया तदाचरितं न,कविमिमं,लब्धुं किमसि वक्तुकामा त्वम्॥६०॥

विद्योत्तमा—भूप ! भवत्कथनं मन्येऽहं,
परमत्राऽयं पत्नीधर्मः।
यत्सा मनसा वाचा नित्यं,
कामयेत कर्मणा पतिहितम् ॥६१॥

अनया भावनया तदाचरं, येनाऽज्ञादयमभूत्कविर्ज्ञः ।
वचनमस्तु चेदनृतं मे नृप! तदहं दण्ड्या पृच्छ कविमिदम् ॥६२॥

विक्रमादित्यः—कथय, कवे! तव पत्नीकथनम्,
सत्यमिदं किं सुस्पष्टं वद ।

कालिदासः — वाढं राजाधिराज ! सत्यम्
तत्र न राजन् ! किञ्चिदसत्यम् ॥६३॥

विक्रमादित्यः—भोः सांसदवर्याः! शृण्वन्तु,
कथितं द्वयोरसत्यं नास्ति ।
तद् द्वावपि पतिपत्न्यौ मन्ये,
येन न कवेः स्वीकृतस्त्यागः ॥६४॥

कविना स्वैर्वक्तव्यैः सम्प्रति, विद्योत्तमा स्वीकृता पत्नी ।
वियुक्तकाले कृतः केनचिद् विवाहान्तरो नैव स्वेच्छया ॥६५॥

राजसुतेमं पतिं मन्यते,
विद्वासांवपि चैतौ द्वौ स्तः ।
अतः काव्यचर्चा द्वयो र्भवेत्,
तत्र भवेदधिकारी विजयी ॥६६॥

विजयी भवति कालिदासो यदि, तत्तां कुर्यान्न वा स भार्याम् ।
परं विरुद्धजयेन कविरिमां, पत्नीं स्वीकर्तेति निर्णयः ॥६७॥

सभासदः—निष्पक्षोऽयं भवतो न्यायो
येन पयोदुग्धे पृथक्कृते ।
सदा प्रकृत्या सम्मिलतो ये
पतिपत्न्यावपि तथा महीप ! ॥६८॥

साम्प्रतमस्तं गच्छति सूर्यः,
तत्कथमद्य काव्यचर्चा स्यात् ?
अत्र भवान्निर्दिशतु वयं किम्
गच्छेम तिष्ठेम वा नरेश! ॥६९॥

विक्रमादित्यः—भविता काव्यचर्चा श्वः कार्या प्रजासु घोषणा ।
द्वौ कुयास्तां तदभ्यासम् अद्य सभा विसर्जिता ॥७०॥

भारत उत्तरप्रदेश एटायां सोरोंपुरवासी,
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान्।
नाटककाव्यकथादिरचयिता रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयपञ्चदशसर्गं कृतवान् ॥७१॥

-★-

विद्योत्तमाकालिदासीयम् ।

षोडशः सर्गः

(काव्यचर्चा)

कविः—राजाज्ञया घोषितवान् हि भृत्यः,
कविकालिदासेन समं यदद्य ।
विद्योत्तमा काशीभूपदुहिता,
करिष्यते स्वां प्रति काव्यचर्चाम् ॥१॥

यो यो जनस्तां कर्णयितुकामो,
गच्छेत्स सर्वो नृपतेः सभायै ।
पूर्णा जनैः राजसभा ततः सा,
सिंहासनं राज्ञाऽलङ्कृतं च ॥२॥

"राजन् ! सभायां कविकालिदासो
विद्योत्तमा च स्त उपस्थितौ द्वौ।"
सभासदो राजानं न्यवेदयन्—
"भवन्निदेशं समयः प्रतीक्षते" ॥३॥

सभासदः—अधुना द्वयोर्वियोगो न स्यात्,
काव्यचर्चया द्वौ सम्मिलताम् ।
कृपया तदादिशन्तु भवन्तो,
येन काव्यचर्चा प्रारभताम् ॥४॥

विक्रमादित्यः—राजसुते ! यदि कालिदासमथ पतिमीहसे कविवरम्।
कविपत्नी कवयित्री स्यादिति पक्षे कुरु स्वमतिमरम् ॥
विधिना येन प्राप्नुयास्तं कुरु काव्ये तच्चर्चाम् ।
वयं सत्यं कथयामस्त्वाम् ॥५॥

विद्योत्तमा—अद्य दर्शिता दशा कीदृशी कथं भवेदुद्धारः ?
पार्थक्यं वाञ्छति पतिरस्मात्कः स्यान्मे परिवारः ?
किं कार्यं, कथयस्व, सत्पथं दर्शय मामभिराम !
इतो मामवलोक्य मे राम ! ॥६॥

कालिदासः—किं करवाणि तवाऽयं विषयो जगतीरचनामूलः ।
तत्र विकारोऽयं यो जातो मां स बाधते शूलः ॥
अतः कामये न त्वां पत्नीं क्षिप मयि नो रतिदाम ।
प्रिये ! त्वं गच्छेः काशीधाम ॥७॥

विद्योत्तमा—न कोऽपि मे त्वां विना जगत्त्यामेकस्त्वमेव बन्धुः ।
सखा मैत्रीं गतः सर्वतो रक्षककरुणासिन्धुः ॥
शकुन्तलाऽहं त्वं दुष्यन्तः पूरय कामं काम !
इतो मामवलोकय मे राम ! ॥८॥

कालिदासः—सा त्वं देववानिरसि विज्ञे ! ययातिरहमधोगतः ॥
प्रेम्णा यस्तां यातः स परं तया स्वपतिर्धिक्कृतः ॥
तव कामं मंस्ये किं त्वं नो यास्यसि मे वशताम् ?
प्रिये ! त्वं गच्छेः काशीधाम ॥९॥

विद्योत्तमा—न देवयानिरहं शर्मिष्ठा प्रेमी त्वमसि ययातिः ।
या कामयते तवाऽनुग्रहं सा देव्यहं नृजातिः ॥
करं गृहाण, गृहं नय, गमय न यौवने वनं माम् ।
इतो मे राम ! विलोकय माम् ॥१०॥

कालिदासः- मूर्खं मामुक्त्वा त्वया गृहान्निष्कास्याऽहं त्यक्तः।
त्वं विदुषी सा सोऽहं मूर्खस्त्वयि किं स्यामनुरक्तः ?
अथ मां पतिं कथं घोषयसि त्वं विस्मर मे नाम।
प्रिये ! त्वं गच्छेः काशीधाम ॥११॥

विद्योत्तमा—कविरिष्टोऽसि मया, त्वं रुष्टस्त्यक्त्वा मामुपविष्टः।
पतिपत्नीगतबन्धनमङ्गीकृत्य भवेः सन्तुष्टः।
व्याकुलसीताऽहं, त्वं रामो, नय मां प्रिय ! निजधाम।
इतो मामवलोकय मे राम ! ॥१२॥

कालिदासः—अहं कविर्विद्वान् पुनस्त्वं मूर्खं मां कथयसे।
यं प्रतिगम्य पतिं कथयन्ती कष्टं कथं प्रसहसे।
तं मूर्खं त्वं कथं विबाहितवती ? कथय, वद माम्।
प्रिये ! त्वं गच्छेः काशीधाम ॥१३।

विद्योत्तमा—सा प्रतारणाऽऽसीत्पराजिता ये विद्वांस आव्रजन्
सम्मिलितास्तेत्वां मूर्खमपि हि मौनबुधं तेऽकथयन्।
श्रावयितुं तद् वृत्तमहं प्रिय ! धारयामि लज्जाम्।
इतो मे राम ! विलोकय माम् ॥१४॥

कालिदासः—त्यज लज्जां यत्किञ्चित्तथ्यं तत्सर्वं प्रस्फोटय।
दुग्धं पयश्च द्वे अपि भद्रे ! परस्परं नो मेलय ॥
या घटना संघटिता विज्ञे ! श्रावय, श्रावय ताम्।
प्रिये ! त्वं गच्छेः काशीधाम ॥१५॥

विद्योत्तमा—मनोगता मे कामभावना, सा हृदयं न गता ते।
उट्रोच्चारणेन मूर्खत्वं ज्ञातं मया तदा ते ॥
तत्स्वीकृतं वार्तया तथ्यं कथं निषेधसि माम्।
इतो मामवलोकय मे राम ! ॥१६॥

कालिदासः—येन मौनपण्डितेन सह ते प्रिये ! विवाहो जातः ।
स मूर्खं आसीत्तेन कथं ते स स सङ्केतो ज्ञातः ?
तमग्रहीष्यस्तं यदि तत्किं स न प्राप्स्यद् बुधताम् ?
प्रिये ! त्वं गच्छेः काशीधाम ॥१७॥

विद्योत्तमा—यदग्रहीष्यं ते तद्रूपं तदहमृतं कथयामि ।
तन्नाद्रक्ष्यं कवे! तस्य यत्कविरूपं पश्यामि ॥
तदग्रहणप्रतिकारं किमिमं गृह्णासि कथय माम् ।
इतो मामवलोकय मे राम! ॥१८॥

कालिदासः–यत्कुर्वेऽहं वेत्सि न विज्ञे! नायं तत्प्रतिकारः ।
लोके लोकैरयं कथ्यते विनिमयस्य व्यवहारः ।
यदा समर्पितवती स्वं न तत्कथं जिघृक्षसि माम्?
प्रिये! त्वं गच्छेः काशीधाम ॥१९॥

विद्योत्तमा—वारद्वयं कायसम्पर्कं कर्तुं मया प्रयतितम् ।
परं त्वया हि कदापि न प्रियतम! तथा कुर्तुमभिलषितम् ।
किं क्लीबत्वं गतं पौरुषं पुरुष! न कथयसि माम् ?
इतो मामवलोकय मे राम! ॥२०॥

कालिदासः—युक्तं तन्नैवोक्तं सुभगे! त्वमेव मम कविताऽसि ।
मम पौरुषं तदस्ति येन त्वं प्रसववती भवितासि ॥
परं स समयः समागतो नो, विस्मर तत्परताम् ।
प्रिये! त्वं गच्छेः काशीधाम ॥२१॥

विद्योत्तमा—मयि सत्यां कस्यापि पिता स्याः पितामहो वा च त्वम्।
श्वशुरो मातामहश्च कस्य तु यदि वाञ्छसि निजसत्वम्
तन्नानारूपत्वं ते प्रिय! कर्तुंवागता त्वाम् ।
इतो मे राम! विलोकय माम् ॥२२॥

कालिदासः – कस्याप्यहं श्यालकस्त्वदृते मातुलश्च कस्यापि ।
श्यामोऽहं त्व गौरो सुन्दरि! नाऽऽवयोश्च समतापि ॥
यदि मामिच्छसि तत्त्वं गच्छेर्मादृशविरूपताम् ।
गच्छ काशीं त्वं विस्मर माम् ॥२३॥

विद्योत्तमा—पुरुषो वर्तते स यः सर्वं पत्नीमेव मन्यते ।
सा स्यात् किंरूपापि परं तन्मानो नैव हन्यते ॥
कृष्णं गौरं रूपनाम तद गुणैर्वृणोमि त्वाम् ।
इतो मे राम ! विलोकय माम् ॥२४॥

कालिदासः—गुणाः क्वमयि ते सन्ति गुणास्त्वयि धनसम्पदः समस्ताः
मां प्राप्नुया न वा द्विधापि सा त्वं प्रियमोदकहस्ता ॥
राजसुता त्वं, मादृशा जनाः समेषितारस्त्वाम् ।
गच्छ काशीं त्वं विस्मर माम् ॥२५॥

विद्योत्तमा— त्वं हृदयं मे श्वासोऽहं ते मार्गस्त्वञ्च गतिरहम् ।
त्वं मे प्राणाः कायोऽहं ते कामस्त्वञ्च रतिरहम् ॥
त्वं कविरहं कल्पना, त्यक्त्वा कुत्र वसेयं त्वाम् ?
इतो मे राम ! बिलोकय माम् ॥२६॥

कालिदासः—यस्य सकाशे निजं न किञ्चित्कस्मै किं स दास्यति ?
यावदस्ति यद्भाग्ये भोग्यं तावत्स ग्रहीष्यति ॥
न मेऽत्र किञ्चत्तवापि विज्ञे ! कस्य स्वामी स्याम्?
गच्छ काशीं त्वं विस्मर माम् ॥२७॥

विद्योत्तमा—त्वं सर्वं मे नाथ ! जीवितं तवाहमस्मि जीवनम् ।
त्वं भगवानसि भगस्तवाहं धनी त्वमस्म्यहं धनम् ।
त्वं मे स्वामी, कथं कथयसे? पतिं तु मन्ये त्वाम् ।
इतो मे राम ! विलोकय माम् ॥२८॥

कालिदासः—त्वं स्वीकृतशास्त्रार्थं कृत्वा पराजिताऽऽसि किन्तु ।
विवाहितापि विवाहितमपि नो स्वीकृतवती पतिन्तु ॥
पतिरासीन्मूर्खो विज्ञो वा सोऽमन्यत तु त्वाम ।
गच्छ काशीं त्वं विस्मर माम् ॥२९॥

विद्योत्तमा—पतिं त्वामहम् मन्ये प्रियतम ! त्वं देहोऽहं छाया ।
चन्द्रस्त्वं चन्द्रिकाऽहमन्ते त्वमीश्वरोऽहं माया ॥
मम कमलाङ्गविकासरविस्त्वं प्रक्षिप रतिकरदाम ।
इतो मामवलोकय मे राम ! ॥३०॥

कालिदासः—द्वितीये वारेऽपि स न मां प्रति त्वया दर्शितो भावः ।
विचारवैषम्ये मे शुभ्रे ! कथमयमश्रुस्रावः ?
मम बुधतायामपि नो स्वीकृतवती प्रिये ! पतिताम्
गच्छ काशीं त्वं विस्मर माम् ॥३१॥

विद्योत्तमा—बुधोऽपि मे प्रश्नोत्तरदाने तदा समर्थो नाऽभूः ।
तस्मादद्य कविस्त्वं भूतो, वद का सा कविताभूः ?
विस्मृतोसि तां कथं कथय मां नय तां निजकविताम् ।
इतो मे राम ! विलोकय माम् ॥३२॥

कालिदासः—यत्र मया काव्यानि कृतानि त्वमेव सा कविताभूः ।
त्वया कृतोहं कविः कविप्रिये ! त्वं कविकामा माभूः ॥
रक्ष कवित्वं मे त्वद्विरहो जनयति मे कविताम् ।
अतस्त्वं गच्छेः काशीधाम ॥३३॥

विद्योत्तमा—काव्यत्रयं गृहीत्वा यत्त्वं मम समीपमायातः ।
मनोगतो मे रतेः पुनः प्रिय ! कामपतिस्त्वं जातः ॥
विहाय पत्नीं पुनः कथं प्रिय ! पलायितो गुरुधाम ?
इतो मामवलोकय मे राम ! ॥३४॥

कालिदासः—त्वं नृपपुत्री हर्म्यवासिनी त्वहं कुटीरनिवासी ।
त्वं सुन्दरी सलावण्या मुखचन्द्रेण पूर्णमासी ॥
मयि सर्वं वैषम्यमत्र भोः सुभगे ! विस्मर माम् ।
प्रिये ! त्वं गच्छेः काशीधाम ॥३५॥

विद्योत्तमा—त्वं चन्द्रमा पूर्णिमाऽहं ते तदियं तथा समस्या ।
चन्द्रं विना पूर्णिमायाः का शोभा यथा यदस्याः ॥
वादविवादवारिदान्यस्तैः करैर्विलासय ताम् ।
इतो मे राम ! विलोकय माम् ॥३६॥

कालिदासः—अह कामये तामयि ! पत्नीं या स्वेच्छया त सरतु ।
वशंवदा सा प्रियंवदा सा पतिव्रता सा भवतु ॥
यदा तान् गुणान् द्रक्ष्यामि त्वयि तदा मनिष्ये त्वाम्।
गच्छ काशीं त्व विस्मर माम् ॥३७॥

विद्योत्तमा—काशीं नहि यास्यामि, नहि त्वामपि विस्मृतं करिष्ये ।
प्रिय ! सहचर, मां नय हि,सेवया तव दुःखानि हरिष्ये।
सत्यवान् त्वमहं सावित्री, स्वीकुरु मे रतिताम् ॥
इतो मे राम ! विलोकय माम् ॥३८॥

कालिदासः - यद्यभविष्यस्त्व सावित्री, तत्स्यां पत्नीहीनः ?
गृहिणी स्यात्काशीप्रासादे, पतिर्भवेद् गृहहीनः ?
त्वमभिमानिनी विद्वत्ताया, व्रजसि न किं स्थिरताम् ?
गच्छ काशीं त्व विस्मर माम् ॥३९॥

विद्योत्तमा—सूपं करपट्टिकाः पायसं दुग्धं दधि संयावम् ।
माषगर्भिका मल्लपूपिका, ज्ञात्वा ते प्रतिभावम् ॥
निर्मातुं व्यञ्जनवैविध्यं नय गेहं प्रिय! माम् ।
पश्य मामहमिच्छामि त्वाम् ॥४०॥

कालिदासः—लेह्यमह लेढास्मि सुगुल्फे ! रोचते स्म यन्मह्यम् ।
मिलनं स्यादावयोः कथं, ते प्रियं न तदभूत्सह्यम् ॥
पत्नी पत्या द्योतते यथा भास्करेण भाधाम ।
गच्छ काशीं त्वं विस्मर माम् ॥४१॥

विद्योत्तमा—सुदक्षिणाऽहं त्वञ्च दिलीपो येन कृता गोसेवा ।
सन्ततये प्रयतन्ते ये नो, कथय सन्ति ते के वा ?
त्वमपत्याय कथन्न दर्शयसि तादृशतत्परताम् ?
इतो मे राम ! विलोकय माम् ॥४२॥

कालिदासः— मत्तः सन्ततिमवाप्तुमिच्छा यद्यासीद्धि त्वदीया ।
राजसभायामद्य समस्या तन्नेयमस्मदीया ॥
शिक्षितासि परमशिक्षितापि हि जानीते निजताम् ।
गच्छ काशीं त्वं विस्मर माम् ॥४३॥

विद्योत्तमा— पतिव्रताऽहं पतिस्त्वदन्यो मम कः प्रिय ! कथय त्वम् ।
प्रतिज्ञया बुधपतिं कामये व्रजसि कथं वामत्वम् ? ॥
पाणिग्रहणं कृतं त्वया मे प्रिय ! कथं त्यजसि माम् ?
पश्य मामहमिच्छामि त्वाम् ॥४४॥

कालिदासः— वादविवादान्न कुरु विरम शृणु न त्वां पत्नीं मन्ये ।
न मे यौनसम्बन्धस्त्वयि तत्कथं विचारा अन्ये ?
त्वं नृपपुत्री सा त्वं विदुषी तन्न कामये त्वाम् ।
अतस्त्वं गच्छेः काशीधाम ॥४५॥

विद्योत्तमा— याऽऽसीद् विद्योत्तमा जितबुधा काशीनरेशपुत्री ।
सा मृत्वा त्वामधिगन्तुं प्रिय ! पुनरभूत्कवयित्री ॥
अद्य यास्याम्यहं गृहं ते सहैव नीत्वा त्वाम् ।
इतो मे राम ! विलोकय माम् ॥४६॥

कालिदासः—किं त्वमद्य भो ! राजकविं मां पतिं कर्तुं कामाऽसि?
कपटं न्यस्य,हृदा सत्यं त्वं कथय, कस्य वामाऽसि?
मामनुगच्छ न,विचर स्वतन्त्रं, स्वैरं याहि स्वधाम।
गच्छ काशीं त्वं विस्मर माम् ॥४७॥

विद्योत्तमा—त्वं मे पतिर्भार्याऽहं ते स्खलितं कृतं क्षमस्व।
नमामि चरणौ स्पृशामि ते प्रिय! दयस्व मयि च रमस्व।
मामिच्छसि यदि मौनं धारय, स्वीकुरु मे रतिधाम।
इतो मामवलोकय मे राम! ॥४८॥

कविरयमस्ति मदीयां कवितां शृणुत सभासत्सन्तः!
कविपत्नी कवयित्री का स्यान्मामन्तरेण हन्त!
कारयेत शुभमस्मन्मेलं गच्छावो निजधाम।
इतो मामवलोकय मे राम! ॥४९॥

अहो दैव! बलवानयं स कः खेलस्त्वया प्रसूतः?
मूर्खमणिःपूर्वं यो ह्यासीदद्य कविमणिर्भूतः।
परमाश्चर्यं यत्स मूलतां नैव मन्यते ताम्।
इतो मे राम! विलोकय माम् ॥५०॥

साऽहं पत्नी, या जन्मान्तरसङ्गिनी भवति पत्युः।
पत्या त्यक्ताया अपि तस्याः कथं भवति नो मृत्युः?
जीवति पत्यौ दहेच्चितायां किं सा कथयत माम्।
पश्य मामहमिच्छामि त्वाम् ॥५१॥

तपन! दिशो दश! पवन! गगन! हे दिक्पालाः! वसुन्धरे!
शृणुत ममाऽऽवेदनं शीघ्रमयि! हर!पार्वति! चले! हरे!
नारीधर्ममर्मभेदं भोः! प्रस्फोटयत सुकाम!
इतो मामवलोकय मे राम! ॥५२॥

श्रृणुत हि कर्णधारमुख्यानां कर्णाः! वदत मुखानि!
अन्यायोऽयं नरस्य नारीं प्रति, किमहं करवाणि?
राजसभायां स्थितोऽपि न स्वीकुरुते स सत्यताम् ।
इतो मे राम! विलोकय माम् ॥५३॥

सभासज्जनः—राजसभेयं विक्रमस्य सा, या न्यायेन प्रसिद्धा ।
देशे देशे नयैर्वैभवैर्धनादिकेन समृद्धा ॥
अस्याः ख्यातिः सरति सर्वतस्त्वं नो विस्मर ताम् ।
वयं सत्यं कथयामस्त्वाम् ॥५४॥

विद्योत्तमा—यत्किञ्चिदहं वदामि सर्वं तत्सत्यं श्रीमन्तः!
मिथ्या चेन्मे कथनं तदिमं वादयन्तु हि भवन्तः ॥
तूष्णींभावादस्य तु जाने स्वीकुरुतेऽयं माम् ।
इतो मामवलोकय मे राम! ॥५५॥

सभासज्जनः—तूष्णीं भूतः कथं कवे! त्वं किमिमामङ्गीकुरुषे?
किं मौनेन स्वीकृतिं दत्वा पीडामस्या हरसे?
पराजितोऽसि काव्यचर्चायाः, वाचा स्वीकुरु ताम् ।
वयं सत्यं कथयामस्त्वाम् ॥५६॥

कालिदासः—यत्प्राक्पतिर्वदति तत्पत्नी शृणोति कर्णौ दत्वा ।
ब्रूते यत्सा ततस्तत्पतिः कुरुते प्रीतिं मत्वा ॥
तयो र्विवादं श्रृणोति जगती, लोचे तन्नयताम् ।
भद्र! सत्यं कथयेऽहं त्वाम् ॥५७॥

सभासज्जनः - इयं विचित्रा गति र्जगत्यास्तत्र नरा मोदन्ते ।
परस्परं कलहं कुर्वन्तो यत्रजना विवदन्ते ॥
परं विवादो युवयोर्गच्छति राजनीतिग्रहताम् ।
वयं सत्सं कथयामस्त्वाम् ॥५८॥

14596

कालिदासः—यदा वर्तते कोऽपि विवादः प्रसरति जनं जनमितः।
चर्चाविषयो भवति सं लोके तदहं मौनं प्रगतः ॥
वक्तुं वेला नास्ति, नरः पश्यति नारीचरताम् ।
भद्र! सत्यं कथयेऽहं त्वाम् ॥५९॥
विक्रमादित्यः—कथय कवे! वदतीयं विद्योत्तमा यद्धि नृपपुत्री ।
तत्सत्यं किं तवाऽवाप्तये सा भूता कवयित्री ॥
कविपत्नी कवयित्री स्यादिति सा स्थानं लभताम् ।
वयं सत्यं कथयामस्त्वाम् ॥६०॥
कालिदासः—सत्यमस्ति राजन्! कथयेऽहं तत्कथनं नो मिथ्या ।
केऽपि शिक्षिता अप्यशिक्षिताः सन्ति, कथेयं सत्या ॥
साऽपि तेषु सम्मिलिता, याता तादृशदुश्चरताम् ।
भूप! सत्यं कथयामि त्वाम् ॥६१॥
विक्रमादित्यः—दुश्चरता सा का कथयेयं भद्रा भाति विनीता ।
तवशुभभाग्यमभूद्धि, त्वयेयं राजसुता परिणीता ॥
काशिराजजामाता त्वमभूर्नय निकेतमेनाम् ।
वयं सत्यं कथयामस्त्वाम् ॥६२॥
कालिदासः—इयं स्वार्थिनी राजन्! पूर्वं सम्बन्धं नाऽमन्यत ।
उचितस्थितिं मां तु दृष्ट्वा सा पतिमुक्त्वेयमधावत ॥
नाहं विश्वसिमीयं त्यक्तुं शक्नोति पुनर्माम् ।
भूप! सत्यं कथयामि त्वाम् ॥६३॥
विक्रमादित्यः—विश्वासं कुरु खलु कथयामो राजसुताया वचनात् ।
कवे! पतिं मंस्यते त्वामियं परं किमन्यत्कथनात्?
युवयोर्द्वयोर्मिथुनता लोके स्वस्थानं लभताम् ।
वयं सत्यं कथयामस्त्वाम् ॥६४॥

कालिदासः—येनेयं विवाहिता राजन्! अपमानितः सोऽनया ।
पत्न्या त्यक्तोऽहं ममाऽधुना प्रयोजनन्तु किन्तया ?
निवत्स्यतीयं सह न जीवने परिणेष्ये त्वपराम् ।
भूप! सत्यं कथयामि त्वाम् ॥६५॥

विक्रमादित्यः—अन्या का तव हृदये निवसति? यामधुना त्वमिच्छसि ।
शरणं गतां भार्यां त्यक्त्वा मनसा तत्र गच्छसि ॥
तवाऽऽचरणमेतत्कथयेमहि किन्नहि दुश्चरताम् ?
वयं सत्यं कथयामस्त्वाम् ॥६६॥

कालिदासः—उज्जयिनीनरेश! शृणु वचनं, नेयं मम दुश्चरता ।
कृतो मया नाऽपरो विवाहस्त्वस्याः पाणिं हरता ॥
परिणीतामिह पत्नीं मन्ये नैव काञ्चिदपराम् ।
भूप! सत्यं कथयामि त्वाम् ॥६७॥

विक्रमादित्यः—कवे! युक्तमुक्तं, सज्जनतात्वियमस्ति तावकीना ।
पतिचित्तं पत्न्या जेतव्यं मतिरस्ति मामकीना ॥
मनुकथनं सत्यं स्यात्पत्नी गच्छतु पतिवशताम् ।
वयं सत्यं कथयामस्त्वाम् ॥६८॥

न्यायो भविता स्थापय पक्षं न्याये कुरु विश्वासम् ।
न्यायप्रियनृपसुते! दीर्घमुष्णं क्षिप नो निश्वासम् ॥
पत्नी स्वपतिं जयति गिरा कुरु पतिविषयकचर्चाम् ।
वयं सत्यं कथयामस्त्वाम् ॥६९॥

विद्योत्तमा—नाहमस्मि पत्नी चेदस्य श्रीमन्! शृणु मे वचनम् ।
महाराज! कथमस्य मां प्रति प्रिये! भवति तत्कथनम् ॥
सर्वे जानन्तीमे—पत्नीमङ्गीकुरुषे माम् ।
पश्य मामहमिच्छामि त्वाम् ॥७०॥

एको यस्यास्त्वमेव नाथो देवानामपि देवः ।
मनोमोदकै हृदयमन्दिरे कामसुमैः कृतसेवः ॥
तां विहाय वद कां कामिनीं कामयसे कृतकाम!
इतो मामवलोकय मे राम! ॥७१॥
नानारूपस्त्वमसि तावकी रूपवती भार्याऽहम् ।
व्यर्थं न स्यान्नौ सुयौवनं युवासि युवती चाऽहम् ॥
मिथुनत्वेन लभेथास्त्वं मामहं लभेय त्वाम् ।
इतो मे राम! विलोकय माम् ॥७२॥
विस्मृतोऽसि किं तव गौः साऽहं या दुग्धा त्वया पुरा ।
दुह्यन्ते कथमद्य नो त्वया तस्यास्ते पयोधराः?
वसुन्धरां मां रसम्भारामिह को नेच्छति दयिताम्?
पश्य मामहमिच्छामि त्वाम् ॥७३॥
कामो दुरतिक्रमः परं प्रिय! सर्वं इतस्ततपाशम् ।
त्यक्त्वा मां न गच्छ ह्यन्यस्याः कस्याश्चित्तु सकाशम् ॥
पत्नीं पश्येन्नरः सकामो न तु नारीमपराम् ।
पश्य मामहमिच्छामि त्वाम् ॥७४॥
भारतस्य प्रतिकणं त्वावयोः रूपं निहितमस्ति तत् ।
सांसारिकविपयस्य जीवितं स्वरूपमुच्यते हि यत् ॥
तदहं पत्नीषु स्वां लोके लोके पतिषु त्वाम् ।
इतो मे राम! विलोकय माम् ॥७५॥
लक्ष्मीरहं प्राप्तये यस्या बहुभिः कृतः प्रयत्नः ।
सफलोऽभूदच्युतश्छद्मना तत्र स दैत्यसपत्नः ॥
कपटं कृत्वा विवाहिताऽहं त्वयापि कपटिन् श्याम!
इतो मामवलोकय मे राम! ॥७६॥

त्वं शङ्करो येन विधृताऽहं सा वसुजननी गङ्गा ।
जनकल्याणनिपीतगरलशमनायोत्तालतरङ्गा ॥
नहि कथमद्य शिरसि धारयसे तां प्रिय! मां गङ्गाम् ।
इतो मे राम! विलोकय माम् ॥७७॥
अनुसूयाऽहं, त्वमृषिरत्रिरसि, तव सेवां च करिष्ये ।
ब्रह्माऽच्युतशङ्करात्मकं ते गर्भमहं च धरिष्ये ॥
लोकेऽहं सुत रैवतीं निजां प्रिय! वलरामं त्वाम् ।
इतो मे राम! विलोकय माम् ॥७८॥
कण्ठस्त्वमहं मधुरा वाणी, सिन्धुरहं त्वं तीरः ।
अहं त्वदीयं शरीरमर्धं, त्वं मे प्राणसमीरः ॥
द्वयोरस्ति सम्बन्धः, पत्नी पश्यति तव पतिताम् ।
इतो मे राम! विलोकय माम् ॥७९॥
अहं द्रौपदी स त्वमर्जुनो येन बाणसन्धानम् ।
कृतं मातृवचसाऽकरोच्च यो मम भोगे फलमानम्॥
अद्य तमस्यसि कथं न बाणं कामपूर्णं काम!
इतो मामवलोकय मे राम! ॥८०॥
कमलानां रविरेकोऽनेकाः सन्ति तस्य कमलिन्यः ।
तव नैका वध्वोऽपि सन्तु मे नाथो नास्ति त्वदन्यः ।
माञ्च सनाथां न कुर्वनाथां, देहि कराश्रयताम् ।
इतो मे राम! विलोकय माम् ॥८१॥
अहं सुभद्रा स त्वमर्जुनो येन कृतं मम हरणम् ।
त्वं तस्याःप्रियपतिरसि मे च स्पन्दितमन्तः करणम् ।
कथं नाद्य कुरुषे स्वपार्श्वगां हर्तुं तामिच्छाम् ?
पश्य मामहमिच्छामि त्वाम् ॥८२॥

अहं वर्तिका त्वं मे दीपो निवसति यस्मिन् स्नेहः ।
येन जीवनं लभते लोके शनैः शनैर्मम देहः ॥
दीपक! सकलं जगत्प्रकाशय स्वस्मिन् धृत्वा माम् ।
पश्य मामहमिच्छामि त्वाम् ॥८३॥
ताराऽहं ते हरिश्चन्द्र! या काश्यां विक्रयं गता ।
राज्यं पितरौ न्यस्य धर्मविभवं त्वां सा समागता ॥
अद्य कथं न धर्मरक्षायै विक्रीणीषे माम्?
पश्य मामहमिच्छामि त्वाम् ॥८४॥
त्वं सोऽर्थो यं वागनुधावति यथा स्मृति वै वेदम् ।
सूत्रं सदा स्फोटयति सिद्धं सर्वथा हि जनभेदम् ॥
अहं रोहिणी त्वं मे चन्द्रस्तदनुसरामि त्वाम् ।
इतो मे राम! विलोकय माम् ॥८५॥
कथय देव! किमियं सीमान्तं गता न मे हि तपस्या?
येन प्रसीदसि नैव, विचित्रा गतिर्मा विना कस्याः ?
भूभृद्दुहिताहं भोः शङ्कर! कैलासं नय माम् ।
पश्य मामहमिच्छामि त्वाम् ॥८६॥
अहं सुरा त्वं सुरः प्रियकवे! मदिराऽहं त्वं पात्रम् ।
अहमिन्द्राणी पतिस्त्वमिन्द्रः शोभाऽहं त्वं गात्रम् ॥
वचोनर्तिकीं कथं सभायां मां कुरुषे रम्भाम्?
इतो मे राम! विलोकय माम् ॥८७॥
त्वं नाथोऽसि तथापि स्यामहं किमनाथा? सहिष्यसे ?
वसामि हृदये तव, मया विना किं कवितां करिष्यसे?
चिन्तनेन मे कविस्त्वमभवो, न स्वीकुरुषे माम् ।
पश्य मामहमिच्छामि त्वाम् ॥८८॥

पुरूरवास्त्वं साऽहमूर्वशी या गगनादधोगता ।
प्रेम्णा वशमागता भ्रमन्ती तं नीत्वा च स्वर्गता ।।
स इव सुन्दरीं समालोचयन् गतो न किन्नरताम् ?
इतो मे राम! विलोकय माम् ।।८९।।
अहं कुमुदिनी कुमुदकरस्त्वं विकसय मे कुमुदाङ्गम् ।
निशाकरस्त्वं त्वहं निशा सा, शोभय मे प्रियमङ्गम् ।।
तमो विनाशय शीतलकिरणैश्चन्द्र! प्रकाशय ताम् ।
इतो मे राम! विलोकय माम् ।।९०।।
सा बलवती हिडिम्बाऽहं प्रिय! यस्या बलं धिक्कृतम् ।
पूर्वं त्वया तद्वनं गत्वा ततो बलाद् वशीकृतम् ।।
भीम! भीमरूपं प्रदर्श्य तां कुरुषे किं न निजाम्?
पश्य मामहमिच्छामि त्वाम्।।९१।।
यद्यहमस्या राजसभाया निर्यास्यामि निराशा ।
तन्नो किं दुष्यन्तसमो मे करिष्यसे मेलाशाः?
पश्चात्तापं प्राप्स्यन् हृदि मां नेष्यसि न स्मरताम्?
इतो मे राम! विलोकय माम् ।।९२।।
लक्ष्मण! कथमागतोऽसि लक्ष्मीं त्यक्त्वा प्रसादे माम् ।
या मनसा विह्वला प्रतिकणं पश्यन्ती प्राप्ता त्वाम्।।
किं भ्रातु विक्रमस्य भीत्याऽऽगच्छसि न तूर्मिलाम्?
पश्य मामहमिच्छामि त्वाम् ।।९३।।
अहं त्वदीया विभा विभुस्त्वं मया पृथक्का शोभा?
मेघग्रहै र्ग्रस्तभानोः सा यथा भासते नो भा ।।
तथा ग्रहग्रस्तस्य ते गता पत्नी न भासताम् ।
इतो मे राम! विलोकय माम् ।।९४।।

यदि गृह्णीषे न मामकाले मृत्युर्मयि पतिष्यति ।
ममेन्दुमत्या विरहेऽजस्य तु तव पातो भविष्यति ॥
अहं त्वदीया कला कलाधर! स्वस्मिन्मेलय माम् ।
पश्य मामहमिच्छामि त्वाम् ॥९५॥
विद्वद्युद्धे ते वचोरथो विषमगतो भवेद् यदा ।
त्वया सङ्गता कीलस्थाने कैकेयीसमा तदा ॥
जीवनचक्रेऽङ्गुलिं प्रदाय प्रिय! श्रयिष्ये त्वाम् ।
इतो मे राम! विलोकय माम् ॥९६॥
गन्तासि त्वं यद्यद् रूपं तत्तद् रूपं लप्स्ये ।
यत्र भविष्यसि तत्रैव त्वां लब्धुं बीजं वप्स्ये ॥
धृतराष्ट्रोऽपि भवसि यदि तदहं गान्धारी न स्याम्?
इतो मे राम! विलोकय माम् ॥९७॥
मत्स्यजीवनं जीवनं विना यथा व्याकुलीभवति ।
तथा त्वद्विना व्याकुलाऽस्मि, मे भवान् हि जीवनमवति ।
त्वं जीवनमसि जीवनस्य मे तद् वर्धय नितराम् ।
इतो मे राम! विलोकय माम् ॥९८॥
स शोभते सारसो वने नो योऽस्ति सारसीहीनः ।
त्वं न शोभसे तथा मां विना, पतिरसि हि मामकीनः ॥
संसारः संसरति परं प्रिय! किन्न संसरसि माम्
पश्य मामहमिच्छामि त्वाम् ॥९९॥
साऽहमस्मि कन्दर्पमञ्जरी, यस्याः प्रसरति गन्धः ।
तस्या गुञ्जनकरोऽसि भ्रमरो, जिघ्रसि तां न किमन्धः?
विस्मृतोऽसि कथमद्य न कुरुषे मयि तां गुञ्जनताम्?
इतो मे राम! विलोकय माम् ॥१००॥

जन्मान्तरतः पिपासिताऽहं तृषं शमय मे कामम् ।
आह्वयामि रतिपथ प्रगन्तुं किं त्वं गच्छसि वामम्?
रोदिति राधा तव विना त्वया विहसति जगती श्याम ।
इतो मामवलोकय मे राम! ॥१०१॥
पश्य मदीये नयने एते तौ द्वौ मार्गौ ते प्रिय!
याभ्यां मनस्ततो मे हृदयं गतोऽसि, मां मनोनय ॥
मीलय नो नेत्रे, उन्मीलय, तत्र प्रवेशय माम् ।
पश्य मामहमिच्छामि त्वाम् ॥१०२॥
ममाऽधरे मधुरं ते गानं, नूपुरेषु सङ्गीतम् ।
कामकेलिविरहितं विना त्वां मदीयमायुर्बीतम् ॥
एहि, कामतन्त्रिकास्वरानिह झङ्कुरुकामं काम!
इतो मामवलोकय मे राम! ॥१०३॥
जीवननौका नौकाधारं विना भवं किन्तरतु?
एकस्त्वमीदृशोऽसि योऽत्र मे जीवनदुःखं हरतु ॥
स्वीयैश्चलैरपत्यै र्बालैः कुरु सचलं हृद्धाम ।
गतो मामवलोकय मे राम! ॥१०४॥
त्वमर्जसि हलहं गतिर्मे विना तव योगं नो सफला ।
नाना नारीं नरस्य लोके जीवनयात्रा विफला ॥
तत्साधयति तयोः संयोगः संसारसारताम् ।
इतो मे राम! विलोकय माम् ॥१०५।
शिशवस्ते ताताकुर्वन्तः परस्परं पश्यन्तः ।
लब्ध्वाऽऽवयोरिङ्गितं ते स्युस्त्वाञ्च माञ्च चुम्बन्तः ॥
तादृग् गृहे भवेत्तन्नेतुं न स्वमीहसे माम्? ।
पश्य मामहमिच्छामि त्वाम् ॥१०६॥

प्रिय! प्रसीद सह त्वया मदीया कुहूश्चन्द्रमसमेष्यति ।
विना त्वां तद्दिनमतिमिरमपि मे सध्वान्तं सेत्स्यति ॥
ऋतं कथय मनसा किं मे तामिच्छसि दुर्दिनताम् ।
इतो मे राम! विलोकय माम् ॥१०७॥
त्वां तु विना मह्यं न रोचते काशिराज प्रासादः ।
रुष्टपतिं पत्नी प्रसादयेत् तत्को वादविवादः? ॥
त्वदृते सम्पन्नता मदीया गच्छति विपन्नताम् ।
इतो मे राम! विलोकय माम् ॥१०८॥
यौवनतल्पमहं ते प्रियतम! यदलंकृतं त्वदर्थम् ।
जन्मनि जन्मनि तत्कृतशयितं त्यक्तं त्वया किमर्थम्?
शून्यमद्य तत्त्वमारुह्य किं नयसि न निजवशताम्?
इतो मे राम! विलोकय माम् ॥१०९॥
यदा त्वमश्वोऽभूरश्वाऽहं शुकस्त्वमहं शुकी ते ।
हंसस्त्वमहं हंसी न्यगदस्त्वं मामेहि विभीते! ॥
त्वं जलदो जलधाराऽहं ते याताऽस्मि बन्धताम् ।
इतो मे राम! विलोकय माम् ॥११०॥
कालिदासः—विविधाः कला वेत्सि तच्चक्रं नाहं प्रगन्तुकामः ।
ऋजुनयव्यवहारस्तु मदीयस्त्वया कथ्यते वामः ॥
तत्त्वं कलाः स्वकीया रक्ष हि स्वाञ्च कलावत्ताम् ।
गच्छ काशीं त्वं विस्मर माम् ॥१११॥
विद्योत्तमा—अहं त्वया कथ्ये कलावती तत्त्वं नन्दं गच्छेः ।
कं लातीति कलेत्यर्थान्मां तदानन्दमपि पृच्छेः ॥
भूत्वा कलावान् तु मम कलया गच्छ मयि रमणताम् ।
इतो मे राम! विलोकय माम् ॥११२॥

सा का नारी, यस्यां भवति न कापि कला कललोला ।
लज्जावती, कापि निर्लज्जा, रम्या चञ्चलचोला ॥
हस्तिगामनी, मधुरभाषिणी गच्छति पतिरमताम् ।
पश्य मामहमिच्छामि त्वाम् ॥११३॥
तासु प्रमुखतमाऽहं जाने सर्वगुणैः सम्पन्ना ।
यौवनरूपधनादिसमृद्धा तव विरहेण विपन्ना ॥
मातृत्वं लब्धुं हि कामये प्रिय! तव नियोगताम् ।
पश्य मामहमिच्छामि त्वाम् ॥११४॥
साऽहं वसुधा पिपासिता प्रिय! तं पश्यति याऽऽकाशम् ।
यस्मिन्नपतितजलेन क्लिन्ना तपसा तप्ता साशम् ॥
कृष्ट्वा वप्त्वा वसूनि लब्धुं रसेन तर्पय ताम् ।
पश्य मामहमिच्छामि त्वाम् ॥११५॥
काव्यविरचनात्पूर्वं पत्नीमैच्छो मामविलम्बम् ।
तामधिगच्छ त्वदाश्रयमीहे कुरुषे कथं विलम्बम् ॥
मौनं त्यक्त्वा स्वीकुरु पत्नीं प्रिय! वद पत्नीकाम ।
इतो मामवलोकय मे राम! ॥११६॥
कालिदासः — त्वं वाणीचतुराऽसि, त्वया मयि वाणीरसः प्रयुक्तः ।
राजसभायामद्य त्वयाऽहं निजमनसा पतिरुक्तः ॥
पत्नीमहं पूर्वतो मन्ये स्वीकुर्वे च त्वाम् ।
प्रिये! त्वं चलगृहमनुसर माम् ॥११७॥
अहं पतिस्ते त्वं मे पत्नी कामोऽहं च त्वं रतिः ।
शकुन्तला त्वमहं दुष्यन्तो मार्गोऽहं च त्वं गतिः ॥
मम जीवनसहचरी त्वमसि ते स्वीकरोमि रतिधाम ।
प्रिये! त्वं चल गृहमनुसर माम् ॥११८॥

अहं याज्ञवल्क्यस्त्वं गार्गी,रामोऽहं त्वं सीता ।
प्रश्नशिवोऽहं सती परीक्षा त्वं कथमभूर्विभीता?
पार्वतीह भूत्वाऽऽगच्छेस्त्वं, कथं न मंस्ये त्वाम्?
प्रिये! त्वं चल गृहमनुसर माम् ॥११९॥
एहि देवि! स्वागतं त्वदीयं परस्परं मनसाऽऽश्रय ।
विकसय जीवनसुमं तस्य तद्दलमेकैकं विगणय ॥
सह वत्स्यावस्त्यज ग्रहचालं, प्रसन्नासि, वद माम् ।
प्रिये! त्वं चल गृहमनुसर माम् ॥१२०॥
विद्योत्तमा—अद्यप्रसन्नाऽहं प्रतिज्ञया प्राप्तो बुधपतिर्मया ।
रूपकवित्वज्ञानविज्ञानैः प्रसीदिताऽस्म्यहं त्वया ॥
धर्मं चरितुं गेहं यावः पतिपत्न्यावावाम् ।
इतो मे राम! विलोकय माम् ॥१२१॥
विक्रमादित्यः—कविवर कालिदास! कुर्वीथाः पत्न्या पाणिग्रहणम् ।
परिवारे योगं कुरु पत्न्या सह कुरु जीवन—भ्रमणम् ॥
पतिपत्नीविवाद इह लभतां तव सुखकारणताम् ।
वयं सत्यं कथयामस्त्वाम् ॥१२२॥
राजसुते! त्वं जिता, मन्यते पत्नीं त्वामयं कविः ।
पश्य,वारिदान्मुक्त आभया सार्धं शोभते रविः ।
तव शोभा भवितेमं लब्ध्वा त्वस्य चलब्ध्वा त्वाम् ।
अतस्त्वं गच्छेः कविवरधाम ॥१२३॥
कविः—ततः कालिदासस्तां नीत्वा गतो राजकविभवनम् ।
तया प्रेरितो ह्य ास ससुखं कुर्वन् काव्यमनुदिनम् ॥
पतिपत्नीचर्चेय"मितो मामवलोकय मे राम!
प्रिये! त्वं गच्छेः काशीधाम" ॥१२४॥

तौ दम्पती ततो लोके नामतः कार्यतस्तथा ।
प्राप्य ख्यातिं प्रियतां च जनजिह्वासनस्थितौ ॥१२५॥

राजा विक्रमस्तु घोषितवान्,
गृहप्रवेशसमये गृहवन्तः !
राजकवेः पत्नीसहितस्य,
सम्मानं कुर्वन्तु भवन्तः ॥१२६॥

सम्भ्रान्ता नागरिका लोकाः,
मन्त्रिणश्च सचिवा गृहपतयः ।
मुख्या गृहमुख्या बलमुख्याः,
बभूवुरेकत्रिताः सुमतयः ॥१२७॥

समे सपत्नीकाः सम्मिलिता-
स्ततो राजकविगृहमायाताः ।
वैदिकमन्त्रगुञ्जिते काले,
सर्वे वरयात्रिण इव भाताः ॥१२८॥

राजपुरोहितेन नववध्वा,
इव विद्योत्तमया सह तस्य ।
सदनप्रवेशो महिलागीतैः
सह कारितः कालिदासस्य ॥१२९॥

दक्षिणां प्राप्य दत्ताऽऽशीः कवे! त्वं पुत्रवान् भव ।
विद्योत्तमा च संयुक्ता त्वया स्यात्कुलवर्धिनी ॥१३०॥

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
गद्यपद्यग्रन्थादिरचयिता नाटककारो धीमान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीये षोडशसर्गं कृतवान् ॥१३१॥

विद्योत्तमाकालिदासायम् ।

सप्तदशः सर्गः (प्रेमचर्चा)

कविरहं भवेस्त्वं कवयित्री ।

श्रृणु सुभगे विद्ये! मे वचनं कविरहं भवेस्त्वं कवयित्री ।
कवयिता यथाऽहं तथाभवेस्त्वं पत्युः कवित्वजनयित्री ।।
कविरहं भवेस्त्वं कवयित्री ।।१।।
अहमस्मि लिखन् कवितापंक्तीस्त्वंभव मात्राणां गणयित्री ।
न स्खलितं स्यादित्याशासे छन्दोध्वनिलयस्य कथयित्री ।।
सहचरी त्वमसि यदहं कुर्वे त्वं भव सर्वेषां स्पृहयित्री ।
समये समये सहचरकार्ये त्वं भव सर्वथा मन्त्रयित्री ।।
कविरहं भवेस्त्वं कवयित्री ।।२।।
निजवंशवृद्धये श्रृणु सुभगे! त्वं भव सर्वथा कामयित्री ।
निर्माताऽहं शुक्राणूनां त्वं रजःकणानां जनयित्री ।।
रचयिता यथाऽहं काव्यानां त्वं भवेःशिशूनां रचयित्री ।।
शैशवकलरवकेलिभिरनिशं भव भवने प्रहर्षजनयित्री।
कविरहं भवेस्त्वं कवयित्री ।।३।।
मम प्रिये! सुसज्जिकक्षेऽस्मिन् भव स्वकामशास्त्रपाठयित्री ।
कान्ते!, शय्येयमावयोरिह भव पत्युर्भारधारयित्री ।
यदहं वदामि, निजमनसि तथा त्वं भव मम भावचित्रयित्री।
अनुकूलाचरणं कुर्वाणा सुभगे! भवमनोभावयित्री ।
कविरहं भवेस्त्वं कवयित्री ।।४।।

ब्रूहि प्रियतम! मन्दमन्दम्।

आवयोरिह प्रेमवार्तां कोऽपि प्रच्छन्नो न श्रूयात्।
त्वयोक्तोऽयं प्रेममार्गः सदा नौ सुखदो हि भूयात्।
कामप्रेमिन् सुखद! मन्ये त्वां मनोहरकलाकन्दम्।
ब्रूहि प्रियतम! मन्दमन्दम् ॥१॥
आवयोः सङ्गमनिशेयं द्वयोरेकत्वं करोति।
चन्द्रिकालोकिता या नौ द्वयोरानन्दं तनोति।
कामक्रीडक रसिक! मन्ये त्वां कामकेलिमकरन्दम्।
ब्रूहि प्रियतम! मन्दमन्दम् ॥२॥
कामशास्त्रनियमानधुनापि राजकवे! किं नो जानासि ?
परिहासं कुरु मे न प्रियतमे! राजपुत्रि! वद किंकामाऽसि?
दीपाग्निर्वापय हि त्वामहं जानेऽधुनाम न्मथानन्दम्।
प्रिये! ब्रूहि त्वं मन्दं मन्दम् ॥३॥
दीपा निर्वापिताः प्रियतमे! कथय राजपुत्रि! त्वं क्वासि ?
किञ्चिदितस्त्वागच्छ प्रियकवे! गृहाण शब्दान् पुनःक्वयासि?
छन्दस्तुल्यं मां न बन्धय, कुरु मां प्रिये! सदा स्वच्छन्दम्।
किन्न वदसि प्रिय! मन्दं मन्दम् ॥४॥
द्वयोरद्यतनप्रेमफलात्प्रिय! काशीनृपः सुतस्ते भविता।
तथा स सततं स्वराज्यमविता यथा विश्वपालकोऽस्ति सविता।
प्रिये! स्वकीयं सुतमवगच्छेरस्मत्कामकेलिजानन्दम्।
किन्न वदसि प्रिय! मन्दं मन्दम् ॥५॥
अद्यतनदिवसं सदाऽहं जीवने संस्मरिष्यामि।
स्वसङ्गात्प्रिय! कदाचित्त्वां विरहितं नो करिष्यामि।
त्वदीयं सङ्गमं जाने मदीयं रतिकलाचन्दम्।
ब्रूहि प्रियतम! मन्दमन्दम् ॥६॥

३–एहि, चल प्रिये ! क्षिप्रातीरम्।

उज्जयिनीश्वरलोकपालको यत्र महाकालेश्वरदेवः ।
प्रजापूजितो निवसति भगवान्नरेशविक्रमकरकृतसेवः ॥
कृत्वा तद्दर्शनं प्राप्नुहि स्वास्थ्यवर्धकं शीतसमीरम् ।
एहि, चल प्रिये ! क्षिप्रातीरम् ॥१॥

लब्ध्वा शिवदर्शनं याचते कोऽपि जनः स्वंसुतं शङ्करम् ।
परः समृद्धिं विद्यामपरः कोऽपि भिक्षते वैभवं वरम् ।
भ्रमणे निरता जना लभन्ते समाकर्षकं स्वस्थशरीरम् ।
एहि, चल प्रिये ! क्षिप्रातीरम् ॥२॥

किन्तव कर्णयोर्न निपतति भोः ! शङ्करपूजनघण्टानादः ?
गत्वा देवि ! त्वया श्रोतव्यः शिवविषयकस्तुतौ ध्वनिवादः
जनाः शिवादिष्टं याचन्ते गत्वा त्वमपि याच सुतहीरम् ।
एहि, चल प्रिये ! क्षिप्रातीरम् ॥३॥

काश्यामस्ति विश्वनाथोऽयं काष्ठमण्डपे पशुपतिनाथः ।
सौराष्ट्रेऽस्ति सोमनाथोऽयं मयराष्ट्रे विल्वेश्वरनाथः ॥
मन्दिरगतावाचमिष्यावः शिवपूजितं पवित्रं नीरम् ।
एहि, चल प्रिये ! क्षिप्रातीरम् ॥४॥

घण्टाध्वनिं निशम्य डयन्ते राजसुते ! गगने विहङ्गमाः ।
आर्तिं कुर्वत्यः श्रूयन्ते भक्तैः पतिभिः सङ्गता रमाः ॥
शिवपूजार्थमागतं पश्यसि खमुत्पतन्तं भवतं कीरम् ?
एहि, चल प्रिये ! क्षिप्रातीरम् ॥५॥
जय जय महाकाल ! इति घोषैर्मन्दिरपूजकवर्यैर्युक्तम् ।
नागरसेवकैश्च शिवभक्तैः सह शिवताण्डवपाठासक्तम् ।
द्रक्ष्यावः शङ्करमर्चन्तम् उज्जयिनीश्वरविक्रमवीरम् ।
एहि, चल प्रिये ! क्षिप्रातीरम् ॥६॥

४–निशीथेऽपि निद्रा नाऽऽयाति ।

पार्श्वमेहि मे सुन्दरि प्रिये ! मम जीवनं त्वां विना व्यर्थम् ।
लोकेऽस्मिन् व्यवहर्तुं कान्ते ! त्वद्दते जाने स्वं न समर्थम् ॥
मम देहं प्रत्यङ्गमाप्नुहि, एहि त्वामहं शरणं यामि ।
अद्य निशीथेऽपि न निद्रामि ॥१॥

अर्धरात्रमपि विगतं प्रियतम ! भवान्नाधुनापि च निद्राति ।
प्रजागरः कस्मिन्नपि विषयें किं कामपि कवितां निर्माति ?
तच्छ्रावय ताः पंक्तीर्याभ्यो भवान् काव्यजीवनं ददाति ।
निशीथेऽपि निद्रा नाऽऽयाति ॥२॥

एका परमसुन्दरी रमणी या मे काव्यप्रेरिका भाति ।
परं न जाने प्रिये ! त्वद्य सा मह्यं सहयोगन्न ददाति ॥
सा का स्मरसि यां प्रिय! वद मां, पार्श्वमेहि मे तव स्मरामि।
अद्य निशीथेऽपि न निद्रामि ॥३॥

प्रियवर ! शये पश्य निद्रा माम्प्रबाधतेऽस्मिन् वसन्तकाले ।
शीतलमन्दसमीरणोऽपि किन्त्वाम्प्रेरयति न मां प्रत्याले !
मामन्तरेण का प्रिय ! सम्प्रति तव सर्वं कार्यं विदधाति ?
निशीथेऽपि निद्रा नाऽऽयाति ॥४॥

चिन्तारहिता त्वं निद्रासि प्रजागरोऽहं निशां नयामि ।
यदि नागच्छसि शुभे! सकाशं कथय त्वां विना कुत्र व्रजामि ?
त्वमेव जीवनदात्री सुभगे ! त्वामन्तरेण नो जीवामि ।
अद्य निशीथेऽपि न निद्रामि ॥५॥

प्रिये ! त्वां विना मनो दूयते प्रपीडितोऽस्मि शिरोवेदनया ।
तत्तैलेन शिरो मर्दयितुं तव समीप आगम्यते मया ॥
प्रिय !तत्र पीडा शयनबाधिका या तुभ्यं श्रान्तिं न ददाति ।
निशीथेऽपि निद्रा नाऽऽयाति ॥६॥

५–विमनायसे कथं रतिपथगे !

न जाने किं कृतं काये कवे ! कवितां श्रावयित्वा ?
ममोदरगतमस्ति यत्तच्छान्तिमेति मुखात्पतित्वा ।
प्रिये ! जम्भीरं गृहाण प्रभुर्योऽस्त्युद्गलविरामे ।
कथं विमनायसे वामे ! ॥१॥

गृहीतो जम्भो मया प्रिय ! पुनरपि न मे वमनशान्तिः ।
अज़ीर्णं जठरे प्रभूतं भवति येनोदरक्रान्तिः ॥
वैद्यराजगृहं प्रयावः प्रिये ! सायं चरमयामे ।
कथं विमनायसे रामे ! ॥२॥

प्रिये ! वैद्यवरेण दत्ता त्वया पाचनवटी भुक्ता ?
बाढमधुनाऽप्यहं प्रियतम ! नास्मि मुखवमनाद्विमुक्ता ।
कासग्रस्ता वमसि तस्मात्कासगुलिकां चूष दान्ते !
कथं विमनायसे कान्ते ! ॥३॥

यत्किञ्चिद्भक्षयामि कविवर ! तत्सर्वं वमामि वनिताऽले !
अस्यामवस्थितौ निवसन्त्याः प्राणान्तो मे भविता काले ।
विज्ञायते त्वदीयो भ्रूणो गर्भाशये वर्धते सुभगे !
विमनायसे कथं रतिपथगे ! ॥४॥

शुष्कोऽयन्ते कासः कथयति—गर्भक्षवथुरयं कविकामे !
अस्मदीयकललः सम्पुष्टस्तावकरसै र्भवति रतिरामे !
येन भविष्यन्वमथुरयन्ते शान्ति यास्यति निजसमयान्ते ।
विमनायसे कथं त्वं दान्ते ! ॥५॥

यदीदृशीयं मामकस्थितिः, कष्टं दत्तं त्वया तत्सहे ।
अस्य फलं वत्रापतनात्मकं प्राप्स्यसि प्रिय प्रिये ! स्त्रशिशुमहे ।
हर्षय चित्तं स्वमनो योजय प्रणये भवितासि प्रसूः सुभगे !
विमनायसे कथं रतिपथगे ! ॥६॥

६–अद्य मे प्रिय ! किन्न रुचिदम् ?

मोदको रोचते नहि मे, न मे रोचन्ते ह्यपूपाः ।
तच्च तद्रुचिकरन्नो मे, यच्च यत्खादन्ति भूगाः ।
रुचिकरं मे पयो मधुरं पयस्यं दुग्धं च शुचिदम् ।
अद्य मे पायसं रुचिदम् ॥१॥

स्वदन्ते मे माषगर्भाः पूरिका वा लवणयुक्ताः ।
परं कर्णय त्वद्य प्रियतम ! अर्धरोटी मया भुक्ता ॥
कदाचिच्छर्करासिक्तं लवणजलपानं च रुचिदम् ।
अद्य लवणान्नं हि रुचिदम् ॥२॥

आपणाद् ह्यः कलाकन्दम् आनयस्त्वं यन्मदर्थम् ।
तन्न भुक्तं मया प्रियतम ! स्थापितं सर्वं त्वदर्थम् ।
मया लवणान्नं गृहीतं भक्षितं मनसा च रुचिदम् ।
अद्यमिष्टान्नं न रुचिदम् ॥३॥

अद्य पक्ष्ये द्विदलमधुना पोलिकाश्च हि विधास्यामि ।
अजाजीमरिचादियुक्तं लवणतक्रञ्च पास्यामि ॥
किन्न पेयं भ्रमणकाले प्रिये ! क्षिप्राजलं शुचिदम् ।
अद्य मे मधुपयो रुचिदम् ॥४॥

कथय किन्ते प्रिये ! रुचिदम् ? न ते रोचन्ते फलानि ?
कथं नो चूषसि तदाम्रम् ? कथय पुनरानये कानि ?
गच्छ हट्टं प्रिय ! मदर्थम् आनयेस्तत्फलं सुखदम् ।
अद्य जम्बूफलं रुचिदम् ॥५॥

वद प्रिये ! गर्भे शिशुस्ते किञ्च किं भक्षयितुमिच्छसि ?
दोहदेच्छा का त्वदीया किन्न प्रतिवचनं प्रयच्छसि ?
प्रिय ! स्थितिरन्या, न पूर्वा, वस्तु प्रत्येकं हि सुखदम् ।
अद्य मे प्रिय ! किन्न रुचिदम् ? ॥६॥

७-प्रिये ! विषमं कथं चलसि ?

न जानीषे गर्भभारं, येन विषमा गतिर्जाता ।
अष्टमो मासो व्यतति प्रिय ! येन गर्भस्थितिर्भाता ॥
स्वकाये कान्ते ! तथापि हि कुमारीलावण्यमलसि ।
प्रिये ! विषयं कथं चलसि ? ॥१॥

कुरु प्रसूतेः प्रबन्धं प्रिय ! कथय क्वहि प्रसवं करिष्ये ?
मातृगेहं मान्तु प्रेषय, ततस्तव चिन्तां हरिष्ये ॥
कथय कान्ते ! कुतो हृदये स्वकाशीजिगमिषां खलसि ?
प्रिये ! विषमं कथं चलसि ? ॥२॥

शिशुप्रसवकाले कुतस्त्वं करिष्यसि नारीप्रबन्धम् ?
दशपुरान्मातुस्सखीमानीय कुर्के मातृगन्धम् ॥
कथय कान्ते ! कुत्र कस्मिन् केतने कामनां ललसि ?
प्रिये ! विषमं कथं चलसि ? ॥३॥

कनखलादपि कामिनीमाहूय तव सेवां भजिस्ये ।
कुरुक्षेत्रान्मित्रपत्नीं प्रेष्य तव योगं करिष्ये ॥
ईहसे कां त्वमाह्वयितुं मनसि कां भाविनीमलसि ?
प्रिये ! विषयं कथं चलसि ? ॥४॥

नासि काशीतस्त्वमाह्वयितुं स्वमातरमलं कान्ते !
त्वमिच्छसि किं प्रसवसमये कथय का भावना स्वान्ते ?
गच्छ नो काशीं त्वमस्यामुज्जयिन्यामेव पलसि ।
प्रिये ! विषमं कथं चलसि ? ॥५॥

मम हृदये न कोऽपि प्रतिबन्धः प्रियो भवेत्समुचितः प्रबन्धः ।
शोभयन्तु ते क्रोडं बाला गलमलङ्करोतु प्रेममाला ॥
जनय स्वपुत्रं मम भवनेऽस्मिन्मामकीनदाम्पत्ये वलसि ।
प्रिये ! विषमं कथं चलसि ? ॥६॥

८–स्वप्ने मया तदात्मा दृष्टः ।

तस्यां प्रथमनिशायामेव यदा कृतं प्रिय ! गर्भाधानम् ।
तदा मया स्वात्मजकामनया कृतं च ते श्रद्धासुमदानम् ॥
शुण्डाकृतिर्लम्बकरयुक्तो जाने कोऽपि ममोदरविष्टः ।
स्वप्ने मया गणपतिर्दृष्टः ॥१॥
दृष्टं त्वया कीदृशं स्वप्नम् ? तात्कालिकी कृता किं कविता ?
अभिज्ञानशाकुन्तले प्रिये ! दुष्यन्तप्रेमाकृतिः कृता ॥
शकुन्तलामुखमुन्नमय्य स, चुम्बनपथेन तत्राविष्टः ।
स्वप्ने मया तदात्मा दृष्टः ॥२॥

येन मदवगुण्ठनं निरस्तं स एव मे स्वप्ने समागतः ।
शरीरेण मनसा सन्तुष्टस्तेन मदीयाऽऽत्मा प्रभावितः ॥
स मामकीनः कामदेव इह रतितुष्टः कृपया मयि वृष्टः ।
स्वप्ने मया तदात्मा दृष्टः ॥३॥

अपरस्मिन्दिवसे त्वया प्रिये ! ममाकर्षितं प्रेम्णा चित्तम् ।
तदा मया स्वकुमारसम्भवे तुभ्यं शङ्करलास्यं दत्तम् ॥
ताभ्यामालिङ्गनबद्धाभ्यां शिवाशिवाभ्यामहमाकृष्टः ।
स्वप्ने मया तदात्मा दृष्टः ॥४॥

राकान्तेऽहमेकदाऽपश्यम् शय्यायां प्रियतमं शयानम् ।
यो मह्यं दत्तवान् चिराय स्वचित्तकक्षे भार्यामानम् ॥
ममान्तरङ्गे स एव प्रियतम ! शिशुरूपः स्वात्मना प्रविष्टः ।
स्वप्ने मया तदात्मा दृष्टः ॥५॥

'आत्मा वै स जायते पुत्रः' इति मत्या पत्न्यां पतिर्विशति ।
स एव नवं शरीरं लब्ध्वा ततः सूनुरूपः समुद्भवति ॥
नारी मातृसमा द्रष्टव्या समदर्शिना सर्वं आदिष्टः ।
प्रिये ! त्वयि मया स्वात्मा दृष्टः ॥६॥

६–प्रसववेदनाप्रपीडितास्मि ।

कान्यकुब्जनगरं को गतवान् मम सखीं सुशीलामानेतुम् ?
हट्टं को गतः प्रसवहेतोर्व्यञ्जनानि दशमूलं क्रेतुम् ?
कथं भविष्यत्येतत्सर्वं प्रिय ! कथयाऽहं विचिन्तितास्मि ।
प्रसववेदना प्रपीडितास्मि ॥१॥

चिन्तां माकुरु प्रिये ! प्रयागाद् मातृस्वसा समायातास्ति ।
पत्नीमानेतुं मे मित्रं गत्वा मन्दसौरमनुशास्ति ॥
वाराणसीं न कोऽपि प्रेषितः ? मातुर्वचसा निश्चिन्तास्मि ।
प्रसववेदनाप्रपीडितास्मि ॥२॥

वैद्यराजभार्या सा कमला मया हस्तिनापुरतो हृता ।
अनुभविनी सा यया बालिका प्रभा नाम गतवर्षे सूता ॥
तामानेतुं तत्को गतवान् ? प्रिय ! वद प्रष्टुं त्वत्कथितास्मि ।
प्रसववेदनाप्रपीडितास्मि ॥३॥

द्रोणैकं घृतमानीतं शृणु मया नारिकेलास्ते क्रीताः ।
कुलवर्धनपुत्रप्रसवार्थं कुलदेवताः सन्ति मे प्रीताः ॥
अन्या त्वया प्रसवसामग्री किन्न गृहीता प्रिय! व्यथितास्मि ।
प्रसववेदनाप्रपीडितास्मि ॥४॥

मातुः स्वस्रा यद्यत्कथितं तत्तन्मया सर्वमानीतम् ।
सर्वा सामग्री ते क्रीता प्रिये ! गृहे स्यान्मङ्गलगीतम् ॥
प्रिय ! ते पुत्रकामना पूर्णा नवमासावधिसमयगतास्मि ।
प्रसववेदनाप्रपीडितास्मि ॥५॥

प्रिये ! प्रपश्य मित्रजाया मे मन्दसौरनगरादायाता ।
या ते प्रसवव्यवस्थां कर्तुं मातृस्वसुः प्रकक्षं याता ॥
प्रसूतिकक्षं प्रिय ! नय मामपि प्रसवकालसामीप्यगतास्मि ।
प्रसववेदना प्रपीडितास्मि ॥६॥

१०–शृणु कबि गृहे वाद्यते स्थाली।

सुतः कालिदासस्य प्रजातः कीदृशमद्य सुरम्यं प्रातः।
इतस्ततश्च खगा कूजन्तः सन्ति शोभिता नभसि पतन्तः।
जगन्नियन्ता प्रजापालकः उदेति प्राच्यांतु सोंऽशुमाली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।१।।

गच्छ, कविगृहं कृष्णविहारिन्! चतुरस्ततो मोदकानानय।
पुत्री भवितेत्यवदस्त्वमथो पुत्रवतीं तां विद्यां मानय।
निशि मूषान् खादितुमायाता गृहकक्षान्निर्याति विडाली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।२।।

सुतस्य जन्मोत्सवे क्रियन्ते लोकैरिह वितरिता मोदकाः।
जनयित्रोर्जनतायां लोके ये भवन्ति हर्षताबोधकाः।।
तुर्यवारमद्यास्ति प्रसन्ना कालिदासगृहदेवी काली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।३।।

कथमित्थं कालीप्रसन्नता कालिदासकार्याणि साधयति?
किन्तु तदीयः श्रमस्ते मनः श्यामविहारिन्नो प्रसादयति?
महाकार्यसिद्धये मन्यते देवः कोऽपि जगति बलशाली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।४।।

पत्नीनिर्वासितः स प्रथमं कालीकृपया ज्ञानमाप्तवान्।
पुनः कवित्वं ततो राजकविपदं प्राप्य सुतमासादितवान्।।
काल्या दासत्वेन कथ्यते स कालिदासो विशालभाली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।५।।

गच्छसि कथन्न ततश्श्रूयते मधुरभाषितं मङ्गलगानम्।
वाद्यादिषु तालीदानैः सह ललनाः कुर्वन्त्यागतमानम्।।
गत्वा गीतेन त्वं कथयेस्त्वमसि कवे! श्रृणु सुभाग्यशाली।
श्रृणु, कविगृहे वाद्यते स्थाली ।।६।।

११—सुतजन्माऽभूत्सखि ! कविगेहे।

रम्भे ! कुतः समायासि त्वं क्वासीर्गता त्वं कथय कमले !
आवां द्वावपि गतावास्व शिशुजननार्थं शृणु री विमले !
मातापितरावेकीभूय प्रविशत आत्मना स्वशिशुदेहे।
सुतजन्माऽभूत्सखि ! कविगेहे ॥१॥

कीदृशोऽस्ति विद्योतमासुतो योऽग्रे काशीनृपो भविष्यति।
तत्किमसा सखि ! राजकुमारी सुतं गृहीत्वा तत्र गमिष्यति ?
पुत्रो नास्ति काशिराजस्य दौहित्रोऽयं तस्य रमे हे !
सुतजन्माऽभूत्सखि ! कविगेहे ॥२॥

कवेः कालिदासस्य सुतोऽयम् आकृत्या कविमुखमनुहरति।
ललाटेन चाञ्चल्यबलादिह विद्योत्तमास्थानमनुसरति ॥
महतोरंशजातशिशुरग्रे महानेव भवति हि कमले हे !
सुतजन्माऽभूत्सखि ! कविगेहे ॥३॥

उज्जयिनीनृपसभासङ्गतिं त्यक्त्वा काशीं कविर्न गन्ता।
क्षिप्रातटे काव्यरमणानां तस्मादन्यः को मदहन्ता ?
राजकविर्भूत्वा स कदाचित्काशीं स्मरति न शृणु विमले हे !
सुतजन्माऽभूत्सखि ! कविगेहे ॥४॥

दैवज्ञेन शिशुकरो दृष्टो यत्र शङ्खचक्रादिदर्शनम्।
अस्मिल्लोके करोति जनता सदा यस्य पादयोरर्चनम् ॥
तादृशः स विद्योत्तमाशिशुः सुन्दरमुखोऽस्ति शृणु रम्भे हे !
सुतजन्माऽभूत्सखि ! कविगेहे ॥५॥

यस्य पाणिपादं रक्ताभं नूतनरम्यकमलमिव भाति।
चक्षुर्द्वयं यस्य सुविशालं विभिन्ननीलोत्पलतां याति ॥
मनोहरं सुन्दरं तं शिशुं गत्वा तत्र पश्य विमले हे !
सुतजन्माऽभूत्सखि ! कविगेहे ॥६॥

१२–वर्धापनम् !

पुत्ररत्नमासादितं त्वया विद्योत्तमाप्रशंसापात्रम् ।
विद्यातनूजस्य तव सूनोरिदं दर्शनीयं शिशुगात्रम् ।।
मालवराजोऽहं प्रणमामि प्रणतिं मे स्वीकुरु शिशुविभुवर !
वर्धापनमङ्गीकुरु कविवर ।।१।।

काशिराजदारिके ! राजकविकालिदासप्राणेश्वरि ! विदुषि !
पतिपत्न्योरेकत्वदर्शिका वैदान्तिकतत्त्वज्ञा त्वमसि ।
मालवमहिषी राजजनन्या सहाऽऽशीर्वदति सुताय वन्द्ये !
वर्धापनमुररीकुरु विद्ये !।।२।।

पत्नीयोगं लब्ध्वा कविवर ! कृता त्वया परिवारे वृद्धिः ।
द्वैतयोगफलदर्शनविधिना त्वया साधिता सूनुसमृद्धिः ।।
मालवसेनापतेः प्रणामानूरीकुरु कविसुतवर श्रीमन् !
वर्धापनमङ्गीकुरु धीमन् ! ।।३।।

हे शिशुवर ! काशिराजपुत्रीतनयोऽसि राजकविपुत्रोऽसि ।
सम्भवसि काशिराजोऽपि त्वं, त्वं काशिराजदौहित्रोऽसि ।।
प्रणमति मालवमहामात्यस्तन्नमनं स्वीकुरु शिशुराज !
वर्धापनमधिकुरु कविराज ! ।।४।।

इत्थं नागरिकाः सभ्या वर्धापनं समाचरन् ।
येन मातापितरौ तौ सर्वैः सह ननन्दतुः ।।६९।।

भारत उत्तरप्रदेश एटाजनपद - सोरोंवासी,
प्रेमचर्चया कालिदासगृहपुत्रजन्म विरचितवान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयसप्तदशसर्गं कृतवान् ।।७०।।

—०—

अस्मिन् सप्तदशे सर्गे ७० पद्यानि सन्ति ।

Sanskrit Sansthan ... 14596

विद्योत्तमाकालिदासायम् ।

अष्टादशः सर्गः (वात्सल्यम्)

१—नाम धरिष्ये ।

कथयति कोऽपि सुतन्ते तपनं राजेशं वा गिरिजेशं वा ।
परो नूतनं निगदति बालं कमलेशं वा मिथिलेशं वा ।
एषु नामधेयेषु कीदृशं नाम स्वीकरिष्यसि रतिकामे !
किं शिशुनाम धरिष्यसि वामे ! ॥१॥

तव शिशुजन्मोत्सवे यास्तु मे सख्यः काशीतो ह्यागच्छन् ।
ताः सर्वाः सुतमुखमवेक्ष्य मे सुन्दराणि नामानि त्वयच्छन् ।
कमला कथयति सुतं त्वदीयं तस्य नूतनं नाम करिष्ये ।
अहं प्रवीणं नाम धरिष्ये ॥२॥

अन्यो वदति सुतन्ते तरुणं तरुणेशं वा तपनेशं वा ।
गदतीतरस्त्वदीयं पुत्रं करुणेशं वा कमलेशं वा ।
नामधेयमभिलपसि कीदृशं वद मां वाणीमञ्जुमराले !
किं शिशुनाम धृतं नृपबाले ! ॥३॥

विमला वदति सुतं विमलेशं काशिराजदौहित्रवरेशम् ।
शीला निगदति तं शीलेशं कालिदासकविसुतममरेशम् ।
तव शिशुनामधरणकृतचिन्तां धृत्वा सुन्दरनाम हरिष्ये ।
अहं सुधीरं नाम धरिष्ये ॥४॥

केऽप्याहुर्विपिनं तवात्मजं वाणीशं वा वागीशं वा ।
गणा गदन्ति गणेशं सूनुं जगदीशं वा शरदीशं वा ।
नाम कीदृशं स्वीकुरोषि भोः सुभगे युवतीनामभिरामे !
किं शिशुनाम धरिष्यसि वामे ! ॥५॥

उज्जयिनीश्वरविक्रमराज्ञी कथयति कवितनूजमादित्यम् ।
कविगेहे ऽभूदन्तरेण यं शिशुक्रीडाप्रकाशराहित्यम् ।
जनविज्ञापितनामसु प्रियतम ! सुन्दरमेकं नाम वरिष्ये ।
अहं प्रकाशं नाम धरिष्ये ॥६॥

ब्रुवते परे सुरेशं वत्सं प्रिये ! नरेशं लोकेशं वा ।
निगदन्तीतरजना मुनीशं भुवनेशं वा देवेशं वा ।
केन नाम्ना सम्बोधयितुं ममात्मजं यतसे कविकामे !
किं शिशुनाम धरिष्यसि वामे ! ॥७॥

मालवमहामात्यजाया ते पुत्रं निगदति विद्यादत्तम् ।
कविं कालिदासं निजपितरं यः करोति कवयितुं प्रमत्तम् ।
मह्यमदीयत येन सुतोऽयं तं रत्या मनसा च भजिष्ये ।
कालीदत्तं नाम धरिष्ये ॥८॥

मालवराजाधिराज उज्जयिनीश्वरवीरविक्रमादित्यः,
तव पुत्रं परमेशं कथयति, यत्र वसति परमात्मा नित्यः ।
किं तन्नाम रोचते तुभ्यं ? वद मे वाणीकवितापथगे !
किं शिशुनाम धरिष्यसि सुभगे ॥९॥

सखी सुशीला वदति प्रदीपं कुलदीपं वा नाम सुतन्ते ।
कवयो राजसभाया ये ते विद्याधरं शिशुं कथयन्ते ॥
मात्रा पत्रे लिखितमहं ते सुतं काशिनाथं कथयिष्ये ।
अहं दीपकं नाम धरिष्ये ॥१०॥

यस्य जन्मने नित्यमकरवं त्वयि निजमात्मानं ह्यनुरक्तम् ।
मालवस्य प्रधानमन्त्री तं वदति ते सुतं विद्यादत्तम् ॥
कीदृशमस्ति नाम तत्कथित ? वद मे विद्ये काव्यरसाले ।
किं शिशुनाम धृत रतिमाले ! ॥११॥

त्वं काशीं गन्तासि न प्रियतम ! पुत्रोऽयं ते तत्र गमिष्यति ।
भूत्वा दत्तकपुत्रो मे पितुरग्रे काशीनृपो भविष्यति ॥
अतोऽद्यतनदिवसादिमं निजं सुतं काशिराजं कथयिष्ये ।
अहं नरेशं नाम धरिष्ये ॥१२॥

— ० —

२—वद मां प्रिय सुत ! विद्यादत्त ?

प्रिये ! दुग्धपायिनं स्वतनयं गोपयोऽपि पाययसि किमल्पम् ।
त्रैमासिकशिशवे तु प्रदेयं किञ्चिदन्यदाहारविकल्पम् ।
किं किं खादसि दुग्धादन्यत्पिबसि न जननीपयसा मत्त !
वद मां प्रिय सुत ! विद्यादत्त ! ॥१॥

कथं न दुग्धं पिबसि ? ज्वरस्ते ? तत्कथमाम्रफलं चूषसि रे ? ।
मुखं मलिनयसि वस्त्रं चापि रसं शरीरे विलेपयसि रे ! ॥
भूमौ पतितं चाम्रफलं ते नोत्थापय तदधुना प्रमत्त ! ।
त्वं किं करोषि कालीदत्त ! ॥२॥

मालवराजविक्रमादित्यो वत्स ! विभुसमं त्वां सत्कृतवान् ।
मालवप्रधानमन्त्री प्रियवर ! काशिराजमिव त्वामिह मतवान् ।
उज्जयिनीं किं विहाय काशीं गन्तासि कदा वद शिवभक्त !
वद मां प्रियसुत ! विद्यादत्त ! ॥३॥

करपट्टिका न तुभ्यं स्वदते न माषगर्भा अपि रोचन्ते ।
स्वास्थ्यवर्धकं बालप्रियन्ते प्रियं पायसं दुग्धं किन्ते ? ॥
आलुकशाकं त्यजसि कथं रे शष्कुल्या भक्षणानुरक्त ! ।
वद मां प्रियसुत ! विद्यादत्त ! ॥४॥

३—मम प्रिय बालक ! पिब मे दुग्धम् ।

कथं रोदिषि त्वं मे वत्स! कथय बुभुक्षा त्वां प्रबाधते ?
शब्दय निजमातरं, या हि ते कालेशाद्रक्षणं याचते ।।
मदङ्कमागच्छ त्वं पुत्रक! पित्रङ्के न सुखन्ते लब्धम्?
मम प्रिय बालक! पिब मे दुग्धम् ।।१।।

मातामही त्वदीया पुत्रक! स्मरति त्वां किं तत्र यास्यसि?
काशिराजमातामहहस्तात्स्वर्णशरावे पयः पास्यसि ?
किं पश्यसि पितरं प्रति वत्सक! मामकवचो निशम्य स्तब्धम् ।
मम प्रिय बालक! पिब मे दुग्धम् ।।२।।

काशिराजदौहित्रोऽसि त्वं विद्योत्तमासुतोऽसि प्रियोऽसि ।
क्रोडमेहि मे हृष्ट यावो विद्यासुत ! मयि मातृजयोऽसि ।।
कालिदासवंशज ! किं पश्यसि निजजनकं मम विजये क्षुब्धम् ।
मम प्रिय बालक ! पिब मे दुग्धम् ।।३।।

चुम्बसि कथं प्रिये ! त्वं बालम् अस्वच्छस्तावकनिश्वासः ।
अस्याननं प्रविश्य कारष्यति रोगमित्ययं मे विश्वासः ।।
प्रेम्णा बालचुम्बने प्रियतम! कथय किन्त्वया सुखन्न लब्धम्।
मम प्रिय बालक ! पिब मे दुग्धम् ।।४।।

निषेधसि प्रथमं पुनः कथं चुम्बन्नसि प्रिय ! बालं कथय ।
पश्य प्रिये ! मस्तकमस्याहं चुम्बन्नस्मि, गिरा नो मारय ।।
पित्रङ्कं नो गच्छ वत्स ! मे वचसा कुरु मे सुखमारब्धम् ।
मम प्रिय बालक ! पिब मे दुग्धम् ।।५।।

वद मे प्रिय ! किं बालकवदनं न चुम्बनीयं शिरस्तदर्हम् ।
आमेवं क्रियतां पितृभ्यां प्रिये ! भवेत्तच्छुभमिव वर्हम् ।।
महानसं गच्छामि गच्छ त्वं पित्रङ्कं कुरु त विस्रब्धम् ।
मम प्रिय बालक ! पिब मे दुग्धम् ।।६।।

४– अद्य मातुः स्मृतिर्भवति।

त्वदीयं पुत्रं गृहीत्वा तत्र काशीं गमिष्यामि ।
बहुदिनानन्तरं जननीदर्शनं प्रिय ! करिष्यामि ।
जनककृतमाशीःप्रवचनं स्वकीयं सन्तानमवति ।
अद्य मातुः स्मृति र्भवति ॥१॥
पत्रमधुना त्वया प्रहितं तत्र किं किं प्रिये ! लिखितम् ?
पार्श्वमागतया प्रिये ! मे वर्षमेकं त्वया गमितम् ।
पतिप्रीतिः सर्वसुखदा प्रियामधुना त्वां हि भजति ।
पुनर्मातुः स्मृतिर्भवति ? ॥२॥
मातृपत्रोत्तरे लिखितं मया—वयमागमिष्यामः ।
अहं तव दौहित्रबालस्तत्पिता सह भविष्यामः ।
किं भवानधुना वदतु मां प्रियावचनं नानुसरति ?
अद्य मातुः स्मृतिर्भवति ॥३॥
काशिराजसुते ! अहं ते प्रेमवचनं सदा रंस्ये ।
त्वमसि विद्योत्तमे ! विद्या, तद्वचस्तु कथं न मंस्ये ?
मां प्रिये ! भवती स्वकीये प्रेमकारागृहे क्षिपति ।
पुनर्मातुः स्मृतिर्भवति ? ॥४॥
यदा यास्यामो वयं प्रिय ! बालदायं प्राप्स्यामः ।
या भवेदुपहारलब्धिस्तां कदापि न हास्यामः ।
पश्य, प्रिय ! ते तत्र गत्वा कीदृशो मानो विभवति ?
अद्य मातुः स्मृतिर्भवति ॥५॥
उज्जयिन्यामिह भवत्याः कविपते धनन्यूनता किम् ?
स्वीकरिष्यसि बालदायं निर्धनो वद शिशुपिता किम् ?
परश्वः कविगोष्ठिकायां मया सह भवती न चलति ?
पुनर्मातुः स्मृतिर्भवति ? ॥६॥

निर्धनः किं बालदायं सुदायं वा स्वीकरोति ?
धनी तद्धनमपि गृहीत्वा श्वशुरमायां नो तनोति ?
धनैः परितः परिगृहीतै र्धनी निजवैभवं धरति ।
अद्य मातुः स्मृतिर्भवति ।।७।।

अस्तु प्रिये ! त्वत्तः पराजितम् अनुभवामि स्वात्मानम् ।
याव'च्छशुरस्माकं बालस्तावत्त्यज प्रस्थानम् ।
महाकालदर्शनाय यावश्चल यः समस्तमवति ।
पुनर्मातुः स्मृतिर्भवति ? ।।८।।

मौनमग्रही यंत्र गुरुकुले तन्न त्वां स्मारयति ?
काशीविश्वनाथदर्शनमपि किं न त्वामाह्वयति ?
वदतु भवानथ गङ्गास्नानं त्वपि तत्किं विस्मरति ?
मम तु मातुः स्मृतिर्भवति ।।९।।

क्षिप्रातटे त्वावयोर्भ्रमणं नाकर्षति तव चित्तम् ?
नाधुना त्वां लाभयति किं तन्मदीयं प्रेमवित्तम् ?
मया सार्धं किं प्रिये ते नोज्जयिन्यां मनो लगति ?
अतो मातुः स्मृतिर्भवति ।।१०।।

यत्र भुवि यज्जन्म भवति कथ्यते सा जन्मभूमी ।
मनुष्यः किं ? निजां पशुरपि भुवं नो विस्मरति लूमी ।।
मातृभूमिः सा मदीया यत्र मे माता निवसति ।
अतो मातुः स्मृतिर्भवति ।।११।।
पश्य, शिशुरयन्ते ततस्तथा त्वां पश्यति निजजननीम् ।
इतो यथाऽहं प्रेम्णा प्रेक्षे पतिश्च ते निजपत्नीम् ।
द्वयोर्मध्ये स्थिता भवती गृहीतेव प्रिया विचलति ?
अतो मातुः स्मृतिर्भवति ।।१२।।

५– पुत्र ! त्वमपि भज शिवं शङ्करम् ।

कविः कालिदासः जनकस्ते शिवमुज्जयिनीश्वरं वन्दते ।
यस्य स्तुतिक्षिप्राधाराभिर्निर्मलभक्तिरसोऽत्र स्यन्दते ॥
भीषणरूपः कल्पान्ते यस्ताण्डवेन नृत्यति भयङ्करम् ।
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥१॥

तव पितुस्तमाराध्यं देवं हिमालयात्कन्यापर्यन्तम् ।
'जय हर महादेव' इति घोषैर्भक्ताः पूजयन्ति भगवन्तम् ॥
देवैरपि पूजितं तमीड्यं सतीपतिं गिरिजेशमीश्वरम् ।
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥२॥

क्वापि तमीशं मन्मथनाथं सोमेश्वरं क्वापि शिवभक्ताः,
भूतेश्वरं क्वापि रामेश्वरमखिलेश्वरमर्चन्त्यनुरक्ताः ।
तं पशुपतिं भूतपतिमीशं लङ्कापतिदेवं यशस्करम्,
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥३॥

अर्धचन्द्रगङ्गाजलधारासमलङ्कृतमस्तकमीशानम् ।
सर्वेषां भारतनिवासिनां भक्तानामादरसंस्थानम् ॥
सर्वसिद्धिदं श्रीलं श्रीदं श्रीशं सर्वप्रदं निधीश्वरम् ।
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥४॥

अगमोऽनादिरपारशक्तिमान् स शिवोऽनन्तो जगन्नियता ।
निराकार आकारं कृत्वा भक्तसमीपं वृषेण गन्ता ॥
तं कैलासपतिं भूतेशं वेदविहितपूजं तमीश्वरम् ।
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥५॥

रजोवृत्तिना स जगत्कर्ता सत्त्ववृत्तिना स विश्वभर्ता ।
तमोवृत्तिना प्रलयङ्कर्ता स ताण्डवेन सर्वसंहर्ता ॥
एतादृशं भवं सर्वेशं सर्वकरं तं भवानीश्वरम् ।
पुत्र ! त्वमपि भज शिवं शङ्करम् ॥६॥

६—यदि ते जनकस्त्वां क्रीडयति तत्त्वं क्रीड सहर्षं मनसा।

क्रीडेर्बालि ! तैः समं बालैर्ये ते सन्तु वयस्का बालाः।
सुशोभते मौक्तिकै र्मौक्तिको यैः सह निर्मीयन्ते मालाः॥
एते त्वत्तो वृद्धा बाला एभिः सार्धं धाव न तरसा।
यदि ते जननी त्वां खेलयति तत्त्वं खेल सहर्षं मनसा॥१॥

खेलेर्वत्स ! कन्दुकैरेभिः क्षिपेरिमानि शीघ्रमाकाशम्।
पश्य, कन्दुकं गच्छति गगनं पुनरायाति त्वदीयसकाशम्।
इदमुत्थाप्य भूतले पतितं शीघ्रं प्रक्षिप नभसि रंहसा।
यदि ते भ्राता त्वां क्रीडयति तत्त्वं क्रीड सहर्षं मनसा॥२॥

दीव्येरेमिर्न काष्ठदण्डैः शिरस्फोटमपि कर्तुमलं ये।
शृणु रे वत्स ! मदीयवचः प्रति कर्णौ निजौ करोषि न त्वये !
कस्यचिच्च तच्छिरसि न निपतेल्लगुडं कथं चक्रयसि तरसा ?
एभि र्माता त्वां देवयति तत्त्वं दीव्य सहर्षं मनसा॥३॥

किं रे ! क्रीडसि बाणैरेभिर्वत्स ! चिकीर्षसि चक्षुस्स्फोटम् ?
निक्षिप करादधः शरानिमान् चालय स्वमिमं सुकाष्ठघोटम्।
न मन्यसे किं शृणोषि न त्वं खे तान् चेक्षिप्यसे तेजसा।
एमिः पिता त्वां हि त्वेषयति तत्त्वं त्वेष सहर्षं मनसा॥४॥

लवित्रेण सह किं त्वं खेलसि ? स्वकरं किं भेदयितुमिच्छसि ?
नटखटोऽसि कर्णं ददासि नो क्षिपसि न तत्किं कुत्र गच्छसि ?
करे गृहाण पितुः काव्यानि पठ पाठय मां पुत्र ! चेतसा।
यदि ते जनकस्त्वां खेलयति तत्त्वं खेल सहर्षं मनसा॥५॥

इमानि त्वदीयक्रीडनकानि रे सुत ! नानाविधानि सन्ति।
महाकवेः प्रियपुत्रोऽसि त्वं कविता यस्य घनानि भवन्ति॥
गमय न समयं व्यर्थं खेलैरक्षराणि शिक्षस्व तेजसा।
यदि ते जनकस्त्वां क्रीडयति तत्त्वं क्रीड सहर्षं मनसा॥६॥

७-मातः ! कामपि गाथां श्रावय ।

मातरद्य ते कथं प्रसन्नं चेतो नास्ति कथय मां विज्ञे !
नैव वत्स ! तादृङ्नो चिन्तय, पुनस्त्वं कथं वदसि न सुज्ञे !
किञ्चित्स्मर्तुं मनो मे गतं वत्स ! निजां कामनां विकासय ।
मातः ! कामपि गाथां श्रावय ॥१॥

त्वं कस्यां हि पाठशालायां शिक्षितासि को गुरुस्त्वदीयः ?
मातामही त्वदीया सुत ! मे माता प्रथमो गुरुर्मदीयः ।
किं सर्वेषामपि हि मातरो गुरवो भवन्तीति विज्ञापय ।
मातः ! मान्तु गुरुकथां श्रावय ॥२॥

मम मातामहस्तु हे मातर्मया श्रूयते काशीराजः ।
तेन किं तनय ! पिता त्वदीयः संस्कृतमहाकविः कविराजः ॥
राजा तु पूज्यते निजदेशे जगति च विद्वानित्यवधारय ।
मातः ! कामपि गाथां श्रावय ॥३॥

मातामहीश्राविताां काञ्चित्कथामहो ! त्वं किन्न स्मरसि ?
त्वं संस्कृतविदुषी नानाविधविषयपाठिनी विद्या भवसि ।
कुर्वाणोऽस्मि भोजनं सम्प्रति पाययितुं मां त्वं जलमानय ।
मातः ! कामपि गाथां श्रावय ॥४॥

पुरा त्वया काशीप्रासादे शास्त्रार्थेन बुधाः पराजिताः ।
ते के के विद्वांसस्त्वासन् ? ये ते कर्मकरत्वमागताः ।
तेषां कञ्चन विषयं नीत्वा मुखादधस्तद्वमनं कारय ।
मातः ! कामपि गाथां श्रावय ॥५॥

वरं वत्स ! त्वां श्रावयाम्यहम् अद्यपरममुदिता भवाम्यहम् ।
त्वदीयमातामहीश्राविताामेकां काककथां स्मराम्यहम् ॥
निद्रा मान्तु बाधते सम्प्रति मच्छयनार्थं विस्तरमानय ।
मातः ! काकथामथ श्रावय ॥६॥

८–शृणु मत्कथां वत्स रे ! स्वपिहि।

आसीदेक एकदा काकः क्वापि येन लब्धश्चण एकः ।
तञ्च गृहीत्वा खं स उदपतत् एकस्मिन् स्थाणावुपाविशत् ॥
गर्ते गतं चणं दृष्ट्वा स स्थाणुं कथयति चणकं जहिहि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥१॥

गर्ताद् यदा न चणको लब्धस्तदा स आसीदधिकः क्षुब्धः ।
ततः स ग्रामतक्षकं गतवान् शङ्कं तं तूत्खनितुमुक्तवान् ।
नाहं तं खनितुं गच्छामि शृणु रे वायस ! इतस्त्वमिहि हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥२॥

ततो गतो राजानं काकः करबद्धस्तं वदति वराकः ।
राजन् ! ग्रामतक्षकं मारय गर्ताच्चिणकं मे निस्सारय ।
भूपः करटं कथयति काक ! किं भूतं तत्कथय न रुदिहि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥३॥

'खनति न शङ्कुं ग्रामतक्षकश्चणकं दत्ते मे न वृक्षकः ।
तदहं किं भक्षयानि भूप ! तर्जय त शिल्पिनं सुरूप !
नृप उवाच कार्ये लग्नोऽस्मि, गच्छ भद्र ! तं त्वमेव जहि हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥४॥

ततः स रञ्जन ! काको गतवान् गत्वा राज्ञीमित्थमुक्तवान् ।
राज्ञि ! त्वं राज्ञे कुपिता भव, चणकं प्रदाप्य मे प्राणानव ।
महिषी गदति, तात ! ते चिन्तां दूरीकरोमि, तथ्यं ब्रूहि हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥५॥

'राजा ग्रामतक्षकं हन्ति न, चणकार्थं वर्धकयो यन्ति न ।
स्थाणु र्मे चणकं नो दत्ते, किं क्षिपानि निजजठरे मत्ते ?'
ब्रूते राज्ञी-त्वं किं जल्पसि ? नो कुप्यामि गगनमुत्पत हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥६॥

ततः स एकं मूषमयासीत्तस्मिन् सोऽपि प्रसन्नो नासीत् ।
'मूषिक मित्र ! शृणु हि मे वचनं त्वं व्रज कर्तय राज्ञीवसनम् ।'
'नाहं कर्तयामि तच्चीरम्, इत उद्गच्छ स्वकार्यं कुरु हि ।'
शृणु मत्कथां वत्स रे ! स्वपिहि ॥७॥

गतः स पश्चादेकविडालं 'त्वां जानाम्यहमाखोः कालम् ।
'सखे ! तमाखुं भक्षय गत्वा यो न करोति कर्म मे श्रुत्वा ।'
'क्षुधा न मे सम्प्रति शये त्वहं वाचा नो बाधय मां जहिहि ।'
शृणु मत्कथां वत्स रे ! स्वपिहि ॥८॥

तदनन्तरं गतः स श्वानं तात ! रक्ष किञ्चिन्मे मानम् ।
'वद भो भद्र ! न स्यात्परिहार्यं तदहं करिष्यामि ते कार्यम् ।'
'मित्र ! गच्छ मे कार्यरोधनं तं दुष्टं मार्जारं जहि हि ।'
शृणु मत्कथां कर्म मे कुरु हि ॥९॥

मार्जारो मूषकान्न हन्ति राज्ञीपटान्न ते कृन्तन्ति ।
राज्ञी रुष्टा भवति न राजनि राजा क्षिपति न दण्डं तक्षनि ।
तक्षा तक्षति तरुं न तदहं चणकं कथं भक्षयै ! वद हि ।
शृणु मत्कथां कर्म मे ! कुरु हि ॥१०॥

श्रुत्वा काकमित्रवचनं श्वा तं मार्जारं हन्तुं याति ।
ओतुस्तं मूषं न जहाति मूषो राज्ञीपटमश्नाति ।
रुष्टाराज्ञी निगदति नृपतिं ग्राम तक्षके दण्डं कुरु हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥११॥

भीत्वा तक्षा तक्षति तं तरुमधुना पतति स शुष्को वृक्षः ।
ततः स चर्वति चणकं काको हृष्यति स श्वा वायसपक्षः ॥
मित्र ! भक्षितस्त्वया स्वचणकः सहर्षमधुना नभउत्पत हि ।
शृणु मत्कथां वत्स रे ! स्वपिहि ॥१२॥

९–प्रिय सुत ! जागृहि पश्य प्रभातम् ।

महाकालघण्टानादं शृणु किन्न पतति तव कर्णयोर्ध्वनिः ।
पङ्कजकह्लारादिसरोजैरलंकृतेयं फुल्लैरवनिः ।
शीतलमन्दसमीरणेन सर्मामिदमम्बरमरुणेन विभातम् ।
प्रिय सुत ! जागृहि पश्य प्रभातम् ॥१॥

कीरं पश्य यस्य सा चञ्चुर्वक्रा किंशुकसमा च रक्ता ।
पश्य मयूरे पिच्छचन्द्रकान् ये हि मनोहरवर्णविभक्ताः ॥
तव निष्कुटे कूजतां नानाविहगानान्तु वृन्दमायातम् ।
प्रिय सुत ! जागृहि पश्य प्रभातम् ॥ ॥

अयं त्वदीयः पिता कविवरो जागरितः पश्यति तवाननम् ।
प्राङ्गणमेतानां चटकानां किन्नो शृणोषि मधुरकूजनम् : ?
पश्य चन्द्रमस्ताचलं गतं दिवाकरं चोदयगिरिजातम् ।
प्रिय सुत ! जागृहि पश्य प्रभातम् ॥३॥

शिवमर्चितुं गतस्तव जनकः कविर्महाकालेशमन्दिरम् ।
पश्य प्रफुल्लैश्चम्पकपुष्पैः सुरभितमस्तीदं तवाजिरम् ।
इमं भक्षयन्तं गोधूमान् पश्य शावकं कपोतजातम् ।
प्रिय सुत ! जागृहि पश्य प्रभातम् ॥४॥

वत्सोत्तिष्ठ प्रयामि स्नातुं मया समं चल क्षिप्रातीरम् ।
यस्याः प्रवहन्त्याः सरिताया गङ्गाजलमिव पूतं नीरम् ॥
अहमपि चलामि जननि ! त्वयासह किमहो मातः !प्रावर्जातम् ?
प्रिय सुत ! जागृहि पश्य प्रभातम् ॥५॥

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान् ।
वात्सल्ये गीतानि प्रणीय च रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयेऽष्टादशसर्गं कृतवान् ॥७०॥

विद्योत्तमाकालिदासीयम् ।

एकोनविंशः सर्गः (गृहचर्चा)

१–प्रिये ! श्रूयतां मदीयगीतम् ।

द्विदलैः समंरोटिका मुक्ता तव सुतवरेण पयो न पीतम् ।
यदिच्छसि त्वं तन्नहि कुरुते चलत्ययं प्रिय ! त्वद्विपरीतम् ।
किन्न त्वमासीर्मेद्विपरीता ? भोः संस्मर सुभगे ! स्वातीतम् ।
प्रिये ! श्रूयतां मदीयगीतम् ।।१।।

विद्योत्तमानामिका विदुषी उज्जयिनीन्यायालयमेत्य ।
राजकविं तं काली-दासं पराजितवती कवित्वमेत्य ।।
कथं लज्जसे श्रोतुं सत्यं तव विषये यन्मया प्रणीतम् ।
प्रिये ! श्रूयतां मदीयगीतम् ।।२।।

काशिराजदुहिता सा युवती निष्कासितो यया नौ स्वपतिः ।
यो मौनी मूर्खश्च पुरासीत्परं मन्यते तया स सुमतिः ।।
सुभगे ! तन्निस्सारं तक्रं कथं मन्यसे घृतनवनीतम् ।
प्रिये ! श्रूयतां मदीयगीतम् ।।३।।

प्रतिज्ञया त्वं मंस्यसे पतिं यो हि भविष्यति वाणीविजयी ।
स्वीकरोषि तं कथं निजपतिं योऽस्ति कविगिरा ते पराजयी ।।
परं विस्मये स्वीकरोति सा विदुषी पराजितं परिणीतम् ।
प्रिये ! श्रूयतां मदीयगीतम् ।।४।।

गङ्गायां स्नात्वा पुरा यया कृतं विश्वनाथस्य दर्शनम् ।
सा सहर्षमधुना करोत्यहो ! सदा महाकालेश्वरार्चनम् ।।
कथं विस्मरसि विद्ये ! स्वीयं गङ्गातीरे भ्रमणमतीतम् ।
प्रिये ! श्रूयतां मदीयगीतम् ।।५।।

२– त्वं प्रिय ! मे सर्वं पतिदेव !

पराजयी विजयिनस्तु वचनं मन्येतेति विक्रमादेशः ।
तं न पालयिष्यसि किं काश्यामप्यभूदयं मे निर्देशः ।
किमधुनापिरुष्टोऽसि प्रियतम !त्वमसि पतिः पत्न्या कृतसेव।।
त्वं प्रिय !मे सर्वं पतिदेव ! ।।१।।

वद छलेन कपटेन किन्त्वया सार्धं मया न कृतो विवाहः ?
किं सत्यं न धार्यते विदुषा पुनः कथमयं वचःप्रवाहः ?
विदुषी पत्नी किन्न प्रिया ते कथय कवे ! भविता कवितेव ?
त्वं प्रिय ! मे सर्वं पतिदेव ! ।।२।।

प्राप्य पुत्ररत्नं पुनरधुना पुत्रीरत्नं त्वं लब्धासे ।
तथापि सन्तुष्टो भवितासि न, पुनरपि किं स्वान्तं दग्धासे ?
मया तु तुभ्यं निजसर्वस्वं दत्तं येन भासि सवितेव ।
त्वं प्रिय ! मे सर्वं पतिदेव ! ।।३।।

कदा प्रिये ! पुत्री सम्भवता ? भ्राता भगिनीं कदा हि लब्धा ?
अग्रिमपौषपूर्णिमादिवसात्कवे ! चतुर्थमास आरब्धा ।
रजस्वला मासिकधर्मेण नाभूर्मार्गशीर्षमासान्ते ?
त्वं मे प्रियासि पत्नी कान्ते ! ।।४।।

आश्विनमासशारदीतिथ्यां प्रियतम ! त्वया कृतः सहवासः ।
गङ्गास्नानार्थं कार्तिक्यामभूदावयोः काशीवासः ।
मया विस्मृतं तन्निशि घटितं त्वया श्रावितं यत्प्रियमन्ते ।
करवै प्रियं प्रिये ! वद किन्ते ? ।।५।।

यदि मे प्रियं चिकीर्षसि प्रियतम ! तत्त्व काशीघटनां विस्मर ।
अग्रे प्रिय ! सहवासनिरोधात्परिवारन्तु नियोजय कविवर!
इतस्तु चिन्तय वंशनिवृत्तिं काव्यप्रवृत्तिं कुरु कर्तेव ।
त्वं प्रिय ! मे सर्वं पतिदेव ! ।।६।।

३—शृणु धनमहिमा जगति ख्यातः ।

धनमन्तरेण कथयति जननी पुत्रो मे भूतोऽयमपुत्रः ।
भ्राता वदति सदा धनं विना दुःखदनाऽयं भ्राता कुत्र ?
त्यक्त्वोज्जयिनीं गत्वा काशीं राजा भव काशीजामातः !
शृणु, धनमहिमा जगति ख्यातः ॥१॥

धनमन्तरेण वक्ष्यति श्वश्रूर्धनहीनो जातो जामाता ।
परिवारोदरपूर्तिहेतवे येनोज्जयिनीपुरी विहाता ।
स्वस्थानं यस्त्यजति प्रियतमे ! विश्वस्मिन् सतुभवति न भातः
शृणु, धनमहिमा जगति ख्यातः ॥२॥

धनहीनो न शोभते लोको लोके सम्मानं स प्रयाति ।
यो वैभवेन धनसम्पत्त्या राजसमैश्वर्येण विभाति ।
भगिनी वदति निर्धनं सोदरमत्राऽऽगच्छेर्न प्रियभ्रातः !
शृणु, धनमहिमा लोके ख्यातः ॥३॥

श्वशुरालयवासी जामाता कुक्कुरसम उदरं पूरयति ।
श्वश्रूश्वसुरकठोरवचोभिः सह जायोक्तमपि स निशमयति ॥
पत्नीं वदति तत्र पतिमधनं निर्नाकस्त्वं कुत आयातः ?
शृणु, धनमहिमा भुवने ख्यातः ॥४॥

धनादृते निर्धनशवोऽपि प्रिय ! मृतघट्टे काष्ठानि न लभते ।
उद्योगी पुरुषः सदा प्रिये ! ऊषरवने कार्यमारभते ।
परं स गच्छति श्वशुरगृहं नो जनः स्वतन्त्रो भवतिविभातः ।
शृणु, धनमहिमा जगति ख्यातः ॥५॥

कविरहमस्मि प्रिये ! कविताधनमस्माकं गेहं पूरयति ।
मम काव्यानि वित्तमञ्जूषा भवतो मामित्थं प्रेरयति ॥
किं राज्येन कवेः कविप्रिये ! कविर्भवेत्कविताविख्यातः ।
शृणु, कविमहिमा जगति ख्यातः ॥६॥

४– स्वप्ने मया के शवो दृष्टः ।

क्षिप्रायामेकस्मिन् समये यदा महाकालेश्वरघट्टः ।
जलनिमज्जितोऽभूच्छृण्वन्नसि वचनं मे विद्यासुतभट्ट !
तदा घनघटाकृष्णनभस्तो देवेन्द्रः स मन्हेद्रो वृष्टः ।
स्वप्ने मया के शवो दृष्टः ॥१॥

तत्र के शवः प्रवहन्नेको गच्छति स्म जगदीशरक्षितः ।
जीवनदाता रामोऽरक्षत्तं स येन मत्स्यैर्न भक्षितः ॥
शीतलपवनप्रेरितः कान्ते ! तत्र प्रविष्टो जीवो दृष्टः ।
स्वप्ने मया के शवो दृष्टः ॥२॥

स स्पन्दितस्ततस्स उत्थितो महाकालेशमन्दरं गतवान् ।
गणशेन सह शिवः पार्वतीरमाशङ्करस्तं रक्षितवान् ॥
तदनन्तरम् अशोको भूत्वा स आदित्यप्रकाशाविष्टः ।
स्वप्ने मया के शवो दृष्टः॥३॥

कविराजेन्द्र ! पुनः किं दृष्टं त्वया मूलतः सर्व वाच्यम् ।
प्रिये ! वमामि मुखाद्यत्किञ्चित्त्वया तदखिलं जठरे पाच्यम् ।
नन्दकिशोरसमः स गजबलमेत्य च बलजिद्भूतो दिष्टः ।
स्वप्ने मया के शवो दृष्टः ॥४॥

घनश्यामत्वेन रामराजो भूतः स च लोकेश्वर इष्टः ।
ओम्प्रकाशज्ञानाभायुक्तो विद्याभूषणतया विशिष्टः ॥
इशक्तिहीनः शवसत्येन्द्रः शिवः स आसीद् भगवानिष्टः ।
स्वप्ने मया के शवो दृष्टः ॥५॥

शवदर्शनं शिवस्य दर्शनं यतः शिवः शवघट्टस्वामी ।
निष्प्राणः प्राणी भूतोऽस्ति शिवः कथ्यते भूतस्वामी ॥
अतः प्रिये ! भावी ते बालो भविता शिवो निजगणैरिष्टः ।
स्वप्ने मया के शवो दृष्टः ॥६॥

५–कविजीवनं किन्न जानासि ?

हट्टात्किमपि वस्तु नानयसि कर्मकरो व्यञ्जनाय याति ।
चित्रित इव स्वस्थाने विष्टः कवितां कुर्वन् भवान् विभाति ॥
वित्तव्यये लग्नो यदा धनी तदा कोऽपरस्तद्धनमविता ?
इत्थं कथं जीवनं भविता ? ॥१॥

कविताः कवेर्धनानि भवन्ति वद किमीहसे सुभगे ! मत्तः ?
तुभ्यं काव्यत्रयादनन्तरं सुताद्द्वितीयस्तनयो दत्तः ॥
प्राप्य कवेरनुरागं हृदये कथं ततोऽपि रिक्तहृदयासि ?
कविजीवनं किन्न जानासि ? ॥२॥

प्रथममहं ते बुधतामैच्छं कवितां चाथ वित्तितामीहे ।
काशीं गत्वा त्वां कविराजं राजपदासीनं हि समीहे ॥
परं भवानिह कवितां कुर्वन्मम नगरीं काशीं नहि चलिता ।
इत्थं कथं जीवनं भविता ? ॥३॥

मम हस्ते न राजयोगोऽस्ति पुत्रस्ते काशीं प्रयास्यति ।
स्वस्मिन् हस्ते स राजयोगाद्राजपदस्थः प्रजाः पास्यति ॥
राजमातृपदमवाप्तुमधुना समं सुतेन कदा गन्तासि ?
कविजीवनं त्वन्न जानासि ॥४॥

यस्मिन्नगरे पत्युर्वासो भवति तत्र निवसति तत्पत्नी ।
मातृगृहे निवासमिच्छन्ती त्वं कीदृशी भवसि पतिवत्नी ?
कविः प्रियां कवयित्रीं कांक्षति तन्न कथं कवितां निर्मासि ?
कविजीवनं किन्न जानासि ? ॥५॥

निरन्तरं प्रिय ! कवयसि कवितामित्थं कथं जीवनं चलिता ?
तव हृदये मे कापि न चिन्ता कस्त्वत्परः सहचरो भविता ?
गृहात्परेऽस्मिन् बाह्यजीवने पत्नीं प्रेमिकां निर्मानि ?
कविजीवनं त्वन्तु जानासि ॥६॥

कविताचक्रेणैति स मार्गं काव्यमेव तज्जीवनमवति ।
काव्यं करोति यदा स भद्रे ! तदा स लोके राजा भवति ॥
शास्ति स जनतां पश्यति लोकं तादृशकविराजं त्वं यासि ?
कविजीवनं किन्न जानासि ? ॥७॥

तस्य कल्पना प्रिया द्वितीया भार्यामिव यां स प्रीणयति ।
तज्जनितान् ग्रन्थान् सुतसदृशान् सदा प्रकाश्य सुरक्षां नयति ।
स्वेन समुत्पादितशिशुसदृशाः किं त्वं कविकृतरचनाः पासि ?
कविजीवनं त्वन्न जानासि ॥८॥

यदा रचयितुं गुनगुनायते तदा स सर्वमेव विस्मरति ।
क्षुधा तं न बाधते कदाचिन्न तस्य मज्जनसमयो भवति ॥
इत्थंगतये कृतिं कुर्वते पत्यै सहयोगं न ददासि ?
कविजीवनं किन्न जानासि ? ॥९॥

लौकिकवस्तु चिन्तयसि सुभगे ! लोकोत्तरं कविश्चिन्तयति ।
निवसन् जगत्प्रपञ्चैः सार्धं स्वं स काव्यसंसारं नयति ॥
आकारं तस्मै स ददाति त्वं कल्पना यस्य विदधासि ।
कविजीवनं त्वन्न जानासि ? ॥१०॥

यन्न करोति जनः शक्तोऽपि तत्स कविः काव्येन करोति ।
त्वन्तु कविं परिवारे तनुषे त्वां जगति स कवितया तनोति ॥
किं तथापि निजकर्मतुलायां मनसि तस्य कार्यं न दधासि ?
कविजीवनं किन्न जानासि ? ॥११॥

सर्वे कुर्वन्ति राजमानं राजाऽपि च कविवरमाद्रियते ।
मानो महतां धनमिति मन्ये मानहीनता लोके म्रियते ॥
'कविश्चक्रवर्ती' बुधकथनात्परं प्रिये ! त्वं किंकामासि ?
कविजीवनं किन्न जानासि ? ॥१२॥

राजकविपदाद्वेतनेन किं मुद्राणां लक्षाणि नो लभे।
धनेन किं राज्येन किं प्रिये ! त्वय्यथ कवितां कर्तुमारभे ?
काव्यप्रभावाद्धनानि लब्ध्वा किं त्वं प्रिये ! धनवती नासि ?
कविजीवनं किन्न जानासि ? ।।१३।।

६–अहो ! ऋजीषध्वनिः श्रूयते ।

अये ! कुतोध्वनिरयमायाति त्वया किन्न कर्णः प्रदीयते ?
किमयमृजोषाकृतघण्टाध्वनिरत्र येन देविका स्तूयते ?
परन्न ज्ञातम् अस्य स्थानं यतः प्रसारोऽस्य हि विधीयते ।
अहो ! ऋजीषध्वनिः ! श्रूयते ।।१।।

ऋचीषध्वनिना सखे ! सूच्यते कस्यापि गृहे दुहितुर्जननम् ।
कवेः कालिदासस्य सम्भवति ध्वनिनाऽनेन गुञ्जितं भवनम् ।
बाढं मित्र ! तस्य सा भार्या विद्या गर्भवती प्रतीयते ।
पिष्टपचनध्वनिरहो ! श्रूयते ।।२।।

बालेश्वर ! कुत आगच्छन्नसि ? महाकालमन्दिरादागमम् ।
कुतो भवति ध्वनिरयं भोः ! कथय यस्य श्रवणमृजीषरवसमम् ।।
कवेर्गृहे दुहितुर्जन्माऽभूदिति परितो वार्ता निशम्यते ।
ऋचीषध्वनिरयमस्य श्रूयते ।।३।।

तस्य शिवस्य कृपेयं सर्वा भगवान् योऽस्ति पार्वतीनाथः ।
अत्र महाकालः स कथ्यते शूकरक्षेत्रे स भूतनाथः ।।
तस्य कृपा भवति हि यस्योपरि गृहं तस्य सर्वथा पूर्यते ।
येन ऋजीषध्वनिः श्रूयते ।।४।।

अधुना तस्य गृहे द्वौ बालावेकः पुत्रः पुत्री च स्तः ।
पुत्री परधनमत्र कथ्यते पुत्रः पितुश्च दक्षिणहस्तः ।।
ध्वनिना ज्ञायते च यत्पुत्र्याः स्तवनं देव्या इव विधीयते ।
अहो ऋजीषध्वनिः श्रूयते ।।५।।

७– दुग्धं किन्न पिबसि कविबाले ।

पुत्रि ! त्वदीयो जनकः पश्यति त्वदाननं तं त्वन्न लोकसे ?
निमग्नासि क्रीडायामित्थं शयने त्वं चक्रेण ढौकसे ?
तिथ्यामद्य शिवत्रयोदश्यां दुहितस्त्वं किं व्रतमाचरसि ?
दुग्धं येन नाद्य त्वं पिबसि ? ॥१॥

—०—

माता ते त्वामाह्वयति सुते ! त्वं भ्रात्रा सह कुत्र गच्छसि ?
तिष्ठसि नैव द्रुतं प्रतिष्ठसे मात्रे प्रतिवचनं न यच्छसि ?
पितुर्गृहं शिशुक्रीडाभवनं तत्त्यक्त्वा क्व क्रीडितुं व्रजसि ?
वत्से ! दुग्धं कथन्न पिबसि ? ॥२॥

—०—

किं पितुरङ्कं गन्तुमिच्छसि ? स आपणं गतवानधुना तु ।
क्रेतुं त्वदीयक्रीडनकानि प्रेरितो इह वचनात्तव मातुः ? ॥
क्रीडिष्यसि त्वद्य क्रीडनकै रतो हि तूर्ष्णीं भव शिवमाले !
कथं त्वमद्य विरोदिषि बाले ! ॥३॥

—०—

प्रियेपुत्रि दुहितर्वत्से ! शृणु कीरमधुरवाणीरसवाले ।
आकारयति पिता त्वां मनसा कुत्र गता त्वं भोजनकाले ?
सहोदरेण समं क्व क्रीडसि न मे पार्श्वमागच्छसि बाले !
शृणोषि मे न वचः शिवमाले ! ॥४॥

—०—

वत्से ! जलं पिबसि कंसेन ? दुग्धं किन्न पिबसि कविबाले !
कथन्न खेलसि पितुः प्राङ्गणे रुजाकुलासि क्षरितमुखलाले !
अहो ! कदुष्णस्तेऽयं हस्तस्त्वं पतितासि कथं ज्वरजाले ।
अतोऽसि विमनास्त्वं शिवमाले ! ॥५॥

८–प्रिय ! तव दुहितुस्तीव्रस्तापः ।

दत्तं चिकित्सकेन भेषजम् अस्या मुखे मया निपातितम् ।
अनया तथापि तत्र रञ्जनया स्वारोग्यं नो समासादितम् ॥
अस्याश्चिन्ता मां प्रबाधते क इमां तापयति रोगपापः ?
प्रिय ! तव दुहितुस्तीव्रस्तापः ॥१॥

प्रिये ! कथय तवाऽऽत्मजातापः किन्तेन भेषजेन नाशितः ?
पश्य तेन कविराज ! सुतायाः कुतः स्वास्थ्यलाभो हि कारितः ।
प्रिय ! नय पुत्रीमौषधालयं स ते वैद्यराजो न दुरापः ।
प्रिय ! तव दुहितुस्तीव्रस्तापः ॥२॥

वैद्यराजदत्तं किमौषध वद सुभगे ! सुतया सुभक्षितम् ।
किन्तेन ? सुता मरणासन्ना, रोगबलं नाद्यापि नाशितम् ॥
तीव्रे तापे सति तु सुतायाः शिरसि निपात्यन्तां न किमापः ?
प्रिय ! तव दुहितुस्तीव्रस्तापः ॥३॥

अद्य का स्थितिः पुत्रीतापे ? किन्तस्याऽवनतिर्नो जाता ।
कविवर ! कुतः ? सा तु तव बाला संज्ञाशून्या मृतिमायाता ।
सर्वौषधानि शक्तिशून्यानि, तस्याः कालो नास्ति दुरापः ।
प्रिय ! तव दुहितुस्तीव्रस्तापः ॥४॥

क्षिप्राजलं पवित्रं विद्ये ! गङ्गाजलमिव शक्तिकारकम् ।
तस्या वदने क्षेपणीयमथ यद्धि भवेदिह रोगमारकम् ।
अस्या जले मज्जनं कार्यं शीतास्तापं प्रहरन्त्यापः ।
प्रिये ! सुतायास्तीव्रस्तापः ॥५॥

सर्वं कृतं न कोऽप्यगदोऽकृत नाथ ! सुतायाः शरीररक्षाम् ।
शिवं महाकालं भज भद्रे ! याच शङ्करं जीवनभिक्षाम्
स एव प्राणान् दातुं शक्तः पण्डितकृतमृत्युञ्जयजापः ।
प्रिय ! तव दुहितुस्तीव्रस्तापः ॥६॥

९– शान्तिं धारय प्रिये ! न रुदिहि ।

प्रिये सुते ! क्व गतासि बालिके ! पश्य रोदितीयन्ते माता ।
विलपति पिता त्वामये ! परितः पश्यति लब्धुमयन्ते भ्राता ॥
सुभगे ! तव रोदनेन नयने रक्ते भूते स्मरणं जहि हि ।
शान्ति धारय प्रिये ! न रुदिहि ॥१॥

तस्या ज्वर आसीदतितीव्रो येन सुता ते मृत्युमवाप्ता ।
प्रिये ! शुभमभूत्तस्यै यत्सा जीवनकष्टात्स्वर्गं प्राप्ता ॥
क्षिप्राजले गृहीता शान्तिस्तया प्रिये ! तन्मोहं जहिहि ।
शान्तिं धारयं प्रिये ! न रुदिहि ॥२॥

तव दुहितरं जीवितां कर्तुं सर्वे व्यर्थाः प्रिये ! प्रयासाः ।
गतं न शोचय पुनः स्वकीयं प्राप्तुमपत्यं भव न निराशा ॥
गमनागमनं भवति भवेऽस्मिन् सांसारिकीं स्मृतिं नो तनु हि ।
शान्तिं धारय प्रिये ! न रुदिहि ॥३॥

यो विश्वं रक्षति विश्वात्मा स एव तव सन्तानरक्षकः ॥
स एव कर्ता भर्ता धर्ता प्रजापालको विश्वभक्षकः ॥
तस्य शिवस्य भगवतः स्तवनं तस्या आत्मशान्तये कुरुहि ।
शान्ति धारय प्रिये ! न रुदिहि ॥४॥

आर्यपुत्र ! सा सौम्या बाला सतत संस्मृतिपथमायाति ।
मधुरस्मृतिं प्रदाय क्रीडया सा प्रियतम ! मां नैव जहाति ॥
अर्धरात्रमपि गतं प्रियतमे ! शयेऽधुनाऽहं त्वामपि च स्वापिहि ।
शान्ति धारय प्रिये ! न रुदिहि ॥५॥

भारत उत्तर प्रदेश एटाजनपद-सोरोंवासी,
गृहचर्चया दम्पतीवार्तालापमत्र विरचितवान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयोनविंशसर्गं कृतवान् ॥५८॥

विद्योत्तमाकालिदासीयम् ।

विंशः सर्गः (दाम्पत्यम्)

१–बालकेलिहीनो मे गेहः ।

काशीं गतस्य तव पुत्रस्य पञ्चवसंवत्सरा व्यतीताः ।
तस्य प्रिये ! दत्तकपुत्रस्य महोत्सवे वेदाः संगीताः ॥
तस्मिन् काले त्वया तु दृष्टः प्रासादे हि सोमरसमेहः ।
बालकेलिहीनो मे गेहः ॥१॥

मध्ये या बाला संजाता सा शीघ्रं स्वर्लोकं याता ।
ते लोका रसरहिताः सन्ति येषां सुतबाला न भवन्ति ।
या नो वाञ्छति गृहं बालरवगुञ्जितं सा हि युवती केह ?
बालकेलिहीनो मे गेहः ॥२॥

द्वयो र्बालयोः प्रजननकाले त्वया दर्शितः परमोत्साहः ।
अधुना तृतीयगर्भाधाने रसहीना भवती कथमाह ?
त्वामन्तरेण शिशुजनयित्री राजकविगृहे भविता केह ?
बालकेलिहीनो मे गेहः ॥३॥

नाहमृतुस्नातापि प्रियतम । तत्ते कथमिच्छा स्यात्पूर्णा ?
शीतस्थाने शरीरेषु सा सततमुष्णतां ददाति तूर्णा ।
प्रिये ! कथय मां कथं भविष्यति कालिदाससदने शिशुलेहः ?
बालकेलिहीनो मे गेहः ॥४॥

गत्वा राजवैद्यपार्श्वं शृणु गृहाण किञ्चिदौषधं कान्ते !
पञ्चषदिवसानन्तरं ततो येन भवेस्त्वं रजस्वलान्ते ।
बाधान्ते सहचरणबलादिह भवेदावयोरपत्यमेहः ।
बालकेलिहीनो मे गेहः ॥५॥

सन्ततये जीवने न जाने लोकाः कति दुःखानि सहन्ते ।
बालकृतान् खेलान्निकेतने द्रष्टुं ते सततं प्रयतन्ते ॥
अहमिच्छामि पुनः शिशुमेकं का ते मन्मतविभिन्नतेह ?
बालकेलिहीनो मे गेहः ॥६॥

२–प्रिये ! प्रीतिमहमनुभवामि ते ।

प्रेमाऽनुभववस्तु ह्यस्त्येकं यदभिव्यक्तिरपि भवितुमर्हति ।
त्वयि मे प्रेमेदं यः कथयति कदा स तत्कर्तुं नो सर्पति ?
मौनेनापि प्रकटितं भवति प्रेम ! प्रिये हृदये वसामि ते ।
प्रिये ! प्रीतिमहमनुभवामि ते ॥१॥

यस्य जनस्य रमण्यां प्रीतिस्तस्य नास्ति कस्मादपि भीतिः ।
तयोः प्रेम साकारं कर्तुं ततः पाल्यते विवाहरीतिः ।
प्रतीक्षस्व कञ्चित्कालं त्वं वचः प्रेमयुतमनुसरामि ते ।
प्रिये ! प्रीतिमहमनुभवामि ते ॥२॥

प्रीतिरेकतो भवति यदा चेत्सा पुनरन्यस्मादुद्भवति ।
अग्निरेकतो ज्वलत्यन्यतः स्वकर्णस्तदा स आविर्भवति ।
प्रेमवचांसि स्फुल्लिङ्गानिव सुभगे ! हृदये प्रक्षिपामि ते ।
प्रिये ! प्रीतिमहमनुभवामि ते ॥३॥

यस्मिन् हृदये प्रेमनिवासस्तत्र भवति परमेश्वरवासः ।
यस्मिन्नाऽऽत्मसमर्पणकामस्तस्य न सफलः प्रेमविलासः ।
पुनरेकत्वं प्राप्तुमिच्छया प्रेमभावनां प्रेरयामि ते ।
प्रिये ! प्रीतिमहमनुभवामि ते ॥४॥

प्रिय ! मे शवमुत्थाप्य सदनतो यदा विषण्णमनास्त्वं गच्छेः ।
रामो नाम सत्यमिति न वदन् प्रेम सत्यमिति वचः प्रयच्छेः ।'
एकत्वेन तदमरं कर्तुं नश्वरकायं प्रेरयामि ते ।
प्रिये ! प्रीतिमहमनुभवामि ते ॥५॥

३–कदा करिष्ये तव सम्मानम् ?

जठरानलस्य गतिर्विचित्रा किञ्चिदभीष्टमहं प्राप्स्यामि ?
देव ! त्वदीयप्रणयपूजायां जीवनसुमं कदा दास्यामि ?
प्रणयं ते साकारं कर्तुं प्रिय ! कर्तास्मि वेदनादानम् ।
किञ्चित्क्षणजीवनं मदीयं कदा करिष्ये तवसम्मानम् ॥१॥

नभस उषा रम्यं मनोहरं मामनुरक्तामलं न कर्तुम् ।
कामक्रोधमदलोभतिमिरमपि रवेर्ज्योतिरपि नालं हर्तुम् ।
मुकुलितमनःसुमं मे प्रियतम ! कर्ता किं रतिविकासदानम् ?
किञ्चित्क्षणजीवनं मदीयं कदा करिष्ये तवसम्मानम् ॥२॥

प्रिये ! तुभ्यमद्याऽऽपणादहं दुकूलशाटीमानेष्यामि !
सुवर्णमुक्तावलीहारमपि हट्टं गत्वा निर्मास्यामि ।
अस्मिन्मनोरमे रतिकाले हर्षय मनः प्रिये ! त्यजमानम् ।
किञ्चित्क्षणजीवनं मदीयं कदा करिष्ये तवसम्मानम् ॥३॥

मनः स्थितिः स्यादस्थिरा यदा तदा मनोवीणा गायति नो ।
मानो भाति न सम्मानो वा नास्त्यङ्गेषु प्रफुल्लता तनोः ।
प्रम्णा ते दूरीकृतदुःखं कर्ता कदा मनः स्मितदानम् ?
किञ्चित्क्षणजीवनं मदीयं कदा करिष्ये तवसम्मानम् ॥४॥

आशासे केवलं तुभ्यमिह पुनरेकं बालं दास्यामि ।
तव प्रियतमे ! बालिकानिधनाद्रिक्तं मनः पूरयिष्यामि ।
गतं न शोचय, प्रसीद, हर्षय, प्रसन्नमनसा कुरु रतिदानम् ।
किञ्चित्क्षणजीवनं मदीयं कदा करिष्ये तव सम्मानम् ॥५॥

शिवमर्चितुं किमासीः प्रियतम ! गतो महाकालेश्वरघट्टम् ।
एकावलीहारमानेतुं गतवानासं प्रिये ! हि हट्टम् ।
आनीता सा त्वया दर्श्यतां मन्ये तद्दर्शनमुदितोऽसि ।
अतो विलम्बादिहाऽऽगतोऽसि ॥६॥

४–बिन्दुभिरिह त्वां स्नातुमागतः ।

बहिरागच्छ पश्य भो ललने ! कृष्णवारिदो गर्जति गगने ।
किन्नायासि कथय गजगमने ! अधुना त्वं किं करोषि भवने ?
तव प्रेमी बाहू प्रसारयन् प्रेम्णा त्वामिह प्राप्तुमागतः ।
प्रेयसि ! कालिदासमेघोऽयं बिन्दुभिरिह त्वां स्नातुमागतः ।।१।।

शीघ्रमेहि मम पार्श्वं कान्ते ! मेघच्छविं पश्य दिवसान्ते ।
मनोहरामपि सन्ध्यां दान्ते ! जयति सर्वथा तव मुखभान्ते ।
गर्जनध्वनिना निपतन्मेहः प्रेमगीतमिह गातुमागतः ।
प्रेयसि! कालिदासमेघोऽयं बिन्दुभिरह त्वां स्नातुमागतः ।।२।।

या प्रेमिका करोति न मानं कुरुते या पत्ये रतिदानम् ।
या विदधाति प्रेमरसपानं सा प्राप्नोति प्रेमिसम्मानम् ।
प्रेमतपस्विनि ! तव प्रेमी त्वां कष्टसहां निर्मातुमागतः ।
प्रेयसि ! कालिदासमेघोऽयं बिन्दुभिरिह त्वां स्नातुमागतः ।।३।।

या सर्वथा भवति ह्यनुकूला सा न कदापि भवति प्रतिकूला ।
या प्रति पतिं भवति रतितूला सा सर्वदा भवति सुखमला ।
त्वमसि तादृशी तव पार्श्वेऽहं निजमधिकारमहातुमागतः ।
प्रेयसि ! कालिदासमेघोऽयं बिन्दुभिरिहः त्वां स्नातुमागतः ।।४।।

कथमागच्छसि नो रतिकामे ! वचो न पतति कर्णयो र्वामे !
पत्नी रमयति स्वपतिं रामे ! कथमुत्तरसि न मां घनश्यामे !
मेहोऽयं जलधाराहस्तैः स्वाङ्के त्वामादातुमागतः ।
प्रेयसि ! कालिदासमेघोऽयं बिन्दुभिरिह त्वां स्नातुमागतः ।।५।।

ागन्ता प्रिय ! कार्तिकमासे पूजितपतिका करकच्चतुर्थी ।
आर्य ! मयार्ऽघितचन्द्रसमो मे तदा भविष्यसि भोक्ता सतिथिः ।
सुभगे ! सतिथिः प्रणयाह्वाने दत्तः कालो दूरमागतः !
प्रेयसि ! कालिदासमेघोऽयं बिन्दुभिरिह त्वां स्नातुमागतः ।।६।।

५–कुरु गृहलक्ष्मीपूजनमद्य ।

उज्जयिनीयं दीपैर्दीप्ता समलङ्कृता पश्य नारीव ।
वस्त्रैर्भूषितबालवृन्दमिव सन्दीप्तं प्रतिगेहमतीव ।
गृहमागच्छ महालक्ष्मि ! त्वं महेश्वरी धनदेति निगद्य ।
कुरु गृहलक्ष्मीपूजनमद्य ॥१॥

दारिद्र्यतिमिरमपहर देवि ! धनालोककिरणान् विस्तारय ।
अनर्थकर्तारञ्च सर्वतो धनहर्तारं दस्युं मारय ।
निर्धनतामरणापहारिके धनजीवनदे ! देहि तदद्य ।
कुरु गृहलक्ष्मीपूजनमद्य ॥२॥

सागरमन्थनविनिर्गतासि त्वं रामासि महामायासि ।
श्रीशोभासि वित्तभोग्यासि विद्याधनकाञ्चनकायासि ।
वैभवपूर्णं कुरु मे सदनं देवि ! ते स्तुतिं करोमि सद्यः ।
कुरु गृहलक्ष्मीपूजनमद्य ॥३॥

चतुर्भुजे कविमानससंस्थे ! धनाढ्यकरसंवाहितचरणे !
जनभरणे कृतमानववरणे ! कविमरणे स्वीकृतबलहरणे !
महादेवि ! कुरु कृपां सुसद्ये ! प्रसीद मयि लक्ष्मीति प्रवद्य ।
कुरु गृहलक्ष्मीपूजनमद्य ॥४॥

सकलभुवनमाता त्वं लक्ष्मि ! क्षीरसमुद्रविष्णुवरजाये !
नूपुरकङ्कणसुहारकुण्डलमुक्तामणिसमलंकृतकाये !
त्वमसि महामाया सुरशक्ति र्महाशक्तिर्विष्णुं प्रतिपद्य ।
कुरु गृहलक्ष्मीपूजनमद्य ॥५॥

स्वानुरागतैलजधाराभिर्ममान्तरिकदीपान् प्रज्वालय !
प्रेम्णा सिक्तैर्मधुरालापैः प्रेमपिपासुमानसं पालय !
कवितां कुर्वन्निजां प्रियतमां मामागच्छेः प्रियतम ! सद्यः ।
कुरु गृहलक्ष्मीपूजनमद्य ॥६॥

६–बिन्दुरलङ्कृतोऽस्ति तव भाले ।

सीमान्ताद्यल्लम्बते प्रिये ! तव सौवर्णिकमस्तकतिलकम् ।
मनोहरं हृद्यं रमणीयं तज्जनचित्ताकर्षणजनकम् ॥
प्राच्या यथारुणरवी राजति तथैव कवितासरोमराले !
बिन्दुरलङ्कृतोऽस्ति तव भाले ॥१॥

नीरजे तु तव नयने जाते चन्द्रो विष्टो मुखे विभाते ।
तव नासिकाग्रकोट्या निहता कीरचञ्चुरतिरक्तिमा नता ॥
नासामौक्तकशोभितासि त्वं शृणु मे वचो महीश्वरबाले !
बिन्दुरङ्कृतोऽस्ति तव भाले ॥२॥

डाडिमसमावुरोजौ ते तौ कमलबीजकोशाविव भातः ।
यौ परिग्रहीतुमाशु मे करौ पञ्चाङ्गुलीः प्रसार्य प्रयातः ॥
बालस्तौ प्रपातुमुत्ताम्यति भाविनं पाययेः रतिमाले !
बिन्दुरलङ्कृतोऽस्ति तव भाले ॥३॥

प्रिये ! त्वदीयौ गोलकपोलौ द्वौ तौ भूगोलाविव भातौ ।
यौ द्वौ गौरवर्णप्रकाशितौ कान्त्या रतिदर्पणौ प्रजातौ ॥
मदाननं परिचुम्बति क्रमशस्तावोष्ठाभ्यां ते रतिकाले ।
बिन्दुरलङ्कृतोऽस्ति तव भाले ॥४॥

स्वर्णिमकृष्णबालगतगर्ता संशोभते तवोदरनाभिः ।
इह गम्भीरस्त्रिपथगाधारातुल्याभिस्तिसृभिर्वलिकाभिः ॥
यस्या भ्रमरे गतस्तव प्रियश्चक्रमश्नुतेऽत्र रमणचाले ।
बिन्दुरलङ्कृतोऽस्ति तव भाले ॥५॥

जङ्घाद्वयं तथा तवभाति यथा विभातो रम्भाजघने ।
ययोरन्तरे भग– प्रभावात्त्वं कथ्यसे भगवती भवने ॥
तस्य महत्ता जगति पूजयति नारीं सदा प्रेमरसपाले !
बिन्दुरलङ्कृतोऽस्ति तव भाले ॥६॥

७—अद्य प्रिये ! पतिपूजादिवसः !

इयमायाता करकचतुर्थी त्वयाऽत्र दत्त सङ्गमवचनम् ।
यस्यां तिथौ पतिर्विदधाति प्रेम्णा पत्न्यामपत्यरचनम् ॥
पतिचन्द्राय देहि प्रणयाऽर्घ्यं समुद्गच्छतेनिजहृन्नभसः ।
अद्य प्रिये ! पतिपूजादिवसः ॥१॥

किं विस्मृतोऽसि तस्मिन्दिवसे यः प्रेमरसस्त्वया प्रदत्तः ।
तस्मिन्नेव दिने प्रिय ! रमणी तव सहचरी गर्भमाधत्त ।
अद्यावधि मे प्रिये ! कथ्यतां प्रियवृत्तान्तः श्रावितो न सः ?
अद्य प्रिये ! पतिपूजादिवसः ॥२॥

शृणु मे प्रिय ! कतिपयै रहोभिः पुनः सूनुरेकस्तव भविता ।
यस्तव वंशवृद्धिमपि कुर्वन् पुर्यामस्यामविता कविताः ॥
प्रिये ! सम्भवति दुहिताप्यपरा किन्नास्तीयं शङ्का मनसः ।
अद्य प्रिये ! पतिपूजादिवसः ॥३॥

यत्किञ्चिदहं वदामि प्रियतम ! तत्सर्वं सत्यं मन्येऽहम् ।
अस्माद् गर्भात्कदापि कविवर ! सम्भविता मे नो कन्येयम् ॥
प्रिये ! कथय तव विश्वस्तोऽयं कथं प्रकथयति मानसरभसः ।
अद्य प्रिये ! पतिपूजादिवसः ॥४॥

कुमारसम्भवलक्षणानि ते सञ्जायन्ते मम गर्भेऽस्मिन् ।
नास्ति किमपि तल्लक्षणमधुना सञ्जाता तव पुत्री यस्मिन् ।
प्रसीदामनितरामहं प्रिये ! तव विश्वासं श्रुत्वा मनसः ।
अद्य प्रिये ! पतिपूजादिवसः ॥५॥

पश्य प्रिये ! नववादनसमये विधुः समुद्गच्छन्नायाति ।
यो गगने चन्द्रिकया सार्धं पत्नीसहितःपतिरिव भाति ॥
तं पूजय दत्वाऽर्घ्यं मनसा यो विदारयति हृदयं तमसः ।
अद्य प्रिये ! पतिपूजादिवस ॥६॥

८—कवेर्द्वितीयः सुत उत्पन्नः ।

श्यामविहारिन् ! त्वया गम्यताम्, कालिदाससदनं प्रविश्यताम् ।
तत्र बालमङ्गलं दृश्यताम्, वितरितमोदकचयो गृह्यताम् ॥
काशिराजदुहितुर्विद्यायास्तस्या हर्षसमय आसन्नः ।
कवेर्द्वितीयः सुत उत्पन्नः ॥१॥

९—रोरुद्यते त्वदीयो बालः ।

रे कविपुत्र ! कथं रोदिषि रे ! नाऽङ्के त्वां क्रीडयति पिता ते ।
किन्ते मातामहीसंस्मृतिस्त्वामवसादयतीति विभाते ॥
अयमूर्ध्वं निजपादौ कृत्वा प्रिय ! पश्यति त्वामायतभालः ।
रोरुद्यते त्वदीयो बालः ॥१॥

१०—सुतजन्मोत्सवभोजोऽयन्ते ।

सालुकव्यञ्जनानि रुचिदानि तथा माषगर्भाः स्वादिष्टाः ।
शष्कुल्यश्च स्वाददाः सुभगे ! मोदकाश्च संयावा इष्टाः ।
स्वादु तथा दाधेयं पेयं रुचकरमेषु सुगुल्फे ! किन्ते ?
सुतजन्मोत्सवभोजोऽयन्ते ॥१॥

पायसञ्च पेयं किमीहसे प्रिये ! जिघत्ससि सुकलाकन्दम् ।
भोज्यसरसकुण्डलीभक्षणे गृह्णीषे त्वन्न किमानन्दम् ?
भक्षणीयमेतन्मिष्टान्नं रुचिकरमेषु सुगुल्फे ! किन्ते ?
सुतजन्मोत्सवभोजोऽयन्ते ॥२॥

मोहनभोगमत्तुमिच्छसि किं तव रसगोलान् खादितुमिच्छा ?
अमृतीं दुग्धपूपिकां भक्षय किमियं मल्लपूपिकापृच्छा ?
ततो भक्षणीयं लवणान्नं तवेन्द्रियाणि सदैषु रमन्ते ।
सुतजन्मोत्सवभोजोऽयन्ते ॥३॥

११–सुभगे ! तव सुताननं दृष्टम् ।

तव सुताननं द्रष्टुं भद्रे । उज्जयिनीभूपतिरागतवान् ।
मुद्राणामेकोत्तरमेकं यस्य स्वागते शतं दत्तवान् ॥
तच्छुभवसनद्वयमपि दत्तं तवनवशिशवे त्वया यदिष्टम् ।
सुभगे ! तव सुताननं दृष्टम् ॥१॥

सौवर्णिककरकङ्कणद्वयं तथा द्वयं सुतचरणभङ्करम् ।
शब्दकरीमपि हेममेखलां गलाऽलङ्करणमपि मनोहरम् ।
तव सुतमातामहः प्रहितवान् सर्वं किन्न तव मनो हृष्टम् ?
कवे ! त्वया सुताननं दृष्टम् ? ॥२॥

आभूषणानि तथाऽखिलानि क्षौमानि कवे ! सर्वविधानि ।
सर्वाऽलङ्करणानि च पित्रा दत्तान्यावयोर्हि वसनानि ॥
तवाऽङ्गरक्षकमधोवस्त्रमपि धौतमेकमुष्णीषं मृष्टम् ।
किन्ते तत्र चित्तमाकृष्टम् ? ॥३॥

प्रिये ! त्वदर्थं किं प्रहितानि कानि कानि दुकूलचीराणि ?
कौशेयानि मदर्थं कञ्चुकिकाऽन्तरीयशाटीवस्त्राणि ।
उपानहौ प्रेषिते त्वदर्थं प्रिय ! काशिकमुत्तरीयमिष्टम् ।
येन त्वदीयं मनः प्रहृष्टम् ॥४॥

श्वश्रूस्तव मे जननी मह्यं दर्पणमेकं मस्तकतिलकम् ।
प्रहितवती कङ्कतिकां कज्जलमेकमङ्गुलीयकमलक्तकम् ॥
कङ्कणकुण्डलकाञ्चिकण्ठिकानूपुराणि नासासुमिष्टम् ।
दृष्ट्वा यानि मनस्ते हृष्टम् ॥५॥

उज्जयिनीश्वरराज्ञी मह्यं दत्तवती प्रिय ! मुक्ताहारम् ।
मालवमहामात्यसम्प्रेषितमिमं पश्य ग्रीवाऽलङ्कारम् ।
तेषां दत्तैराशीर्वादैः सुतस्य सर्वमनिष्टं नष्टम् ।
सुभगे ! तव सुताननं दृष्टम् ॥६॥

१२–बालकृष्णसमसुतस्तवं कुरु ।

जय जय राधामाधव भगवन् ! हरेकृष्ण जय कुञ्जविहारिन् ।
जय गोपीगणमानसवल्लभ ! जय करकमले गिरिवरधारिन् ॥
सुतमङ्के कुरु गिराञ्च शिक्षय, जनकस्त्वं यस्य प्रथमो गुरुः ।
बालकृष्णसमसुतस्तवं कुरु ॥१॥

—०—

१३–राममिव सुतन्ते पश्यामि ।

जय जय सीतामानसरञ्जन ! मातृस्थाने विद्याधारिन् !
विद्याकौशल्यामुद्वर्धन ! कालिदासदशरथसुखकारिन् ।
निजमातुर्ह्यानन्दं वर्धय रे सुत ! तव समीपमायामि ।
राममिव सुतन्ते पश्यामि ॥१॥

—०—

१४–अतो विलम्बेन समागतोऽसि ?

आलुकानि क्रेतुं गत आसीः पुनश्च शाकं कथमानैषीः ?
पूर्वं कर्तय ततः प्रिये ! पच वचोऽनुसारं कुरु माभैषीः ।
अद्य पायसं कृतं मया प्रिय ! भक्षय तद्भक्षणे रतोऽसि ।
हट्टाद्विलम्बेनाऽगतोऽसि ? ॥१॥

स्नातुं क्षिप्राघट्टमगच्छं तत्र केऽपि कवयः सम्मिलिताः ।
अनाहूतकविमेलनमभवद यत्र श्रावितास्तैर्निजकविताः ॥
किं श्रावितं त्वया वदमां प्रिय ! त्वं कविताश्रावणचतुरोऽसि ।
अतो विलम्बेन समागतोऽसि ॥२॥

१५–रोरुद्यते त्वदीयो बालः ।

पचामि सूपं प्रथमं पश्चादालुकशाकं कवे ! करिष्ये ।
लवणमजाजीयुक्तं तक्रे क्षिप्त्वा त्वदजीर्णं च हरिष्ये ॥
पुत्रंक्रोडे कृत्वा हर्षय प्रिय ! गच्छति तव भोजनकालः ।
रोरुद्यते त्वदीयो बालः ॥१॥

—०—

१६–सिंहकथां त्वां श्रावयामि सुत ! ।

विन्ध्यवने निवसति सिंह एकस्तस्य पार्श्वमागच्छति भेकः ।
कथयति मया सार्धमो भ्रातः ! पश्चात्सर्प एक आयातः ॥
रक्ष मां तस्माद्व नरक्षक ! सिंह उवाच किं वदसि टर्रं त !
सिंहकथां त्वां श्रावयामि सुत ! ॥१॥

०—

१७–मत्तश्चटककथां शृणु मातः ।

निम्बवृक्षके तस्मिन्नेका निवसति स्म चटका निर्भीका ।
चटकस्तत्समीपमायातश्चञ्च्वा हतस्तया निर्यातः ।
पुनरुपगता तं हि चटकाऽतस्ततो द्वयोः शावकः प्रजातः ।
मत्तश्चटककथां शृणु मातः ॥१॥

—०—

१८–मातर्गच्छति जनको हट्टम् ।

कानि कानि वस्तूनि क्रतुं कथयसि तं मे पितरं मातः !
कथय, पिता मे गच्छति शीघ्रं त्वां प्रष्टुं पुनरहमायातः ॥
तेन साकमथ क्षिप्रां स्नातुं यामि महाकालेश्वरघट्टम् ।
मातर्गच्छति जनको हट्टम् ॥१॥

—०—

१९–तात ! त्वमधुना गाथां श्रावय।

एकस्मिन् सघने कान्तारे पुत्र ! ऋषिस्त्वेको वसति स्म।
तस्य कुटीरे मूषिक एको भिक्षान्नं चरितुं भ्रमति स्म॥
पितः ! मूषगाथामेकस्मिन् पत्रे कृत्वा मामध्यापय।
तात ! त्वमधुना गाथां श्रावय॥१॥

श्रृणु रे वत्स ! विडालो मूषं हत्वा तस्य भोजनं कुरुते।
स्वाभाविकं यत्र वैरं स्यात्तत्र बली त्वबलं संहरते॥
आखुराह कुरु मार्जारं मामृषे ! शरीरं मे त्वं मारय।
पुत्र ! त्वमग्रे गाथां श्रावय॥२॥

पितः ! श्रृणु ऋषिर्मूषमब्रवीदाखो रे ! भव मार्जारस्त्वम्।
ततः स ऋषिवाणीमहत्तया मूषस्त्वलभत मार्जारत्वम्॥
मूषान् हत्वा स तानश्नुते पुनस्तत्कथा का तां स्मारय।
तात ! त्वमधुना गाथां श्रावय॥३॥

हन्ति विडालं कुक्कुरः सदा ततो भवति स तद्भिया त्रस्तः।
कुरु मां सारमेयमृषिवर ! भोस्तेन प्रार्थितो वरदो हस्तः॥
'श्वा भव रे !' श्रुत्वा तद्वचनाद्भूतस्तथा स तन्मां पारय।
पुत्र ! त्वमग्रे गाथां श्रावय॥४॥

कुक्कुरः स ऋषिवर्यकुटीरे न्यवसद्वनसिंहाच्च विभीतः।
सिंहत्वं कांक्षसि रे त्रस्त ! ऋषिणा तद्भयमहिमा गीतः॥
ऋषेः प्रसादात्स च सिंहोऽभूद् मुखेन तस्य गर्जनां कारय।
पितस्त्वमग्रे गाथां श्रावय॥५॥

सिंहो भूत्वा स ऋषिं दृष्ट्वा हन्तुं तञ्च यदा गर्जितवान्।
'पुनर्मूषिको भव रे सिंह !' इत्युक्त्वा स ऋषिर्धावितवान्॥
धावति मूषस्तदा न सिंहः, सुत ! हृदि ऋषिवाक्शक्ति धारय।
तात ! त्वमपरां गाथां श्रावय॥६॥

२०—अग्रे त्वं चल पुनरायामि ।

मातः ! श्रावय कामपि गाथां, शृणु सुत ! चटकाकथां स्मरामि !
यस्यां काकः कथयति सततम् 'अग्रे त्वं चल पुनरायामि' ॥
चटकाकाकावेकपादपे मित्रे भूत्वा प्रतिवसतः स्म ।
क्षेत्रे विकीर्ण गोधूमकणान् तौ सह गत्वा भक्षयतः स्म ॥१॥

चटकाऽवोचन्निजतरुपार्श्वे चञ्च्वाऽस्माभिः क्षेत्रं कार्यम् ।
यदि तत्र त्वं भागी भवसि तन्मे वचनं त्वया हि धार्यम् ॥
"चटके ! वचनन्ते जानामि, त्वं त्वग्रे चल पुनरायामि ।
अस्मिंस्तरुमूले तिष्ठामि शीतलपानीयं च पिबामि" ॥२॥

काकोक्तं तद्वचनं श्रुत्वा, याता सा क्षेत्रं निर्मातुम् ।
तन्निर्माय च समये आगतस्तत्र वत्स ! बीजानि विहातुम् ॥
चटकोवाच काकसुतवर ! शृणु, बीजवपनकालस्त्वायातः ।
निजचञ्चौ बीजानि गृहीत्वा, मया सार्धमेहि त्वंभ्रातः ॥३॥

तेनोक्तं शृणु चटकाकन्ये !
यत्त्वं ब्रूषे तदहं मन्ये ।
सम्प्रति बन्धुषु सखीन् लपामि ।
त्वं वप्तुं चल पुनरायामि ॥४॥

चटका गता तत्र बोजानि, वप्त्वा पुनरागता वायसम् ।
पुनरेकाकिन्या तयानिजं क्षत्रं कृतं स्वचञ्च्वा सरसम् ॥
वायसवर्जं तया कर्तितं स्वीयं शस्यं शुष्कतां गतम् ।
सहायतायाचने तस्य चहि केवलमेतद्वचः कर्णितम् ॥

शृणु मे वचनं चटकाकन्ये !
यत्त्वं ब्रूषे तदहं मन्ये ।
सहायकन्ते वचो ददामि ।
अग्रे त्वं चल पुनरायामि ॥६॥

२१–पुत्र ! संस्कृतां पठ निजभाषाम् ।

वत्स ! त्वमेहि पट्टिकामानय यस्यां वर्णाकृतिं करोमि ।
तस्यां क्रमं त्वकारादेस्ते ज्ञानार्थं प्रतिदिनं तनोमि ॥
आदौपर्यन्तमचो द्वादश प्रथमं कुरुष्व शिक्षितुमाशाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ॥१॥

प्रथमे पञ्च स्वरास्तु मौलिकाः पश्चात्सप्त सन्ति संयुक्ताः ।
कादिहान्तव्यञ्जना हलस्ते त्रयस्त्रिंशद्गणनया ह्युक्ताः ॥
सानुस्वारविसर्गानपि तान् कुरु हृत्पट्टे लेखितुमाशाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ॥२॥

व्यञ्जनवर्णं स्वरसंयुक्तं कुरु तत इत्थं पठ निश्शङ्कः ।
कका च किकी च कुकू च केकै कृकॄ च कोकौ ततश्च कं कः ॥
सर्वे हलः सन्ति स्वरहीना यथा क् तथा ख् पठितुं कुवशाम् ।
पुत्र! संस्कृतां पठ निजभाषाम् ॥३॥

'अवर्णस्य विष्णुरित्यर्थो वत्स ! विद्धि शिव' उ'कारप्रोक्तः ।
द्वयोः सन्धिरूपम् 'ओ' कारः सृष्टिविधाता ब्रह्मा चोक्तः ॥
कोऽर्कः केन जलेन कुं धरां नैव कदापि करोति निराशाम् ।
पुत्र! संस्कृतां पठ निजभाषाम् ॥४॥

'मा' शब्देन च कथिता माता यस्या उदरात्सुता भवन्ति ।
अलःपञ्चचत्वारिंशत्ते सर्वे स्वानर्थान् कथयन्ति ॥
यज्ञोपवीतयुक्तो भूत्वा त्वं वेदान् पठितुं कुर्वाशाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ॥५॥

भारत उत्तर प्रदेश एटाजनपदसोरोंवासी,
दाम्पत्येन सरसभावात्मकगीतिकाव्यं कृतवान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
विद्योत्तमाकालिदासीये विंशसर्गं रचितवान् । ॥७८॥

विद्योत्तमाकालिदासीयम् ।

एकविंशः सर्गः (बालशिक्षणम्) ।

१—वत्स ! पठेस्त्वं संस्कृतभाषाम् ।

संस्कृतव्याकरणज्ञानाय प्रणम पाणिनिं वैयाकरणम् ।
शब्दशास्त्रकारान् तत्पूर्वान् व्याडि शिष्यैः पूजितचरणम् ।।
शाकल्यस्फोटायनौ च तौ येषां विधिभिः प्राप्तविकासाम् ।
वत्स ! पठेस्त्वं संस्कृतभाषाम् ।।१।।

पदं सुप्तिङन्तं विज्ञाय त्वं गच्छेरर्चितुं शङ्करम् ।
स धारयति भक्तान् सुरक्षितुं दुष्टेभ्यो रूपं भयङ्करम् ।।
यस्यडमरुनादादृषिपाणिनिरचितचतुर्दशसूत्रविकासाम् ।
वत्स ! पठेस्त्वं संस्कृतभाषाम् ।।२।।

अइउण्-ऋलक्-एओङ्-ऐऔङ्-इत्थं स्वरसूत्राणि व्यवहर ।
'इको यणचि' सूत्रं मात्रंशसन्धौ कवेरंश ! त्वं संस्मर ।।
सन्धिसमासरूपविज्ञानैः कल्पितभारतभूसुरग्रासाम् ।
वत्स ! पठेस्त्वं सस्कृतभाषाम् ।।३।।

'एङः पदान्तादति'-हे हरेऽव, भवं भवानीपतिमर्च सूनो !
पाणिनिकृतं व्याकरणादिशास्त्रं त्वां पाठयति पुत्र ! तव प्रसूः नो ?
विद्योत्तमायास्त्वम् 'आद्गुणोऽसि' स्वां मातरं तां कुरु नो निराशाम्
वत्स ! पठेस्त्वं संस्कृतभाषाम् ।।४।।

'झलां जशोऽन्ते, जगदीश्वरस्ते 'विसर्जनीयस्य स' पातु विद्याम् ।
सकलो माभूद्वदने शकलो वाणीं हि कुरु व्याकरणेन गद्याम् ।।
पठ 'वृद्धिरेचि' त्वं सर्वदैवम् 'अकःसवर्णे दीर्घ' स्तदाशाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ।।५।।

जनकश्चिनोति त्वां 'स्तोः श्चुनाश्चुः' संस्कृतविधिज्ञं कर्तुं कविं वा ।
त्वां काशीनृपमन्त्रिणमीहे वाञ्छसि 'मोऽनुस्वारः' किं वा ।।
आशासे त्वं ज्ञात्वा सन्धिं पूरयितासि तनूज ! ममाशाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ।।६।।

'रीरि' 'ढ्रलोपे दीर्घोऽण'स्त्वां सूत्रे साधयतो नीरोगम् ।
कवयो निरङ्कुशाः 'ससजुषोःरु र्हशि च' कुर्वते विद्याभोगम् ।।
'वाशरि' साशश्शब्दान् ज्ञात्वा कुरु सुत ! धातुरूपजिज्ञासाम् ।
पुत्र ! संस्कृतां पठ निजभाषाम् ।।७।।

२–वनादागतास्ते प्रियगावः ।

पश्य प्रिये ! श्यामिका सा गौर्यस्या वत्सः षाड्मासिकः ।
अददादिमां शारदानन्दो जनकस्ते यो नृपः काशिकः ।।
आनय पात्रं दुग्धं दोग्धुं समीपमस्याःशुभे ! चलावः ।।
वनादागतास्ते प्रियगावः ।।१।।

पुत्र ! वहुक्षीरेयं श्यामा कामधेनुरिव पयो ददाति ।
सा धवला कपिला निर्वत्सा क्षीरमनल्पं या न दधाति ।।
जहाति सर्वं दुग्धं पात्रे येनेमामावां रक्षावः ।
वनादागतास्ते प्रियगावः ।।२।।

रक्तगौरमिश्रितवर्णा सा गौरपि प्रिय ! स्वस्थानं याति ।
पयसामाधिक्यं या दधती पयः कदाप्यधिकं न ददाति ।।
वत्सं चोषयति स्तन्यं सा दोग्धुमेहि तामावां यावः ।
वनादागतास्ते प्रियगावः ।।३।।

३–प्रिये ! प्रेम तव जीवनसारः ।

एहि प्रिये ! त्वामहमिच्छामि त्वया विना मे व्यर्थजीवनम् ।
यथा चन्द्रिकां विना न चन्द्रः कवितां विना न कवेः स्पन्दनम् ।
त्वं मे प्रकृतिः पुरुषोऽहन्ते द्वयोः सङ्गमः प्राणाधारः ।
प्रिये ! प्रेम तव जीवनसारः ।।१।।

प्रिय ! सङ्गमवार्तां नहि कुर्याः प्रसववेदनां विस्मरामि नो ।
बालजननकाले या पीडा भवति हि तां हृदयाद् हरामि नो।।
कामवासनाहीनसङ्गमो भवति जीवने मोक्षाधारः ।
तादृशप्रेमा जीवनसारः ।।२।।

४–शब्दधातुरूपाण्यवगच्छ ।

बालक एको द्वौ च बालकौ बालकाश्च बहुवचने सन्ति ।
विष्णुं शिवौ ब्रह्मणो हस्तान् भक्ता भक्त्या विलोकयन्ति ।।
गुप्त्या खड्गाभ्यां धनुरस्त्रैः शत्रुभ्यः स्वात्मानं रक्ष ।
वत्स ! शब्दरूपाण्यवगच्छ ।।१।।

स्वस्र पितृभ्यां मातृभ्यः शब्दान् ज्ञातुं वचनं देहि ।
खलाच्च चौराभ्यां दुष्टेभ्यः स्वं त्रातुं मे समीपमेहि ।।
बुधस्य जनयोर्लोकानां च ज्ञाने फलयोः कर्मसु गच्छ ।
वत्स ! शब्दरूपाण्यवगच्छ ।।२।।

इत्थं सप्तविभक्तिषु ज्ञात्वा शब्दस्वरूपं लोके व्यवहर ।
बाले ! पितरौ ! बालकाः ! इति सम्बोधनरूपाणि त्वं स्मर ।।
अधुना धातुरूपज्ञानार्थं कक्षे कविं स्वपितरं गच्छ ।
वत्स ! धातुरूपाण्यवगच्छ ।।३।।

एहि पुत्र ! आसन्द्यामुपविश, धातोर्दशहि लकाराः सन्ति ।
पठति पठतः पठन्ति लटि भोऽन्यपुरुषरूपाणि भवन्ति ।।
किं पश्यसि मां युवां न पठथः स्वसा त्वञ्च, तद्यूयं गच्छथ ।
इति मध्यमरूपाण्यवगच्छथ ।।४।।

अध्यापयामि त्वामावां पुनरिदं लिखावस्ततः पठामः ।
इत्युत्तमपुरुषस्य क्रियाया रूपं ज्ञात्वा हृदि च धरामः ।।
मत्तः शिक्षकाच्च सुत ! सर्वं व्याकरणं साहित्यमधीष्व ।
वत्स ! धातुरूपं जानीष्व ।।५।।

५–हुङ्कुरु रे सुत ! कथां शृणोषि ।

त्रेतायां साकेतसमीपे वने दस्युरेको वसति स्म ।
इतस्ततो गच्छतो मार्गिणो लगुडप्रहारात्स लुण्ठति स्म ।।
तत्र गतो नारदो वदति तं दस्युराज ! कथमिदं करोषि ?
हुंकुरु रे सुत ! कथां शृणोषि । ।।१।।

परधनलुण्ठनजीवनवृत्तिं कुटुम्बभरणार्थमिमां करोमि ।
तत्प्रदेहि यत्स्यात्तव पार्श्वे लुण्ठनाय त्वामद्य चिनोमि ।।
नारदो वदति लुण्ठनेन त्वं दस्युराज ? पापानि तनोषि ।
हुङ्कुरु रे सुत ! कथां शृणोषि ।।२।।

हुंकरोमि हे पितस्तेन तु हानिः कृता देव ऋषिमाने ।
शृणु रे वत्स ! तमवदद्दस्युः—पापं पुण्यं नाहं जाने ।।
पुण्यं शुभं कर्म, विपरीतं पापं, कथं शुभं न वृणोषि ?
हुंकुरु रे सुत ! कथां शृणोषि ।।३।।

पुण्यकर्म किं जनस्य कुरुते पापं पुरुषं विदधाति च कम् ?
पुण्यं स्वर्गामिनं करोति पापं तं द्रष्टारं नरकम् ।
गच्छ कुटुम्बं पृच्छ परिजनान् त्वामिच्छति कस्त्वं पापोऽसि ।
हुंकुरु रे सुत ! कथां शृणोषि ।।४।।

गत्वाऽपृच्छत्स दस्युराजः के गेहे मे कुकर्मभाजः !
अस्माकं ते केऽपि न सन्ति ये ते कृतकुकर्म वाञ्छन्ति ।
कस्त्वां कथयति यस्त्वं गत्वा जनलुण्ठनं कुकर्म करोषि ।
हुंकुरु रे सुत ! कथां शृणोषि ।।५।।

ततो निराशः स मुनिमागतः उपदिष्टः संस्तपसे च गतः ।
वल्मीकादागतः स तप्त्वा ऋषिवाल्मीकिः ख्यातिं प्रगतः ।
तादृशमहाकविर्भवितुं किं त्वं गृहविद्यातपस्तनोषि ?
हुंकुरु रे सुत ! कथां शृणोषि ।।६।।

एकदा स तमसानदीतटे क्रौञ्चवधं दृष्ट्वा तद्धृदयम् ।
विकलं भूत्वा यदुक्तवांस्तन्महाकाव्यं श्रीरामायणम् ॥
किं तद्रामायणसरोवरे देहशुद्धये निमज्जितोऽसि ?
हुंकुरु रे सुत ! कथां शृणोषि ॥७॥

पितस्त्वया श्राविता कथेयं तस्य महर्षेर्वाल्मीकेर्माम् ।
स्वपिषि न, शुश्रूषसे वत्स ! यदि तदपरकथां श्रावयामि त्वाम् ।
शुश्रूषे श्रावय मामितरां पितः ! कथाश्रावणचतुरोऽसि ।
सुत ! हुंकुरु यदि कथां शृणोषि ॥८॥

मया श्रुतः स महर्षिर्व्यासः सत्यवतीमुखनन्दन आस ।
तज्जन्मकथा श्राव्यतां पितः ! येन कृतस्त्विह वेदविकासः ॥
वेदव्यासजन्मवृत्तं शृणु सुत ! त्वं कथाश्रवणनिपुणोऽसि ।
हुंकुरु यदि तत्कथां शृणोषि ॥९॥

एकदा यदा ऋषिपराशरः पुरा प्राप्तवान् यमुनातीरम् ।
तत्रैकासीद् धीवरकन्या या धृतवती शोभनं चीरम् ॥
ऋषिणोक्तं मां पारे तारय नाविक ! नौवाहनकुशलोऽसि ।
हुंकुरु सुत ! यदि कथां शृणोषि ॥१०॥

नाविकोऽब्रवीत्सुते सत्यवति ! ऋषिं गृहीत्वा प्रापय पारम् ।
मध्येनदि ऋषिणोक्तं सुन्दरि ! पार्श्वमेहि मे धारय भारम् ॥
व्यवधानं कुरु, पतति हिमतमः, करग्रहणं मे कथं करोषि ?
हुंकुरु सुत ! यदि कथां शृणोषि ॥११॥

इत्थं गर्भवती भूत्वा सा सत्यवती सुतमेकं सूते ।
कृष्णे द्वीपे भवं कृष्णद्वैपायनं च तं लोको ब्रूते ॥
तेन महाभारतं प्रणीतं यस्याध्ययने संलग्नोऽसि ।
हुंकुरु सुत ! यदि कथां शृणोषि ॥१२॥

६–कुरु सुत ! सम्प्रति समासज्ञानम् ।

पुत्र ! राजपुरुषास्तत्पुरुषं निजजनमिव मन्यन्ते वत्स !
द्वितीयातः सप्तमीविभक्ति यावत्समासश्रीशस्तत्सः ॥
विद्यापारङ्गतविद्यासुत ! कुरु विद्यागत ! विद्यामानम् ।
कुरु सुत ! सम्प्रति समासज्ञानम् ॥१॥

पदव्रीहिभिरन्यैर्यदि कर्तुं कांक्षसि बहुव्रीहिमात्मानम् ।
तत्त्वं विद्यानन्दो भूत्वा विद्याधन ! कुरु विद्यादानम् ॥
कुशाग्रबुद्धिस्त्वमाप्तविद्यो मुखमधुरिह कुरु विद्यास्थानम् ।
कुरु सुत ! सम्प्रति समासज्ञानम् ॥२॥

यत्राऽव्ययपदानि मुख्यानि तत्राऽव्ययीभावमनुविद्धि ।
यथाशक्ति यः प्रतिदिनं श्रमं कुरुते तेन प्राप्यते सिद्धिः ॥
निर्मक्षिकं स्थानमधिगत्याऽभ्यासेन च कुरु विद्यातानम् ।
कुरु सुत ! सम्प्रति समासज्ञानम् ॥३॥

माता पिता च मातापितरौ यौ द्वौ गेहे द्वन्द्वं कुरुतः ।
सुता सुतश्च सुतासुतौ ययोस्तौ तत्र नो शान्तिमनुभवतः ॥
तौ द्वौ मूढौ कलहं कुरुतो ययो र्न हृदये विद्याभानम् ।
कुरु सुत ! सम्प्रति समासज्ञानम् ॥४॥

मुख्यमिदं समासचतुष्टयम् गौणं द्वयमस्मादतिरिक्तम् ।
चतुरपुत्र ! तत्स्वकर्म धारय येन तव मनः स्याद् द्विगुसिक्तम् ॥
पञ्चरात्रमर्चसि गिरिजेशम् एकाहः कुरु विजयापानम् ।
कुरु सुत ! सम्प्रति समासज्ञानम् ॥५॥

यत्किञ्चित्ते वत्स ! जनन्या पाठितमत्राऽभ्यासं कुर्याः ।
काशिराजदुहिता तव माता विदुषी चास्ति युवतिषु नगर्याः ॥
मात्रा सह भोजनं कुरुष्व काव्यं करोमि त्वमितो गच्छ
सुत ! समासरूपाण्यवगच्छ ॥६॥

७–रे सुत ! विद्यालयादागमः ।

'किं पठितं सुत ! गत्वारूपं कथय कथ व्याकरणं सृजति ?
गम्धातोः क्त्वाप्रत्ययेन संह गत्वासिद्धिर्मतिर्भवति ॥
भव विद्वानिह पुत्र ! संस्कृते स्वकीयेन जनकेन गिरि समः ।
त्वमङ्ग ! विद्यालयादागमः ॥१॥

प्रयोगेन सह वद त्वमङ्ग ! का सहशब्देन विभक्तिर्भवति ?
सहशब्देन तृतीया ह्युक्ता यथा पतिः पत्न्या सह चलति ॥
पितरधुनाऽहंकिञ्चिद् भुक्त्वा पाटयामि मातरं गुरुसमः ।
किमङ्ग ! विद्यालयादागमः ? ॥२॥

किमहो ! पुत्र ! मातरं विदुषीमध्यापयसि व्याकरणसिद्धिम् ?
अभ्यासेन वर्धयस्येवं प्रिये ! स्वपुत्रे ज्ञानसमृद्धिम् ?
सुतात्पठित्वा पाठयामि तं प्रिय ! तस्याऽज्ञानं हरे तमः ।
किं कविसम्मेलनादागमः ? ॥३॥

राजसु यथा विक्रमादित्यः सदा राजते मालवराजः ।
कविषु तथा त्वं कवितां कुर्वन् विराजसे प्रियतम ! कविराजः ॥
कवितारसिकविक्रमो नासीत्किं तत्रोपस्थितः कविसमः ?
त्वं कविसम्मेलनादागमः ॥४॥

प्रिये ! तं विना कविसम्मेलनमत्र राजभवने नो भवति ।
स एव कविताः शृणोति सततं सम्मानञ्च कवीनामवति ॥
प्रजापालकः प्रिय ! स रक्षको राज्ये राजति गृहे पितृसमः ।
यत्कविसम्मेलनादागमः ॥५॥

पितृसमः पुस्तकं पठित्वा मातः ! कवितामहं करिष्ये ।
पठ विद्यां ज्ञात्वा तत्कवयेः सुत ! तव चिन्तामहं हरिष्ये ॥
व्याकरणं साहित्यं छन्दः सर्वं पठ तत्सिद्धये समः ।
रे सुत ! विद्यालयादागमः ॥६॥

८–ज्ञात्वा किञ्चित्कवयितुमिच्छ ।

वन्दे महर्षिं वाल्मीकिं वेदव्यासं तथा ऋषिम् ।
यद्रचना नवीनानां कवीनां काव्यप्रेरिका ।।१।।
आदिकाव्यरामायणं च पठ कविकोकिलवाल्मीकिना कृतम् ।
व्यासकृष्णद्वैपायनरचितं तथेतिहासं महाभारतम् ।।२।।
कविपुत्रेण च सौमिल्लेन च यल्लिखितं तत्त्वं पठ पुत्र !
घटखर्परकृतकाव्यममरकृतममरकोषमपि भण शुभमत्र ।।३।।
स्वप्नवासवदत्तादीनि च नाटकानि भासेन कृतानि ।
ततः पुत्र ! नाटकत्रयं मे चत्वारि च पठ मे काव्यानि ।।४।।
छन्दोग्रन्थं मे श्रुतबोधं, छन्दोज्ञानार्थं पठ श्रीमन् !
'जतौ जगौ गश्च भवन्ति यस्याम्'-उपेन्द्रवज्रां कथयामि धीमन् ! ।५।
काव्यार्थं छन्दोऽभ्यासं कुरु छन्दांसि च काव्येषु कानिचित्
भव वंशस्थ-शिखरिणी-मन्दाक्रान्ता-शार्दूलोपजातिवित् ।।६।।
आर्यामनुष्टुभञ्च मालिनीं द्रुतविलम्बितं वसन्ततिलकाम् ।
इतिवृत्ताश्वान् सञ्चालयितुं गृहाण वर्णपदावलिकविकाम् ।।७।।
उपमां रूपकमुत्प्रेक्षादीन् कांश्चिदलङ्कारानवगच्छ ।
सन्धिसमासकारकान्नियमान् ज्ञात्वा किञ्चित्कवयितुमिच्छ ।।८।।

पितः ! पश्य कविता मया कृता ।

एका चटका निवसति निलये तां तत्राऽऽलोकयितुमहमये ।
तस्या द्वौ शावौ पश्यामि याभ्यामन्नकणान् प्रददामि ।।
तैश्च कणैस्तेषा क्षुधा हृता ताभ्यां सह सा येन नो मृता ।
पितः ! पश्य कविता मया कृता ।।९।
साधु साधु सुत ! साधु साधु रे ! यल्लिखितं तत्कर्णस्वादु रे !
पुत्र ! त्वदीयेयं लघुकविता, या शिशुसाहित्ये यशोऽविता ।।१०।।

६–शाकुन्तलमथ ते मयार्ऽपितम् ।

अत्र प्रिये ! त्वं चित्रिता मया कण्वपालिता सा शकुन्तला !
सममनसूयाप्रियंवदाभ्यां त्वं मे वाङ्मयसुन्दरी कला ॥
यत्र भूपतेर्दुष्यन्तस्य त्वया प्रेमवचनं तदर्जितम् ।
शाकुन्तलमथ ते मयार्ऽपितम् ॥१॥

भवानत्र दुष्यन्तो राजा यो निजपत्नीं नाङ्गीकुरुते ।
शकुन्तलाया महदाकांक्षां यः प्रियतम ! वञ्चनया हरते ॥
विद्योत्तमासमं शकुन्तलादुःखं कविना त्वयाऽऽकर्षितम् ।
शाकुन्तलं कथं त्वयार्ऽपितम् ? ॥२॥

पश्य प्रिय ! पुरुषशासनशक्तिं यः परिणीतामपि नो क्षमते ।
दुःखं दत्वा कान्तजनेभ्यो विविधास्वन्यकलासु च रमते ॥
यथा त्वया सुखमन्वेषयता शकुन्तलाचित्रं विनिर्मितम् ।
शाकुन्तलं कथं त्वयार्ऽपितम् ॥३॥

प्रथमं मे नाटकं त्वया तन्मालविकाग्निमित्रमपि दृष्टम् ।
यत्र प्रिये ! मालविकया त्वया मदग्निमित्रचित्तमाकृष्टम् ॥
मया निजासु सर्वरचनासु प्रिये ! त्वदीयं प्रेम वर्णितम् ।
शाकुन्तलमथ ते मयार्ऽपितम् ॥४॥

त्वया च तन्नाटकं द्वितीयं पठितं किं विक्रमोर्वशोयम् ?
त्वद्विरहे कविना सुचित्रितं प्रेमविलपितं यत्र मदीयम् ।
तस्मिन् प्रिये ! तुभ्यमुर्वश्यै प्रेम पुरूरवसा मयार्ऽपितम् ।
शाकुन्तलमथ ते मयार्ऽपितम् ॥५॥

राजकवे शिवभक्त ! त्वदीयं मया नाटकत्रयमपि दृष्टम् ।
शाकुन्तले किन्त्वभिज्ञाने प्रेम्णा त्वया विश्वमाकृष्टम् ।
प्रेरिकासि हे प्रिये ! मयेदं तत्र त्वदीयं प्रेम दर्शितम् ।
अतो नाटकन्ते तदर्पितम् ॥६॥

१०—यशोदानि काव्यानि ते कवे !

नाटकेषु शाकुन्तलं हि ते सर्वाधिकसुन्दरतामेति ।
महाकाव्ययोस्तव रघुवंशं सर्वकाव्यलक्षणं समेति ॥
मेघदूतमपि तथा कृतिस्ते जीवनदा किरणा यथा रवे ।
यशोदानि काव्यानि ते कवे ! ॥१॥

काव्यप्रभावादद्य ते गृहे काशिराजदुहिता तव जाया ।
यस्या आश्रयेण प्रसृतेयं कविवर ! परिजनरचनामाया ॥
कविता ते शृङ्गारप्रधाना जीवनीयसञ्चारदा शवे ।
यशोदानि काव्यानि ते कवे ! ॥२॥

अलमतिविस्तरेण हे देवि ! मां प्रियतमे ! प्रशंस नाधिकम् ।
सरस्वतीरूपिण्या देव्यास्तव विद्यायाः कृपाफलमिदम् ।
एतत्सुफलप्रहर्षनिमित्तं गच्छ पूरिकां देहि प्रिय ! गवे ।
यशोदानि काव्यानि ते कवे ! ॥३॥

शृणु तामहं देवतां स्तौमि या वाणीं मम मुखे ददाति ।
करयोः कमलासना शारदा सा वीणापुस्तके दधाति ॥
हस्तस्फटिकमालिका भाति शेते या धवले ह्यरविन्दे ।
तां सरस्वतीं देवीं वन्दे ।४।।

देवि ! त्वां विना नैव जायते लोकेऽस्मिन् वाणीव्यवहारः ।
यत्र प्रसीदसि तत्र सम्भवति सरसमधुरपदशब्दाचारः ॥
विद्ये देवि ! कुरु कृपां सततं सुभगे ! शृणु मयि लब्धानन्दे !
देवीमहं शारदां वन्दे ॥५॥

कविवर ! सरसा सरला वाणी तव मुखकमलात्प्रादुर्भवति ।
यां प्रशंसती तव हि समक्षं करबद्धा जगतीयं नमति ॥
अभ्यासं कुरु चिन्तनविधिना कस्मिन्नपि प्रिय ! विरचने नवे ।
यशोदानि काव्यानि ते कवे ! ॥६॥

— ० —

विद्योत्तमाकालिदासौ तौ,
स्वस्मिन् परिवारे निवसन्तौ ।
इत्थं दाम्पत्यं कुर्वन्तौ,
स्वात्मजीवनं यापितवन्तौ ॥६४॥

ऋतुसंहारमेघदूते द्वे गीतिकाव्ये कृत्वा,
कुमारसम्भवरघुवंशे द्वे महाकाव्ये कृतवान् ।
मालविकाग्निमित्रमथ पश्चाद्विक्रमोर्वशीयमपि,
अभिज्ञानशाकुन्तलमन्ते नाटकानि स रचितवान् ॥६५॥

आभिः सप्तकाव्यरचनाभिः ख्यातो हि कालिदासो
दाम्पत्येन सरसभावैः शृङ्गारकविश्च सोऽभवत्
सभार्यस्य तस्य च विषयेऽयं रामकिशोर मिश्र इह
विद्योत्तमाकालिदासीयं महाकाव्यं व्यलिखत् ॥६६॥

अस्य महाकाव्यस्य प्रथमसर्गात्षोडशसर्गान्ता,
बाणाऽनलखाऽऽत्माऽङ्कित (२०३५) विक्रमवर्षे रचना विहिता।
ततः सप्तदशसर्गादेकविंशसर्गान्ता रचना,
शशियुगखाऽक्षि(२०४१) विक्रमाब्दे सा कविना गीताक्षरिता ॥६७॥

भारत उत्तरप्रदेश एटाजनपद – सोरोंवासी,
होतीलालकलावत्योः पुत्रो मिश्रयोरात्मवान् ।
एकविंशसर्गान्तमिदं कविरामकिशोरमिश्र इह,
विद्योत्तमाकालिदासीयं महाकाव्यं पूरितवान् ॥६८॥

कविपरिचायिका

भारत उत्तरप्रदेश एटाजनपद—सोरों नगरे,
बाणग्रहनिधिचन्द्रे (१९९५) विक्रमसंवत्सरे बुद्धिमान् ।
होतीलालकलावतीगृहे भारद्वाजगोत्रजे
मिश्रशासिते ब्राह्मणवंशे शिशुरेकः प्रभूतवान् ॥१॥

एतद्दिनं फाल्गुने शुक्ले षष्ठीतिथिशनिवारः
येन सुखी सञ्जातो हर्षयुतोऽस्य मिश्रपरिवारः ।
कलावती प्रातः स्मरणीया शिशोरस्य सा माता,
पञ्चषवर्षशैशवे दैवाद्रुग्णा स्वर्गं याता ॥२॥

रामकिशोरमिश्रनामाऽयं बालः शूकरक्षेत्रे
संस्कृतविद्यालये प्रविष्टः संस्कृतमिह शिक्षितवान् ।
जगन्नाथकविकालिदासभारविकविताप्रभावितः
षोडशवर्षावस्थातोऽयं संस्कृतकविताः कृतवान् ॥३॥

दिव्यज्योतिषि संस्कृतसाकेते प्रकाशिताः कविताः
उपन्यासनाटकादिविधासु कविना ग्रन्था रचिताः
गङ्गासहायश्चन्द्रसहायः फूलसहायो मिश्राः
अस्य त्रयो भ्रातरो लोके लोकैरग्रजा मताः ॥४॥

खरसग्रहचन्द्राब्दे (१९६०) प्राप्तोच्शास्त्रीत्युपाधिकाम् ।
वाराणसीस्थसंस्कृतविश्वविद्यालयादयम् ॥५॥
कालषण्णिधिभूवर्षे(१९६३)स आचर्योऽभवत्कविः ।
अवाप्ता दक्षता येन साहित्य—व्याकरणयोः ॥६॥

ततश्च शिक्षको भूत्वा षड्साऽङ्केश (१९६६)हायने ।
एम्‌ए० पदभाग् आगरा विश्वविद्यालयादभूत् ॥७॥
अस्मिन्वर्षे कवेरस्य विवाहोऽभून्मया सह ।
पश्चादयं निमग्नोऽभूद् दाम्पत्यरससागरे ॥८॥

ततोऽहं शिक्षिताऽनेन एम्० ए० पर्यन्तपाठिता .
पठनं लेखनं चैव संस्कृते शिक्षितं मया ॥९॥
खाऽष्टनिधीश (१९८०)वर्षान्तं यावदस्य सुतास्त्रयः ।
सुते द्वे च समभूवन् श्रीमत्यां समये मयि ॥१०॥

ते पुत्राः सन्ति राजेशो गौरवो नूतनस्त्रयः ।
जीवति प्रतिभा पुत्री रञ्जना तु दिवंगता ॥११॥
वर्षेऽस्मिन्नेव मेरठविद्यालयादयम् ।
संस्कृतच्छन्दोविकासे विद्यावाचस्पतिरभूत् ॥१२॥

अध्यापने कृतरुचिर्नाऽध्यापिकाऽस्मि ।
लेखनरुचौ न सत्यामपि लेखिकाऽस्मि ॥
विधिं कुर्यां बलवन्तमभ्यासमथवा
बुद्धिदं भवति श्रमपयः प्रदत्तं गवा ॥१३॥

अन्तर्दाहमुपन्यासञ्च किशोरकथावलिं कविः,
ध्रुवमंगुष्ठदानमिति पञ्चनाटकानि च विरचितवान् ।
विद्योत्तमाकालिदासीयं महाकाव्यमिह कृत्वा,
काव्यैर्निजैः काव्यकिरणावल्याः सङ्कलनं कृतवान् ॥१४॥

त्यागपत्रनिरासमिति पत्नीत्यागपत्रमिति नाटक—
द्वयं पुरस्कृतमस्ति तथोपन्यासश्चापि सत्कृतः ।
पुरातनं तं छन्दोमार्गं त्यक्त्वा स्वगीतकाव्ये
स्वाविष्कृतनववृत्तप्रयोगः कविलेखन्या विहितः ॥१५॥

एतत्कथयित्वा विरमामि—
"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशः काये जरामरणजं भयम् ॥१६॥

श्रीमती देवी मिश्रा एम० ए०

सर्गाङ्काः	पद्याङ्काः	पंक्तिः	शुद्धपदानि	पृष्ठाः
२	३२	२	सुतेयं	१४
३	२	१	पूजनं	१८
३	३९	१	वृद्धेन	२२
४	१८	२	सत्यवद् भाग्यम्	२९
४	२८	२	सिमम्	३०
६	९	३	पूर्णतः	३९
६	३४	१	त्वयोक्तो	४३
६	४२	१	मपमानं	४५
७	१०	३	ह्य द्यता	४७
७	५९	४	मद्य	५५
८	३३	१	रूढं, मिच्छामि	५९
८	४२	४	गृहाण	६१
९	१५	४	तज्ज्ञो	६९
९	३२	४	कुरुष्व	७२
१०	२०	४	दत्वोत्तराणि	८२
११	१७	१	विषण्णा	९०
१४	१९	२	पतियोगस्तथेष्यते	११५
१४	३८	४	कथन्तु, कुर्याम्	११८
१५	१७	२	कविःकालिदासस्तवभर्ता	१२९
१६	२२	३	कर्तुमागता	१४०
१६	३७	१	न सरतु	१४३
१६	१०४	४	इतो	१५४
१७	१,४	४	विषमं	१६५
१८	३	१	नाथं	१७७
१८	३,४	१,४	रेभिर्न, एभिः	१७८
१९	१	२	कुरुते	१८३
१९	६	३	न निर्मासि	१८७

प्रकाशनद्वारि

कवेरन्याः संस्कृतरचनाः

१-काव्यकिरणावलिः (काव्यसङ्कलनम्) प्रकाशिता ।
२-अन्तर्दाहः (उपन्यास-प्रतियोगितायां पुरस्कृत उपन्यासः)
३-त्यागपत्रनिरासम् (नाटकप्रतियोगितायां पुरस्कृतमष्टाङ्क-नाटकम्)।
४-अङ्गुष्ठदानम् (पञ्चाङ्कनाटकम्) ।
५ ध्रुवन् (एकाङ्कनाटकम्) ।
६-पत्नीत्यागपत्रम् (नाटकप्रतियोगितायां पुरस्कृतमेकाङ्क-नाटकम्)।
७ अभिशप्तदशरथम् (एकाङ्कनाटकम्) ।
८-किशोरकथावलिः (कथानिकासङ्ग्रहः) ।
९-निबन्धबन्धः (निबन्धसङ्ग्रहः) ।
१०-छन्दोऽनुसन्धानम् (छन्दःशास्त्रीय ग्रन्थः) ।
११-वृत्तानुसन्धानम् (छन्दःशास्त्रीय ग्रन्थः) ।

हिन्दीरचनाः

१-अङ्गुष्ठ-प्रदान (खण्डकाव्य) ।
२-यक्ष-सन्देश (मेघदूत का भावानुवाद) ।
३-किशोरकविताकर (कवितासङ्ग्रह) ।
४-पतिपत्नीविवाद (खण्डकाव्य) ।
५ लड़का लड़की एक समान (एकाङ्कीनाटक) ।
६-'संस्कृत छन्दों का उद्भव तथा विकास' (संस्कृतशोध-प्रबन्ध) ।

व्रजभाषारचना

१-सुलहपाँचपचीसी (खण्डकाव्य) ।

प्रकाशकः ।